पञ्चार्णयुक्तं हारीति वृत्तम् ॥ ४१ ॥

यथा–

आनन्दकारी गोपीविहारी ।
मां पातु बालः केलीरसालः ॥ ४२ ॥

इति हारी २

२१ अथ हंसः

आदिरयान्तः कुण्डलयुक्तः ।
मध्यगतः सो यत्र स हंसः ॥ ४३ ॥

यथा –

नन्दकुमारः सुन्दरहारः ।
गोकुलपालः पातु स बालः ॥ ४४ ॥

इति हंसः २१

२२ अथ प्रिया

सगणाहिता लग-संयुता ।
भवतीह या किल सा प्रिया ॥ ४५ ॥

यथा –

सखि ! गोकुले सुखसंकुले[1] ।
व्रजसुन्दरो मनु निर्दयः ॥ ४६ ॥

इति प्रिया २२

---

१ ख 'सुखसंकुले' नास्ति ।

२३. अथ यमकम्

नमिह कुरु लयुगमथ ।
इति यमकमनुकलय ॥ ४७ ॥

यथा–

असुरयम शमिह मम ।
अनुकलय फणिवलय ॥ ४८ ॥

यथा वा–

लुषहर धरणिधर ।
दलितभव सुजनमव ॥ ४९ ॥

इति यमकम् २३

अत्र प्रस्तारगत्या पञ्चाक्षरस्य द्वात्रिंशद् ३२ भेदा भवन्ति, तेषु कतिचनोक्ताः शेषास्तूह्या ।*

इति पञ्चाक्षरम् ।

अथ षडक्षरम्

तत्र–

२४ शेषा

नागाधीशप्रोक्त सर्वैर्दीर्घैर्युक्तम् ।
षड्भिर्वर्णैर्वृत्त[1] शेषाख्य स्याद् वृत्तम् ॥ ५० ॥

यथा–

कसादीना काल गोगोपीना पाल ।
पायान्मायाबाल मुक्ताभूषाभाल[2] ॥ ५१ ॥

इति शेषा २४

२५. अथ तिलका

यदिसद्वितयाचित सर्व पदा ।
तिलकेति फणिर्वदतीह तदा ॥ ५२ ॥

यथा–

कमनीयवपु शकटादिरिपु ।
जयतीह हरि भवसिन्धुतरि ॥ ५३ ॥

इति तिलका २५

---

१ ग विन्त इव । २ ख माल॰ ।

*टिप्पणी—शेषभेदा पञ्चमपरिशिष्टे द्रष्टव्या ।

२६ अथ विमोहम्

पक्षिराजद्वय यम पादस्थितम् ।
पिङ्गलेनोदित तद् विमोह मतम् ॥ ५४ ॥

यथा–

गोपिकामानसे यः सदा ध्यानगे ।
पातु मां सेवक सोऽङ्गभवो वकम्[1] ॥ ५५ ॥

इति विमोहम् २६

विज्जोहा' इति स्त्रीलिङ्गं पिङ्गले*[1] ।

२७ अथ चतुरंसम्

प्रथमनकारं[2] तदनु यकारम् ।
कुरु चतुरंसे फणिकृतशंसे ॥ ५६ ॥

यथा–

विनिहतकंसं तरलवतंसम् ।
मम भृतवंश सुरकृतशंसम् ॥ ५७ ॥

इति चतुरंसम् २७

चउरंसा' इति स्त्रीलिङ्ग पिङ्गले* ।

२८ अथ मन्थानम्

पादे द्विर्त देहि षड्वर्णमाधेहि ।
जानीहि नागोक्तमन्थानमेतद्धि ॥ ५८ ॥

यथा

धूतासुराधीश गोगोपकाधीश ।
मां पाहि गोविन्द गोपीजनानन्द[3] ॥ ५९ ।

इति मन्थानम् २८. स्त्रीलिङ्गमन्यत्र ।

२९. अथ शङ्खनारी

यदा स्तो यकारी रसप्रोक्तवर्णो ।
तदा शङ्खनारी फणीन्द्रोदिता स्यात् ॥ ६० ॥

यथा

व्रजे रासकारी मनस्तापहारी ।
वपूंषि समतो हरिः पातु नः ॥ ६१ ॥

इति शङ्खनारी २९ 'सोमराजी' त्यन्यत्र ।

---

१ ख वस्मिर्गदर्शे नास्ति । २ क ख पुस्तके 'नकारं' स्थाने 'मकारात्' पाठः लोऽसमीचीनः (सं) ३ ख मकारं ।

टिप्पणी—१ प्राकृतपैङ्गलम् वर्णवृत्त २ पद्य ४५

*टिप्पणी—२ ,, ,, ,, ४७

३०. अथ सुमालतिका

जकारयुगेन विभाति युतेन ।
अहिर्वदतीति सुमालतिकेति ॥ ६२ ॥

यथा– व्रजाधिपबाल विभूषितबाल[1] ।
सुरारिविनाश नमाम्यनलाश ॥ ६३ ॥

इति सुमालतिका ३० 'मालती'ति पिङ्गले*[1] ।

३१ अथ तनुमध्या

यस्या शरयुग्म कुन्तीसुतयुग्मे ।
ग्रन्थे खलु साध्या सा स्यात्तनुमध्या ॥ ६४ ॥

यथा– राधासुखकारी वृन्दावनचारी ।
कसासुरहारी पायाद् गिरिधारी ॥ ६५ ॥

इति तनुमध्या ३१

३२ अथ दमनकम्

नगणयुगलमिह रचयत ।
दमनकमिति परिकलयत ॥ ६६ ॥

यथा– व्रजजनयुत सुरगणवृत ।
जय मुनिनुत व्रजपतिसुत ॥ ६७ ॥

इति दमनकम् ३२

अत्र प्रस्तारगत्या षडक्षरस्य चतुषष्टि ६४ भेदा भवन्ति, तेषु आद्यन्त-सहिता कियन्तो भेदा उक्ता, शेषभेदा सुधीभिरूह्या। ग्रन्थविस्तरशङ्कया नात्रोक्ता इति ।°[2]

इति षडक्षरम् ।६।

अथ सप्ताक्षरम्

तत्र– ३३ शीर्षा

वर्णा दीर्घा यस्मिन् स्यु पादेऽद्रीणा सख्याका ।
नागाधीशप्रोक्त तत् शीर्षाभिख्य वृत्त स्यात् ॥६८॥

यथा– मुण्डाना मालाजालै-र्भास्वत्कण्ठ भूतेशम् ।
कालव्यालैः खेलन्त वन्दे देव गौरीशम् ॥ ६९ ॥

इति शीर्षा ३३

---

१ ख भाल ।
*टिप्पणी—१ प्राकृतपैङ्गलम्-परिच्छेद २ पद्य ५४ ।
°टिप्पणी—२ शेषभेदा पञ्चमपरिशिष्टे द्रष्टव्या ।

१४ अथ समानिका

पञ्चिरामभासिता येन संविभूषिता ।
अन्तगेन शोभिता सा समानिका मता ॥ ७० ॥

यथा–

फुल्लपङ्कजाननं केलिशोभिकाननम् ।
बल्लवीमनोहरं नौमि राधिकावरम् ॥ ७१ ॥

इति समानिका १४

१५ अथ सुवासकम्

द्विजमिह भारय भगनु च कारय ।
भवति सुवासक मिति गुणभासक ॥ ७२ ॥

यथा–

विबुधतरङ्गिणि मुनि कृत[१]रिङ्गिणि ।
तरलतरङ्गिणि जय हरसङ्गिणि ॥ ७३ ॥

इति सुवासकम् १५

१६ अथ करहञ्चि

नगणमिह धेहि तदनु समवेहि ।
इति किल[ख]चापि भवति करहञ्चि ॥ ७४ ॥

यथा–

व्रजभुवि विलास युवतिकृत[रा]स ।
जय मिहतवैरय जघन[२]कृतधरय ॥ ७५ ॥

इति करहञ्चि १६

१७ अथ कुमारललिता

जकारयुतकर्णा मुनीन्द्रमितवर्णा ।
लघुद्वितयमध्या कुमारललिता स्यात् ॥ ७६ ॥

यथा–

व्रजाधिपकिशोरं नवीनदधिचोरम् ।
कुमारललित [तं] नमामि हृदि सततम् ॥ ७७ ॥

इति कुमारललिता १७

१८ अथ मधुमती

नगणयुगयुता तदनु ग-महिता ।
वदति मधुमती-महिरतिसुमति ॥ ७८ ॥

१ क 'गुञ । २ ग भयन ।

यथा–

दितिसुतकदन शशधरवदन ।
विलसतु हृदि न तनुजितमदन ॥ ७९ ॥

इति मधुमती ३८.

३९ अथ मदलेखा

आद्यन्ते कृतकर्णा शैलै सम्मितवर्णा ।
मध्ये भेन विशेषा नागोक्ता मदलेखा ॥ ८० ॥

यथा–

गोपाल कृतरास गो - गोपीजनवासम् ।
वन्दे कुन्दसुहास वृन्दारण्यनिवासम् ॥ ८१ ॥

इति मदलेखा ३९.

४०. अथ कुसुमतति

द्विजमनुकलय नमनु विरचय ।
अहिरनुवदति कुसुमततिरिति ॥ ८२ ॥

यथा–

विषमशरकृत कुसुमततियुत ।
युवतिमनुसर मनसि-शयकर ॥ ८३ ॥

इति कुसुमतति ४०.

अत्र प्रस्तारगत्या सप्ताक्षरस्य अष्टाविंशत्यधिक शत १२८ भेदा भवन्ति, तेषु आद्यन्तसहित भेदाष्टक प्रोक्त, शेषभेदा ऊहनीया सुबुद्धिभिर्ग्रन्थविस्तर-शङ्कया नात्रोक्ता इति ।*१

इति सप्ताक्षरम् ।

अथ अष्टाक्षरं वृत्तम्

तत्र–

४१. विद्युन्माला

सर्वे वर्णा दीर्घा यस्मिन्नष्टौ नागाधीशप्रोक्ता ।
अब्धावब्धौ विश्राम स्याद् विद्युन्मालावृत्त तत् स्यात् ॥ ८४ ॥

यथा–

कण्ठे राजद्विद्युन्माल श्यामाम्भोदप्रख्यो बाल ।
गो-गोपीना नित्य पाल पायात् कसादीना काल ॥ ८५ ॥

इति विद्युन्माला ४१

---

*१ शेषभेदाः पञ्चमपरिशिष्टे द्रष्टव्या ।

४२ अथ प्रमाणिका

सरैस्तथा च कुण्डले क्रमेण याऽतिशोभिता ।
गिरीन्द्रवर्णभासिता प्रमाणिकेति सा मता ॥ ८६ ॥

यथा–

विमोममौलिशोभित व्रजाङ्गनासु सोभितम् ।
नमामि नन्दवारकं तटस्थधीरहारकम् ॥ ८७ ॥

इति प्रमाणिका ४२

४३ अथ मल्लिका

हारमेत्तमम देहि त पुन' क्रमादवेहि ।
वेहि योगवर्णमासु(णु) मल्लिकां कुरुष्व वासु ॥ ८८ ॥

यथा–

वेणुरन्ध्रपूरकाय गोपिकासु मध्यगाय ।
कन्महारमण्डिताय मे नमोऽस्तु केशवाय ॥ ८९ ॥

इति मल्लिका ४३

इयमेव ग्रन्थान्तरे अष्टाक्षरप्रस्तारे समानिका इत्युच्यते । अस्माभिस्तु सप्ताक्षरप्रस्तारे समानिका प्रोक्तेति विशेष' ।

४४ अथ तुङ्गा

द्विजवरगणयुक्ता तदनु करतलोक्ता ।
पुनरपि गुरुसङ्गा फणिपतिकृततुङ्गा ॥ ९० ॥

यथा–

व्रजविहरणशील युवतिषु कृतलील: ।
हृदि विलसतु विष्णु, दितिसुतकुलजिष्णु ॥ ९१ ॥

इति तुङ्गा ४४

४५ अथ कमलम्

नगण-सगणाचितं लघुगुरुविराजितम् ।
फणिनृपविकासितं कमलमिति भाषितम् ॥ ९२ ॥

यथा–

वरमुकुटभासुर: व्रजभुवि हतासुर: ।
व्रजनृपतिनन्दन जयति हृदि चन्दन' ॥ ९३ ॥

इति कमलम् ४५

१ क वृत ।

४६. अथ माणवकक्रीडितकम्

भेन युत तेन चित दण्डकृत हारवृतम् ।
वेदयति नागमत माणवकक्रीडितकम् ॥ ९४ ॥

यथा–

वेणुधर तापहर[1] नन्दसुत बालयुतम् ।
चन्द्रमुख भक्तसुख नौमि सदा शुद्धहृदा ॥ ९५ ॥

इति माणवकक्रीडितकम् ४६

४७ अथ चित्रपदा

भद्वितयाचितकर्णा शैलविकासितवर्णा ।
वारिनिधौ यतियुक्ता चित्रपदा फणिनोक्ता ॥ ९६ ॥

यथा–

वेणुविराजितहस्त गोपकुमारकशस्तम् ।
वारिदसुन्दरदेह नौमि कलाकुलगेहम् ॥ ९७ ॥

इति चित्रपदा ४७.

४८ अथ अनुष्टुप्

सर्वत्र पञ्चम यस्य लघु षष्ठ गुरु स्मृतम् ।
सप्तम समपादे तु ह्रस्व तत्स्यादनुष्टुभम् ॥ ९८ ॥

यथा–

कमल ललितापाङ्गि-कालालिकुलसङ्कुलम् ।
विलुलत् कुन्तल सुभ्रु ! कलयत्यतुल सुखम् ॥ ९९ ॥

इति अनुष्टुप् ४८.

४९. अथ जलदम्

कुरु नगणयुगल मनु च लयुगमिह ।
वरफणिपतिकृति[2] कलय जलदमिति ॥ १०० ॥

यथा–

नवजलदविमल शुभनयनकमल ।
कलय मम हृदय-मखिलजनसदय ॥ १०१ ॥

इति जलदम् ४९

अत्र च प्रस्तारगत्या अष्टाक्षरस्य षट्पञ्चाशदधिक द्विशत २५६ भेदास्तेषु आद्यन्तसहित कियन्तस्समुदाहृता, शेषभेदा प्रस्तार्य समुदाहर्त्तव्या इति ।*

इत्यष्टाक्षरम् ।

---

१ 'तापहर' क प्रतौ नास्ति । २ ख फणिपतिकृतमथ ।

*टिप्पणी—ग्रन्थान्तरेषु सम्प्राप्त ये शेषभेदास्ते पञ्चमपरिशिष्टे द्रष्टव्या ।

अथ नवाक्षरम्

तत्र–

१ रूपामाला

मेत्रोक्ता मा पादे दृश्यन्ते यस्मिन्नष्टौ वर्णा भासन्ते ।
यच्छ्रुत्वा भूपाला मोदन्ते सद् रूपामालाख्य प्रोक्त ते ॥ १०२ ॥

यथा–

भव्याभि केकाभि सम्मिश्रा कुर्वन्त सम्पूर्णा सर्वाशा ।
एते वन्सीन्द्राणां सकाशा मेघा पूर्णास्तस्मात् सम्प्राप्ता ॥ १०३ ॥

इति रूपामाला १

११ महालक्ष्मिका

वैनतेयो यदा भासते साऽपि चेद् वह्निना भूष्यते ।
रम्यवर्णा यदा सङ्गता सा महालक्ष्मिका सम्मता ॥ १०४ ॥

यथा

कानने भासि मधौरत कामबाणावलीसंयुतम् ।
मामस भावनादाहितं क्षीयय स्वं मनो माहि तम् ॥ १०५ ॥

इति महालक्ष्मिका ११

१२ अथ सारङ्गम्

नगणमकारप्रथित मधुयुगै[1] सकथितम् ।
कविजनसम्ब्जातमद कमयत सारङ्गमिदम् ॥ १०६ ॥

यथा–

सखि हरिरामाति यदा विरचितकम्पेन ह्रदा ।
न किमपि वक्तु कलये कथमपि दृष्टे वलये ॥ १ ७ ॥

यथा वा–

प्रणमत सर्वाघहर दितिसुतगर्वापहरम् ।
सुरपतितर्षाहरण विलसदखर्वाभरणम् ॥ १०८ ॥

इति सारङ्गम् १२

इदमेव सारङ्गिकेति पिङ्गले* नामान्तरणोक्तम् ।

---

१ क युक्तैः ।

*टिप्पणी—१ प्राकृतपैङ्गलम्–परि २ पद्य

५३ अथ पाइन्तम

यस्यादिर्वै मगणकृतश्चान्तो हस्तेन विरचित ।
मध्ये भो यस्य विलसित तत् पाइन्त फणिभणितम् ॥ १०९ ॥

यथा–

गोपालाना रचितसुख सम्पूर्णेन्दुप्रतिममुखम् ।
कालिन्दीकेलिषु ललित वन्दे गोपीजनवलितम् ॥ ११० ॥

इति पाइन्तम् ५३ पाइन्ता इति पिङ्गले* ।

५४ अथ कमलम्

नगणयुगलमहित तदनु करविरचितम् ।
फणिकृतमतिविमल प्रभवति किल कमलम् ॥ १११ ॥

यथा–

तरलनयनकमल रुचिरजलदविमलम् ।
शुभदचरणकमल कलय हरिमपमलम् ॥ ११२ ॥

इति कमलम् ५४

५५ अथ विम्बम्

द्विजवरनरेन्द्रकर्णै प्रविरचितनन्द६वर्णैः ।
फणिनृपतिनागवित्त कविसुखदबिम्बवृत्तम् ॥ ११३ ॥

यथा–

लुलितनलिनालसाक्ष शठललितवाचिदक्ष ।
कलयसि सुरागिवक्ष त्वमपि मयि जातभिक्ष ॥ ११४ ॥

इति बिम्बम् ५५.

५६ अथ तोमरम्

सगण मुदा त्वमवेहि जगणद्वय च विधेहि ।
नवसङ्ख्या वर्णविधारि कुरु तोमर सुखकारि ॥ ११५ ॥

यथा–

कमलेषु 'सलुलितालि बकुली[कृत] वरमालि ।
अवलोकये वनमालि वपुरेति'[1] किं वनमालि ॥ ११६ ॥

इति तोमरम् ५६

---

१ ' ' चिह्नमध्यग पाठो नास्ति ख प्रतौ ।

* टिप्पणी—प्राकृतपैङ्गलम्–परि २ पद्य ८० ।

२७ अथ भुजगशिशुसृता

नगणयुगलसविष्टं तदनु मगणनिर्दिष्टम् ।
भुजगशिशुसृतावृत्तं कलयत फणिना वित्तम् ॥ ११७ ॥

यथा– अनुपमयमुनातीरे नवपवन(कमल)सुसमीरे ।
प्रणमत कदलीकुञ्जे हरिमिह सुदृशां पुञ्जे ॥ ११८ ॥

इति भुजगशिशुसृता २७

सृता इत्येव छन्दःप्रभृतिषु पाठः । भृता इति आधुनिका पठन्ति*

२८ अथ मणिमध्यम्

आदिमकारं देहि तत सोऽपि गणान्ते[1] मामवत ।
मध्यमकारो भाति यदा स्यान्मणिमध्यं नाम तदा ॥ ११९ ॥

यथा– कलमवनारीमानहरः पूरितवंशीरावपरः ।
गोकुलनेता गोपवरः पातु हरिस्त्वां गोपवरः ॥ १२० ॥

इति मणिमध्यम् २८

२९ अथ भुजङ्गसङ्गता

सगणं विधेहि सङ्गतं जगणं ततोऽपि संयुतम् ।
रगणं च नागसम्मता कथिता भुजङ्गसङ्गता ॥ १२१ ॥

यथा– मम वल्लवे मनो भृशं परिभावयाङ्गक कृशम् ।
कथयामि य तमामये धृतिमासि येन धारये ॥ १२२ ॥

इति भुजङ्गसङ्गता २९

१ अथ सुललितम्

दहन-नमिह विधनु चरणमनु च सुतनु ।
फणिपतिनृपतिकृति कलय सुललितमिति ॥ १२३ ॥

यथा– कलितललितमुकुट निहतदितिजशकट ।
मम सुखमनुकलय करयुगधृतवलय ॥ १२४ ॥

इति सुललितम् १

अत्र प्रस्तारगत्या नवाक्षरस्य द्वादशाधिकपञ्चशत भेदेषु ५१२ आद्यन्त सहिता एकादशभेदा प्रदर्शिताः शेषभेदा ऊहनीयाः ॥ १ ॥*

इति नवाक्षरं वृत्तम् ।

---

१ ख मनोभवे ।

*टिप्पणी—१ छन्दोमञ्जरी द्वि स्त० कारिका २४

*टिप्पणी—२ मदधिष्ठा प्राप्तभेदाः पञ्चशतपरिधिर्पे पर्यालोच्या ।

अथ दशाक्षरम्

तत्र प्रथमम्—

६१ गोपाल.

वह्नेस्सख्याका मा पादे यस्मि-न्नन्ते हारश्चैको युक्तो यस्मिन् ।
नागाधीशप्रोक्त तद् गोपाल पक्त्यर्णैर्युक्त मुह्यद्भूपालम् ॥ १२५ ॥

यथा–

गो-गोपालाना वृन्दे सञ्चारी भूमौ दृप्यद्दैत्याना सहारी ।
यद्वेणुक्वाणैर्मोह सप्रापु गोप्य सोऽव्यान् मा य देवा नापु[१] ॥ १२६ ॥

इति गोपाल ६१

६२. अथ सयुतम्

सगण विधाय मनोहर जगणद्वय च ततोऽपरम् ।
गुरुसङ्गत फणिजल्पित सखि ! सयुत परिकल्पितम् ॥ १२७ ॥

यथा–

सखि गोपवेशविहारिण शिखिपिच्छचूडविधारिणम् ।
मधुसुन्दराधरशालिन ननु कामये वनमालिनम् ॥ १२८ ॥

यथा वा–

व्रजनायिका हतकालिय कलयन्ति या मनसालि यम् ।
सदय मया सह शालिन कुरु तासु त वनमालिनम् ॥ १२९ ॥

इति सयुतम् ६२

सयुता इति स्त्रीलिङ्ग पिङ्गले ।*

६३ अथ चम्पकमाला

आदिभकारो यत्र कृत स्यात् प्रेयसि पश्चान् मोपि मत स्यात् ।
अन्तसकारो गेन युत स्यात् चम्पकमालावृत्तमिद स्यात् ॥ १३० ॥

यथा–

सर्वमह जाने हृदय ते कामिनि ! किं कोपेन कृत ते ।
पङ्कजघातैर्लोचनपातै. कामितमाप्त चेतसि ता तै ॥ १३१ ॥

इति चम्पकमाला ६३.

रुक्मवतीति अन्यत्र । रूपवतीति च क्वचित् नामान्तरेण इयमेव ज्ञेया ।

६४ अथ सारवती

भत्रितयाचित सर्वपदा पण्डितमण्डलिजातमदा ।
गेन युता किल सारवती नागमता गुणभारवती ॥ १३२ ॥

---

१ ख पर्दैवानापु ।

* टिप्पणी—प्राकृतपैङ्गलम्, परि० २, पद्य ९० ।

यथा–

माधवमासि हिमांशुकर चिन्तय चेतसि तापकरम् ।
माधवमानय जातरस चित्तमिदं मम तस्य वशम् ॥ १३३ ॥

इति सारवती ६४

६५ अथ सुषमा

आदौ च(त)गण' पश्चाद् यगण यस्यामनु पाद स्याद् भगण' ।
हार कथितश्चान्ते महिता सेय सुषमा नागप्रथिता' ॥ १३४ ॥

यथा–

गापीजनचित्ते सवलितं वृन्दावनकुञ्जे समलितम् ।
वन्दे यमुनातीरे तरलं कंसादिकदैत्यानां गरलम् ॥ १३५ ॥

इति सुषमा ६५

६६ अथ अमृतगतिः

नगण-नरेन्द्र-नविहिता तदनु च चामरमहिता ।
अमृतगति' कविकथिता फणिमणितोषभिमथिता ॥ १३६ ॥

यथा–

सखि मनसो मम हरण हरिमुरलीकृत'करणम् ।
भव मम जीवितधारण किमु कुसमे निजमरणम् ॥ १३७ ॥

इति अमृतगति ६६

६७ अथ मत्ता

आ*ौ कुर्यान् मगणसुयुक्त त म पश्चाद् नगणसुविरतम् ।
अन्त हस्तं कुरु गुरुहार मत्तावृत्तं कविजनसारम् ॥ १३८ ॥

यथा–

वृ दारण्ये कुसुमितकुञ्जे गापीवृन्दै सह सुखपुञ्जे ।
राधासक्त जलधरनीलं घोरं वन्दे भुवि कृतलीलम् ॥ १३९ ॥

इति मत्ता ६७

६८ अथ त्वरितगति

नगणदृता जगणयुता नगणहिता गुरुमहिता ।
इति हृ फणिर्भणति यदा त्वरितगतिर्भवति तदा ॥ १४० ॥

---

१ ख अर्हिता । २ ख रव ।

यथा–

सरसमतिर्यदुनृपति परमततिस्त्वरितगति ।
क्षपितमद कलितगद सकलतरिर्जयति हरि ।। १४१ ।।

यथा वा–

क्षितिविजिति स्थितिविहृति-व्रतरतय परगतय ।
उरु रुरुधुर्गुरु दुधुवु-र्युधि कुरव स्वमरिकुलम् ।। १४२ ।।

इति **दण्डिनी**[*1]

इति त्वरितगति ६८

६९ अथ मनोरमम्

नगणपक्षिराजराजित कुरु मनोरम सभाजितम् ।
जगणकुण्डलप्रकाशित फणिप-पिङ्गलेन भाषितम् ।। १४३ ।।

यथा–

कलय भाव नन्दनन्दन सकललोकचित्तचन्दनम् ।
दितिज-देवराजवन्दन कठिनपूतनानिकन्दनम् ।। १४४ ।।

इति मनोरमम् ६९

स्त्रीलिङ्गमिदमन्यत्र[*2] । अत्रापि न तेन काचित् क्षति ।

७० अथ ललितगति

दहनमिह कलयत तदनु शरमपि कुरुत ।
वदति फणिनृपतिरिति पठत ललितगतिमिति ।। १४५ ।।

यथा–

ललितललिततरगति हरिरिह समुपसरति ।
तव सविधमयि सुदति ! सफलय निजजनुरति ।। १४६ ।।

इति ललितगति[1] ७०

अत्र प्रस्तारगत्या दशाक्षरस्य चतुर्विंशत्यधिक सहस्र १०२४ भेदा भवन्ति तेषु कियन्तो भेदा लक्षिता, शेषभेदा [स्तु सुधीभिरूह्या.][5] ।[*3]

इति दशाक्षरं वृत्तम् ।

---

१ ख प्रस्तार्य लक्षणीया ।

*टिप्पणी—१ काव्यादर्श तृतीय परिच्छेद पद्य ८५

*टिप्पणी—२ छंदोमजरी द्वि० स्त० का० ३४

*टिप्पणी—३ ग्रन्थान्तरेपूपलब्धा शेषभेदा पञ्चमपरिशिष्टे द्रष्टव्या. ।

लघुमथ ग च जन सुमुखी,
भवति[1] यत किल सा सुमुखी ॥ १५१ ॥

यथा–

तरुणविधूपमित वदन,
मम हृदये कुरुते मदनम् ।
इति कथयश्चरणौ नमते[2],
हरिरनुधेहि दृश वनिते ॥ १५२ ॥

इति सुमुखी ७३

७४ अथ शालिनी

कृत्वा पादे नूपुरौ हारयुग्म,
धृत्वा वीणामङ्किता चामरेण ।
पुष्पप्रोत चापि[3] कर्णं दधाना,
नागप्रोक्ता शालिनीय विभाति ॥ १५३ ॥

यथा–

चन्द्रार्कौ ते राम[4]कीर्त्तिप्रतापौ,
चित्र शत्रुक्षोणिपालापकीर्त्तिम् ।
भासागाढध्वान्तमध्वसयन्तौ,
त्रैलोक्यस्य[5] श्वेतता सन्दधाते ॥ १५४ ॥

यतिरप्यत्र वेदलोकैर्ज्ञेया ।

इति शालिनी ७४

७५ अथ वातोर्मी

पूर्वं पादे मगणेन प्रयुक्ता,
या वै पश्चाद् भगणेनाथ युक्ता ।
वातोर्मीय तगणान्तस्थकर्णा,
वेदैर्लोकै स यती रुद्रवर्णा ॥ १५५ ॥

यथा–

मायामीनोऽवतु लोक समस्त,
लीलागत्या क्षुभिताम्भोधिमध्य ।
धात्रे दास्यन्नयन वेदरूप,
य कल्पाब्धौ जगृहे तिर्यगाख्याम् ॥ १५६ ॥

इति वातोर्मी ७५

---

१. ख भवत अत । २ ख भजते । ३ ख वागि । ४. ख मीन । ५ ख विश्वस्यापि ।

७६ अथानयोरुपजातिः

भेदे वातोर्मीचरणानां यदि स्यात्
पाठे साद्धं शालिनीवृत्तपादैः ।
छन्दःप्रोक्ता सम्भवन्तीह भेदा-
स्तेषां नामान्युपजातीति विद्धि ॥ १५७ ॥

यथा–

गोपं वन्दे गोपिकाचित्तचौरं
हास्यज्योत्स्नालुब्धहृद्यच्चकोरम् ।
शम्यायन्तं[1] धेनुसंघे धुनानं
वक्त्रं वंशीमधरे सन्दधानम् ॥ १५८ ॥

इति शालिनी-वातोर्म्युपजातिः ७६

अनयोरेकत्र पञ्चमाक्षरगुरुत्वादपरत्र च पञ्चमलघुत्वात् अल्पो भेद इति चतुर्दशोपजातिभेदाः पदेन पदाभ्यां पदैश्च परस्पर योजनात् प्रस्ताररचनया जायन्त इत्युपदेशः ।

७७ अथ दमनकम्

दहनमितनगणरचितं
तदनु कुरु लघुगुरुयुगलम् ।
फणिवरनरपतिमथितं
दमनकमिदमिति कथितम् ॥ १५९ ॥

---

१ ख पवर्तं ।

*टिप्पणी—१ छन्दसोऽस्य चतुर्दशभेदानां नामलक्षणोदाहरणानि ग्रन्थकृतापि नोल्लिखितानि नैव चान्यत्र ग्रन्थेषु भवन्ति समुपलभ्याः, अतश्चात्र प्रस्ताररीत्या चतुर्दशभेदानां लक्षणान्यत्र निरूप्यन्ते—

१	शा	वा	वा	वा	८	वा	वा	वा	शा
२	वा	शा	वा	वा	९	शा	वा	वा	शा
३	शा	शा	वा	वा	१०	वा	शा	वा	शा
४	वा	वा	शा	वा	११	वा	शा	वा	वा
५	शा	वा	शा	वा	१२	वा	वा	शा	शा
६	शा	वा	वा	शा	१३	वा	वा	शा	वा
७	शा	शा	शा	वा	१४	वा	वा	वा	शा

यत्र 'शा' 'वा' इति संकेतद्वयेन शालिनी-वातोर्मी क्रमशो ज्ञेये ।

यथा –

हृदि कलयत मधुमथन,
गिरिकृतजलनिधिमथनम् ।
रचितसलिलनिधिशयन,
तरलकमलनिभनयनम् ॥ १६० ॥

इति दमनकम् ७७

७८ अथ चण्डिका

आदिशेषशोभिहारभूषितौ,
बिभ्रती पयोधरावदूषितौ ।
स्वर्णशङ्ख कुण्डलावभासिता,
चण्डिकाऽहिभूषणस्य सम्मता ॥ १६१ ॥

यथा–

व्यालकालमालिकाविकाशित,
भालभासितानलप्रकाशितम् ।
शैलराजकन्यकासभाजित,
नौमि चारुचन्द्रिकाविराजितम् ॥ १६२ ॥

इति चण्डिका ।

सेनिका इति अन्यत्र । क्वचिच्च **श्रेणीति**[1] रगण-जगण-रगण-लघु-गुरुभिर्ना-मान्तर, फलतस्तु न कश्चिद्विशेष । किञ्च इयमेव चण्डिका यदि लघुगुरुक्रमेण क्रियते तदा सेनिका इत्यस्मन्मतम् । अतएव **भूषणकारोऽपि***[1] हारशङ्खविपरीता-भ्या रूपनूपुराभ्या लघुगुरुभ्या क्रमशो मण्डिता **चण्डिकामेव सेनिकामुदाजहार** । तन्मतमवलम्ब्य वयमपि सलक्षणमुदाहराम ।

७९ अथ सेनिका

शरेण कुण्डलेन च क्रमेण,
महेश-वर्णसख्यया भ्रमेण ।
समस्तपादपूरण विधेहि,
फणिप्रयुक्त-सेनिकामवेहि ॥ १६३ ॥

---

१ ख रेणीति ।

*टिप्पणी—हारशङ्खकुण्डलेन मण्डिता या पयोधरेण वीणयाङ्किता ।
रूपनूपुरेण चापि दुर्लभा सेनिका भुजङ्गराजवल्लभा ॥ २१२ ॥
[वाणीभूषण द्वि० अ०]

८२ अथानयोरुपजातय

उपेन्द्रवज्राचरणेन युक्त,
स्यादिन्द्रवज्राचरण यदैव ।
नागप्रयुक्ताश्च तदैव भेदा,
महेन्द्रसख्या उपजातय. स्यु ॥ १६९ ॥

यथा–

मुखन्तवैणाक्षि ! कठोरभानो,
सोढुं कर नालमिति ब्रुवाण ।
पटेन पीतेन वनेषु राधा[1],
चकार कृष्ण परिधूतवाधाम् ॥ १७० ॥

इति उपजाति ८२

भेदाश्चतुर्दशैतस्या क्रमतस्तु प्रदर्शिता ।
प्रस्तार्य स्वनिवन्धेषु पित्राऽतिस्फुटस्तत ॥ १७१ ॥
विलोकनीया भेदास्ते नास्माभिस्समुदाहृता ।
कथितत्वाद् विशेषेण ग्रन्थविस्तरशङ्कया*[1] ॥ १७२ ॥

---

१ ख राधा ।

*टिप्पणी—१ ग्रन्थकृता वृत्तस्यास्य भेदाना लक्षणोदाहरणार्थं स्वपितृश्रीलक्ष्मीनाथभट्टकृतो-दाहरणमञ्जरी द्रष्टव्येति ससूचितम्, किन्तु उदाहरणमञ्जरीपुस्तकस्या-द्याप्यनुपलब्धत्वादत्रास्माभि 'प्राकृतपैङ्गला' २(१२२) नामलक्षणानि, छन्द -सूत्र- (निर्णयसागरसस्करण) स्य अनन्तशर्मकृतटिप्पणीत उदाहरणानि समुद्धृतान्यध प्रदर्शितानि—

१	कीर्ति.	[उ इ. इ इ]	८.	बाला	[इ इ इ उ]
२.	वाणी	[इ उ इ इ]	९	आर्द्रा	[उ इ. इ उ]
३	माला	[उ उ इ. इ]	१०	भद्रा	[इ उ इ उ]
४	शाला	[इ इ उ इ]	११	प्रेमा	[उ उ इ उ]
५.	हसी	[उ इ उ इ]	१२	रामा	[इ इ उ उ]
६	माया	[उ उ उ इ]	१३	ऋद्धि	[उ इ उ उ]
७	जाया	[इ. उ उ उ]	१४	बुद्धि	[इ उ. उ उ]

१ कीर्ति –

(उ)　स मानसी मेरुसख पितॄणां,
(इ)　कन्यां कुलस्य स्थितये स्थितिज्ञ ।

(इ) मेनां मुनीनामपि माननीया
(इ) मात्मानुरूपां विधिनोपयेमे ॥

[कुमारसम्भव १।१८]

२ वाणी—

(इ) यः पूरयन् कीचकरन्ध्रभागान्
(उ) दरीमुखोत्थेन समीरणेन ।
(इ) उद्गास्यतामिच्छति किन्नराणां
(इ) तानप्रदायित्वमिवोपगन्तुम् ॥

[कुमारसम्भव १।८]

३ माला—

(उ) कपोलकण्डूः करिभिर्विनेतुं
(उ) विघट्टितानां सरलद्रुमाणाम् ।
(इ) यत्र स्रुतक्षीरतया प्रसूतः
(इ) सानूनि गन्धः सुरभीकरोति ॥

[कुमारसम्भव १।९]

४ शाला—

(इ) उद्वेजयत्यङ्गुलिपार्ष्णिभागान्
(इ) मार्गे शिलीभूतहिमेऽपि यत्र ।
(उ) न दुर्वहश्रोणिपयोधरार्ता
(इ) भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥

[कुमारसम्भव १।११]

५ हंसी [विपरीताख्यानिकी]

(उ) पदं तुषारस्रुतिधौतरक्तं
(इ) यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
(उ) विदन्ति मार्गं नखरन्ध्रमुक्तैः
(इ) मुक्ताफलैः केसरिणां किराताः ॥

[कुमारसम्भव १।६]

६ माया—

(उ) प्रसीद विश्राम्यतु वीर वज्रं
(उ) शरैर्मदीयैः कतमः सुरारिः ।
(उ) बिभेतु मोघीकृतबाहुवीर्यः
(इ) स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥

[कुमारसम्भव ३।८]

७ जाया—

(इ) मासक्रमेणाथ तयोः प्रवृत्ते
(उ) स्वरूपयोग्ये सुरतप्रसङ्गे ।

(उ) मनोरम यौवनमुद्वहन्त्या
(उ) गर्भोऽभवद् भूधरराजपत्न्या ॥

[कुमारसम्भव १।१९]

८ बाला—

(इ) य सर्वशैला परिकल्प्य वत्स,
(इ) मेरौ स्थिते दोग्धरि दोहदक्षे ।
(इ) भास्वन्ति रत्नानि महौषधीश्च,
(उ) पृथूपदिष्टा दुदुहूर्धरित्रीम् ॥

[कुमारसम्भव १।२]

९. आर्द्रा—

(उ) दिवाकराद रक्षति यो गुहासु,
(इ) लीन दिवाभीतमिवान्धकारम् ।
(इ.) क्षुद्रेऽपि नून शरण प्रपन्ने,
(उ) ममत्वमुच्चै शिरसां सतीव ॥

[कुमारसम्भव १।१२]

१० भद्रा (आख्यानिकी)—

(इ) अस्त्युत्तरस्या दिशि देवतात्मा,
(उ) हिमालयो नाम नगाधिराज ।
(इ) पूर्वापरौ तोयनिधी वगाह्य,
(उ) स्थित पृथिव्या इव मानदण्ड ॥

[कुमारसम्भव १।१]

११ प्रेमा—

(उ) अनन्तरत्नप्रभवस्य यस्य,
(उ) हिम न सौभाग्यविलोपि जातम् ।
(इ.) एको हि दोषो गुणसंनिपाते,
(उ) निमज्जतीन्दो किरणेष्विवाङ्क ॥

[कुमारसम्भव १।३]

१२ रामा—

(इ.) यश्चाप्सरोविभ्रममण्डनाना,
(इ) सम्पादयित्री शिखरैर्बिभर्ति ।
(उ) बलाहकच्छेदविभक्तरागा-
(उ) मकालसन्ध्यामिव धातुमत्ताम् ॥

[कुमारसम्भव १।४]

(इ) मेनां मुनीनामपि माननीया
(इ) मात्मानुरूपां विधिनोपयेमे ॥

[कुमारसम्भव १।१८]

२ वाणी—

(इ) यः पूरयन् कीचकरन्ध्रभागान्
(उ) दरीमुखोत्थेन समीरणेन ।
(इ) उद्गास्यतामिच्छति किन्नराणां
(इ) तानप्रदायित्वमिवोपगन्तुम् ॥

[कुमारसम्भव १।८]

३ माला—

(उ) कपोलकण्डूः करिभिर्विनेतुं
(उ) विघट्टितानां सरलद्रुमाणाम् ।
(इ) यत्र स्रुतक्षीरतया प्रसूतः
(इ) सानूनि गन्धः सुरभीकरोति ॥

[कुमारसम्भव १।९]

४ शाला—

(इ) उद्वेजयत्यङ्गुलिपार्ष्णिभागान्
(इ) मार्गे शिलीभूतहिमेऽपि यत्र ।
(उ) न दुर्वहश्रोणिपयोधरार्ता
(इ) भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥

[कुमारसम्भव १।११]

५ हंसी [विपरीताख्यानिकी]

(उ) पदं तुषारस्रुतिधौतरक्तं
(इ) यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
(उ) विदन्ति मार्गं नखरन्ध्रमुक्तै-
(इ) र्मुक्ताफलैः केसरिणां किराताः ॥

[कुमारसम्भव १।६]

६ माया—

(उ) प्रसीद विश्राम्यतु वीर वज्रं
(उ) शरैर्मदीयैः कतमः सुरारिः ।
(उ) बिभेतु मोघीकृतबाहुवीर्यः
(इ) स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥

[कुमारसम्भव ३।९]

७ जाया—

(इ) कालक्रमेणाथ तयोः प्रवृत्ते
(उ) स्वरूपयोग्ये सुरतप्रसङ्गे ।

(उ) मनोरमं यौवनमुद्वहन्त्या
(उ) गर्भोऽभवद् भूधरराजपत्न्या ॥

[कुमारसम्भव १।१९]

८ बाला—

(इ) य सर्वशैला परिकल्प्य वत्स,
(इ) मेरौ स्थिते दोग्धरि दोहदक्षे ।
(इ) भास्वन्ति रत्नानि महौषधीश्च,
(उ) पृथूपदिष्टा दुदुहुर्धरित्रीम् ॥

[कुमारसम्भव १।२]

९. आर्द्रा—

(उ) दिवाकराद रक्षति यो गुहासु,
(इ) लीन दिवाभीतमिवान्धकारम् ।
(इ) क्षुद्रेऽपि नून शरण प्रपन्ने,
(उ) ममत्वमुच्चै शिरसा सतीव ॥

[कुमारसम्भव १।१२]

१० भद्रा (आख्यानिकी)—

(इ) अस्त्युत्तरस्या दिशि देवतात्मा,
(उ) हिमालयो नाम नगाधिराज ।
(इ) पूर्वापरौ तोयनिधी वगाह्य,
(उ) स्थित पृथिव्या इव मानदण्ड ॥

[कुमारसम्भव १।१]

११ प्रेमा—

(उ) अनन्तरत्नप्रभवस्य यस्य,
(उ) हिम न सौभाग्यविलोपि जातम् ।
(इ.) एको हि दोषो गुणसनिपाते,
(उ) निमज्जतीन्दो किरणेष्विवाङ्क ॥

[कुमारसम्भव १।३]

१२. रामा—

(इ.) यश्चाप्सरोविभ्रममण्डनानां,
(इ) सम्पादयित्री शिखरैर्बिभर्ति ।
(उ) बलाहकच्छेदविभक्तरागा-
(उ) मकालसन्ध्यामिव धातुमत्ताम् ॥

[कुमारसम्भव १।४]

८३ अथ रथोद्धता

स्वर्णशङ्खवलय रसाहितं,
सुन्दर करतलेन सङ्गतम्।
पुष्पहारमथ राविनूपुरं
बिभ्रती विजयते रथोद्धता ॥ १७३ ॥

यथा–

यामिनीमधिजगाम धामत
कामिनीकुसुमनन्तसीरिणो[ ]।
मामनी कथयवाणु सगमत्
सामिनीषि सखि मन्दनन्दनम् ॥ १७४ ॥

यथा वा–

गोपिके तव सुतोऽपि नैत्वसौ
मामितामयि[1] ममापि नायक।
[2]नीतमेव नवनीतमेषय
स्येष मे कपटवेषनन्दन ॥ १७५ ॥

इति रथोद्धता ८३

८४ अथ स्वागता

हारभूषितकुचाञ्चनुबाण
भ्राजिता कुसुमकङ्कणहस्ता।

---

१ ख कामितामय। २ ख –'चोरमस्यमुषित गृहे गृहे न तमेव नवनीतमेषयत्।

---

१३ ऋद्धि—
(उ) प्रसन्नदिक्पांशुविविक्तवात
(इ) शङ्खस्वनानन्तरपुष्पवृष्टिः।
(उ) शरीरिणां स्थावरजङ्गमानां
(उ) सुखाय तज्जन्मदिनं बभूव॥
[कुमारसम्भव १।२३]

१४ बुद्धि—
(इ) यत्रांशुकाक्षेपविलज्जितानां
(उ) यदृच्छया किंपुरुषाङ्गनानाम्।
(उ) दरीगृहद्वारविलम्बिबिम्बा
(उ) स्तिरस्करिण्यो जलदा भवन्ति॥
[कुमारसम्भव १।१४]

नूपुरेण च विराजितपादा,
स्वागता भवति चेत् किमिहाऽन्यत् ॥ १७६ ॥

यथा

वल्लवीनयनपङ्कजभानु',
दानवेन्द्रकुलदावकृशानु ।
राधिकावदनचन्द्रचकोर,
सकटादवतु नन्दकिशोर. ॥ १७७ ॥

इति स्वागता*[1] ८४

८५. अथ भ्रमरविलसिता

पूर्वं मः स्यात् तदनु च भगण,
पश्चाद् यस्मिन् प्रकटितनगण ।
अन्ते लो ग कविजनसहिता,
सेय प्रोक्ता भ्रमरविलसिता ॥ १७८ ॥

यथा–

स्वान्ते चिन्ता परिहर वनिते,
नन्दादेशात् सपदि सुललिते ।
आगन्तास्मिन् हरिरिह न चिर,
कुञ्जे शय्या सफलय सुचिरम् ॥ १७९ ॥

इति भ्रमरविलसिता ८५

---

[1] टिप्पणी—१ रथोद्धता–स्वागतोपजातिवृत्तास्यास्य ग्रन्थेऽस्मिँल्लक्षणोदाहरणान्यनुल्लिखितानि, नैव च ग्रन्थान्तरेषु समुपलब्धानि, अतोऽत्र चतुर्दशभेदाना प्रस्तारगत्या निम्न-लक्षणान्येव समुद्ध्रियन्तेऽस्माभि —

१.	र	स्वा	स्वा.	स्वा	८	स्वा	स्वा	स्वा	र
२	स्वा	र	स्वा	स्वा	९	र	स्वा	स्वा	र
३.	र	र	स्वा	स्वा	१०	स्वा.	र	स्वा.	र
४	स्वा	स्वा	र	स्वा	११	र	र	स्वा	र.
५.	र	स्वा	र	स्वा	१२	स्वा	स्वा	र.	र.
६	र	र	र	स्वा	१३	र	स्वा	र	र
७.	स्वा	र	र	र	१४.	स्वा	र	र	र

अत्र 'र' कारेण रथोद्धता 'स्वा'शब्देन स्वागतेति च सबोध्या ।

८६ अथ अनुकूला

नूपुरमुक्तं कलितसुरावं
पुष्पसुहारं सरससुवक्त्रम् ।
स्पर्धिराजत्सवलयहस्ता,
स्यादनुकूला मयि किमिहाऽन्यत् ॥ १८० ॥

यथा–

गोकुलनारीवलयविहारी
गोधनधारी दितिसुतहारी ।
नन्दकुमारस्समुजितमारः
पातु सहारं सुरकुलसारः ॥ १८१ ॥

इति अनुकूला ८६

८७ अथ मोटनकम्

वन्दे वलयद्वयसवलितं
हस्तद्वितयं कलयन्तममुम् ।
गन्धोत्तमपुष्पसुहारभरं
नागस्य सदा प्रियमोटनकम् ॥ १८२ ॥

यथा–

कृष्णं कलये वनितावलये
नृत्ये सरसे ललिते सलये ।
दिव्यैः कुसुमैः कलित मुकुटे
स्तुत्य मुनिभिर्विलसितं लकुटे ॥ १८३ ॥

इति मोटनकम् ८७.

८८ अथ सुकेशी

बिभ्राणा वलयौ सुवर्णचित्रौ
संराजत्वरसत्कुलोभमानौ ।
हाराभ्यां ललितं कुचं दधाना
माधवं कुरते न क सुकेशी ॥ १८४ ॥

यथा–

गोपालं वलये विलासिनीनां
मध्यस्थं कलधौतहारिभामाम् ।

कुर्वन्त वदनेन वशराव,
यस्तासा प्रकटीचकार भास·[1] ॥ १८५ ॥

इति सुकेशी ८८

८८ अथ सुभद्रिका

अतनुरचितवाणपञ्चक,
कुसुमकलितहारसङ्गतम् ।
कुचमनुदधती च नूपुर,
मुदमिह तनुते सुभद्रिका ॥ १८६ ॥

यथा–

हृदि कलयतु कोपि वालक,
सुललितमुखलम्वितालक ।
अलिविलसितपङ्कजश्रिय,
परिकलयति य स मत्प्रियम् ॥ १८७ ॥

इति सुभद्रिका ८९.

९० अथ वकुलम्

द्विजवरगणयुगलमिति,
तदनु नगणमपि भवति ।
सुकविफणिपतिविरचित-
मनुकलयत वकुलमिति ॥ १८८ ॥

यथा–

अथय कमलनिचयमिह,
वकुलशयनमनुरचय ।
कुरु मणिहततिमिरगृह-
मिह हरिरुपसरति सखि ! ॥ १८९ ॥

इति वकुलम् ९०

अत्रापि प्रस्तारगत्या रुद्रसंख्याक्षरस्य अष्टचत्वारिंशदधिक सहस्रद्वय २०४८ भेदा भवन्ति। तत्र कियन्तोऽपि भेदा प्रोक्ता·, शेषभेदा प्रस्तार्य सूचनीया इति[2] ।*[1]

इत्येकादशाक्षरम् ।

---

१ ख भावम् । २ पंक्तिद्वय नास्ति क प्रतौ ।

*टिप्पणी—१ ग्रन्यांतरेषु समुपलभ्यमाना शेषभेदा. पञ्चमपरिशिष्टे पर्यवेक्षणीया· ।

अथ द्वादशाक्षरम्

तत्र–

११ आपीडः

अस्मिन् वेदानां सख्याका भा दृश्यन्ते
पादे वर्णाः सूर्ये सम्प्रोक्ता जायन्ते ।
आपीडाख्यं दिव्यं वृत्तं मेहि स्वान्ते
सम्प्रोक्तं नागानामीशेनवरकान्ते ! ॥ ११० ॥

यथा–

कूर्मो नित्यं मामव्यावरयन्त पीनः,
यत्पृष्ठेऽद्रिः कस्मिंश्चित्कोणे सलीनः ।
यः सर्वेषां वेदानां कार्यार्थं जातः
स्त्रैलोक्ये नानारत्नादाता विख्यातः ॥ १११ ॥

इति आपीडः ११

अयमेवान्यत्र विद्याधरः*¹ ।

१२ अथ भुजङ्गप्रयातम्

ध्रुवं पूर्वमन्ते भवेद् यत्र कर्णः
रवेः सख्यया यत्र पादेऽस्ति वर्णः ।
तकारत्रयं यत्र मध्ये सुयुक्तं
भुजङ्गप्रयातं तदा भाति वृत्तम् ॥ ११२ ॥

यथा–

चलत्कुन्तलं केलिलोलाङ्गुलाग्रं
सदा बल्लवीलालितं नन्दबालम् ।
कपोलोल्लसत्कुण्डलालङ्कृताऽऽस्यं
विलोलामलस्रग्धराभं नमामि ॥ ११३ ॥

इति भुजङ्गप्रयातम् १२

१३ अथ लक्ष्मीधरम्

भानुसंख्यामितैरक्षरैर्भासितं
वेदसङ्ख्यैस्तथा पत्तिभिः शोभितम् ।
सर्वनागाधिराजेन संभाषितं
तद्धि लक्ष्मीधरं मानसे शोभितम् ॥ ११४ ॥

---

*टिप्पणी—१ प्राकृतपैङ्गलम्, परि० २ पद्य ११९ एवं वाणीभूषणम् द्वि प १२६

यथा–

वेणुनादेन समोहयन् गोकुले,
वल्लवीमानस रासकेली व्यधात् ।
य सदा योगिभिर्वन्दितस्त तदा[1],
गोपिकानायक गोकुलेन्द्र भजे ॥ १९५ ॥

इति लक्ष्मीधरम् ९३.

इदमेवान्यत्र स्रग्विणी* इति नामान्तर लभते ।

९४ अथ तोटकम्

यदि वै लघुयुग्मगुरुक्रमत
रविसम्मितवर्ण इह प्रमित. ।
अहिभूपतिना फणिना भणित,
सखि तोटकवृत्तमिद गणितम् ॥ १९६ ॥

यथा–

अलिमालितमालतिभिर्ललित,
ललितादिनितम्बवतीकलितम् ।
कलितापहर कलवेणुकल,
कलये नलिनामलपादतलम् ॥ १९७ ॥

इति तोटकम् ९४

९५. अथ सारङ्गकम्

जायेत हारद्वयेनाथ शङ्खेन,
यद्वै क्रमात् सूर्यसख्यातवर्णेन ।
सारङ्गक तत्तु सारङ्गनेत्रेण,
सभाषित सर्वनागाधिराजेन ॥ १९८ ॥

यथा–

श्रीनन्दसूनो कथ धृष्ट गोपाल,
गोपीषु धाष्ट्र्यं विधत्से महामाल ।
आस्थाय बाले सहाय सुखस्थस्य,
भीतिर्न ते कसतो गोकुलस्य ॥ १९९ ॥

इति सारङ्गकम् ९५

---

१ ख. हृदा ।

*टिप्पणी—छन्दोमञ्जरी, द्वि० स्त० का० ७१, एव वृत्तरत्नाकर द्वि० अ० ।

१६ अथ मौक्तिकदाम

पयोनिधिभूपतिमन्त्र विधेहि,
सरांशुविराजितवर्णमवेहि ।
फणीन्द्रविकासितसुन्दरनाम,
सुधा परिभावय मौक्तिकदाम ॥ २०० ॥

यथा–

स्वबाहुबलेन विनाशितकंस
कपोलविलोलसमामलतंस ।
समस्तमुनीश्वरमानसहंस
सदा जय भासितयादववंश ॥ २०१ ॥

इति मौक्तिकदाम १६

१७ अथ मोदकम्

वेदविभाविसम परिभावय
भानुविभासितवर्णमिहानय ।
भामिनि ! पिङ्गलनागसुभाषित
मोदकवृत्तमितीह निभालय ॥ २०२ ॥

यथा–

नन्दकुमार विचारगुणाकर
गोपवधूमुखकंजदिवाकर ।
मधुवचन हितमाशु निशामय,
कुञ्जगृहं ननु याहि[1] निशामय ॥ २०३ ॥

इति मोदकम् १७

१८ अथ सुन्दरी

कुसुमस्मरसेन समाहिता
ध्वनितनूपुररावविहारिणी ।
कुचयुगोपरिहारविराजिता
हरति कस्य मनो न हि सुन्दरी ॥ २०४ ॥

यथा–

उदयदर्कदिवाकरकर्कर
ध्वनितवर्तुलबालविलोचकम् ।

---

१ ख माचि । २ ख यदुरं ।

सकलदिग्रचित विहगारवै,
　　स रुतमातनुते विधिभिक्षुक ॥ २०५ ॥

यथा वा, 'वाणीभूषणे'*[1]–

असुलभा शरदिन्दुमुखीप्रिया,
　　मनसि कामविचेष्टितमीदृशम् ।
मलयमारुतचालितमालती-
　　परिमलप्रसरो हृतवासर ॥ २०६ ॥

इति सुन्दरी ९८.

९९ अथ प्रमिताक्षरा

सुसुगन्धपुष्पकृतहारकुचा[1],
　　सरसेन शखरचितेन यथा ।
वलयेन शोभितकरा कुरुते,
　　प्रमिताक्षरा रसिकचित्तमुदम् ॥ २०७ ॥

यथा–

हरपर्वत इ(ए)व वभुर्गिरय,
　　पतगास्तथा जगति हसनिभा ।
यमुनापि देवतटिनीव वभौ,
　　हिमभाससा जगति सवलिते ॥ २०८ ॥

यथा वा, भूषणे'*[2]–

अभजद् भयादिव नभो वसुधा,
　　दधुरेकतामिव समेत्य दिश ।
अभवन् महीपदयुगप्रमिता,
　　तिमिरावलीकवलिते जगति ॥ २०९ ॥

इति प्रमिताक्षरा ९९

१०० अथ चन्द्रवर्त्म

पक्षिराजमथन कुरु चरणे,
　　स विधेहि भगण सुखकरणे ।
हस्तमत्र कुरु पिङ्गलकथित,
　　चन्द्रवर्त्म कविभिर्हृदि मथितम् ॥ २१० ॥

---

१ क रुचा ।

*टिप्पणी—१ वाणीभूषणम्-द्वितीय अध्याय, पद्य २५२
　　„　　२　　„　　„　　२५४

यथा वा, छन्दोमञ्जर्याम्[1]*–

तरणिजापुलिने नवपल्लवी-
परिषदा सह केलिकुतूहलात् ।
द्रुतविलम्बितचारुविहारिणं,
हरिमहं हृदयेन सदा वहे ॥ २१६ ॥

इत्यादि रघुवंशमहाकाव्यादिषु च सहस्रशो निदर्शनानि ।

इति द्रुतविलम्बितम् १०१.

१०२. अथ वंशस्थविला

पयोधरं हारयुगेन सङ्गतं,
करं तथा पुष्पसुकङ्कणान्वितम् ।
सुरावयुक्तं दधती च नूपुरं,
विभाति वंशस्थविला सखे! पुरः ॥ २१७ ॥

यथा–

विलोलमौलिं तरलावतंसकं,
व्रजाङ्गनामानसलोभकारकम् ।
करस्थवंशं परिवीतबालकं,
हरिं भजे गोकुलगोपनायकम् ॥ २१८ ॥

इति वंशस्थविला १०२

नपुंसकमिदमन्यत्र*[2] । वंशस्तनितमिति क्वचित् ।

१०३ अथ इन्द्रवंशा

कर्णं सुरूपं धृतकुण्डलद्वयं,
पुष्पं सुगन्धं दधती च नूपुरम् ।
वक्षोजसंभूषितहारशोभिनी,
स्यादिन्द्रवंशा हृदि मोददायिनी ॥ २१९ ॥

यथा–

कूर्मं श(स)मव्यान् मम यं पयोनिधौ,
पृष्ठे महापर्वतघोरघर्षणात् ।

*टिप्पणी—१ छन्दोमञ्जरी, द्वितीय स्तवक, कारिकायां ७४ उदाहरणम् ।
२ 'वदन्ति वंशस्थविलं जतौ जरौ' छन्दोमंजरी द्वि० स्त० का० ६६

कन्दु[1]विनोदेन सुखातिसम्भ्रमान्,
निद्रां जगामासन्नसमीपितेक्षणा ॥ २२० ॥

यथा वा–

कम्पायमाना सखि ! सर्वतो दिशः,
धर्म्यां दधाना भवनीरवावलिः ।
कम्पायित सविदधाति मानस,
मां पाहि मन्दस्य सुखं समानय ॥ २२१ ॥

इति इन्द्रवंशा १३ ।

१४ अथ वंशस्थोपजातयः

यदीन्द्रवंशाचरणेन सङ्गता[2]
पादोऽपि वंशस्थबिलस्य जायते ।
भेदास्तदा स्युः सुरराजसङ्ख्यकाः
नागोदितास्त्वप्युपजातिसंज्ञकाः ॥ २२२ ॥

इति वंशस्थबिलेन्द्रवंशोपजातिः* ।

अनयोरप्येकत्र प्रथमाक्षरं लघु अपरत्र च प्रथमाक्षरं गुरुरिति स्वल्पभेदत्वाच्चतुर्दशोपजातिभेदाः पूर्ववदेव प्रस्ताररचनया भवन्ति । तथा चात्र सर्वत्र स्वल्पभेदाच्छन्दोभ्यामुपजातयो भवन्तीति ज्ञापित इति दिक् ।

---

१ ख. कुन्दविनोदेन । २ क. सङ्गता ।

*टिप्पणी—१ क ख प्रत्योः वंशस्थबिलेन्द्रवंशोपजातेरुदाहरणं न विद्यते ।

*टिप्पणी—२ ग्रन्थकारेण वंशस्थबिलेन्द्रवंशोपजातेः तस्य चतुर्दशभेदाः स्वीकृताः पर तत्र भेदानां नामोदाहरणादिभिः प्रतिपादनं नैव कृतम् । अतोऽत्रास्माभिश्छन्दःप्रभाकरेण तन्नामानि तदुदाहरणानि प्रस्तूयन्ते ।

१	वैरासिकी	[व इ इ इ]	८	वासन्तिका	[इ इ इ व]
२	रताख्यानिकी	[इ व इ इ]	९	मन्दहासा	[व इ इ व]
३	इन्दुमा	[व व इ इ]	१०	शिशिरा	[इ व इ व]
४	पुष्टिदा	[इ इ व इ]	११	वैधात्री	[व व इ व]
५	उपमेया	[व इ व इ]	१२	शङ्खचूडा	[इ इ व व]
६	सौरभेयी	[इ व व इ]	१३	रमणा	[व इ व व]
७	शीलातुरा	[व व व इ]	१४	कुमारी	[इ व व व]

१ वैरासिकी—

व महाचमूनामधिपा समन्तत,
इ सनह्य सद्य. सुतरामुदायुधा. ।
इ. तस्थुर्विनम्रक्षितिपालसङ्कुले,
इ तस्याङ्गणद्वारि बहि प्रकोष्ठके ।।

[कुमारसम्भव १५।६]

२ रतात्यानिकी—

इ. पद्मै रनन्वीतवधूमुखद्युतो,
व गता न हसै श्रियमातपत्रजाम् ।
इ दूरेऽभवन् भोजबलस्य गच्छत,
इ शैलोपमातीतगजस्य निम्नगा ।।

[शिशुपालवधम् १२।६१]

३ इन्दुमा—

व चमूप्रभु मन्मथमर्दनात्मज,
व विजित्वरीभिर्विजयश्रियाश्रितम् ।
इ श्रुत्वा सुराणा पृतनाभिरागत,
इ चित्ते चिर चुक्षुभिरे महासुरा ।।

[कुमारसम्भव १५।२]

४ पुष्टिदा—

इ श्रुत्वेति वाच वियतो गरीयसी,
इ. क्रोधादहङ्कारपरो महासुर ।
व प्रकम्पिताशेषजगत्त्रयोऽपि स-
इ प्राकम्पतोच्चैर्दिवमभ्यधाच्च स ।

[कुमारसम्भव १५।३९]

५ उपमेया [रामणीयकम्]—

व. नितान्तमुत्तुङ्गतुरङ्गहेषितै-
इ रुद्दामदानद्विपबृंहितै शतै ।
व चलद्ध्वजस्यन्दननेमिनि स्वनै-
इ श्चाभून्निरुच्छ्वासमथाकुल नभ ।

[कुमारसम्भव १४।४१]

६ सौरभेयी—

इ सङ्गेन वो गर्भतपस्विन शिशु
व. वराक एषोऽन्तमवाप्स्यति ध्रुवम् ।
व अतस्करस्तस्करसङ्गतो यथो,
इ तद्वो निहन्मि प्रथम ततोप्यमुम ।

[कुमारसम्भव १५।४२]

१०५ अथ जलोद्धतगति:

अवेहि जगण ततोऽपि सगण,
　　विधेहि जगण पुनश्च सगणम् ।
फणीन्द्रकथिता जलोद्धतगति,
　　चकास्ति हृदये कृतातिसुमति: ॥ २२३ ॥

यथा–

नवीननलिनोपमाननयन,
　　पयोदरुचिर पयोधिशयनम् ।
नमामि कमलासुसेवितहरिं,
　　सदा निजहृदा भवाम्बुवितरिम् ॥ २२४ ॥

इति जलोद्धतगति: १०५

१०६ अथ वैश्वदेवी

कर्णा जायन्ते यत्र पूर्व नियुक्ता,
　　वह्लेस्सख्याका य-द्वयेन प्रयुक्ता ।
वाणार्णैश्छिन्ना वाजिभिश्चापि भिन्ना,
　　नागेनोक्ता सा वैश्वदेवी विभाति ॥ २२५ ॥

यथा-

वन्दे गोविन्द वारिधौ राजमान,
　　श्रीलक्ष्मीकान्त नागतल्पे शयानम् ।
अत्यन्त पीत वस्त्रयुग्म दधान,
　　पार्श्वे तिष्ठत्या पद्मया सेव्यमानम् ॥ २२६ ॥

इति वैश्वदेवी १०६.

---

१३ रमणा—

व　　वली वलारातिवलाऽतिशातन,
इ　　दिग्दन्तिनादद्रवनाशनस्वनम् ।
व　　महीधराम्भोधिनवारितक्रम,
व　　ययौ रथ घोरमथाधिरुह्य स ॥
　　　　[कुमारसम्भव१५।८]

१४ कुमारी—

इ　　किं भ्रूथ रे व्योमचरा महासुरा,
व　　स्मरारिसूनुप्रतिपक्षवर्तिन ।
व　　मदीयवाणव्रणवेदना हि सा-
व　　ऽधुना कथ विस्मृतिगोचरीकृता ।
　　　　[कुमारसम्भव १५।४०]

१७ अथ मन्दाकिनी

इह यदि नगणद्वय आमते
तदनु च रगणद्वय दीयते ।
फणिपमुखसुमेरुमन्दाकिनी
प्रभवति हि सदैव मन्दाकिनी ॥ २२७ ॥

यथा–

सखि ! मम पुरतो मुरारेः कथां
कुरु न कुरु तथा वृथाऽन्यां कथाम् ।
यदि मधुरिपुरेति वृन्दावनं
कलय मम तदा शरीरावनम् ॥ २२८ ॥

इति मन्दाकिनी १७

क्वचिदियमेव प्रभेति*[1] नामान्तरं लभते । 'सह शरधि निज तथा कार्मुकम्' इत्यादि किराते*[2] । यथा वा–'अतिसुरभिरभाजि पुष्पश्रिया' इति माघेऽपि ।*[3]

१८ अथ कुसुमविचित्रा

विरचय विप्र तदनु च कर्णं
पुनरपि तद्वत् कुरु रविवर्णम् ।
श्रुतिमितपादे विमलचरित्रा
परमपवित्रा कुसुमविचित्रा ॥ २२९ ॥

---

*टिप्पणी–१ वृत्तरत्नाकर अ ३ का १५

*टिप्पणी–२ सह शरधि निजस्तथा कार्मुकं
वपुरतनु तथैव संवर्मितम् ।
निहितमपि तथैव पश्यन्नसिं
वृषभगतिरुपाययौ विस्मयम् ॥
[किरातार्जुनीयम् स १८ प १५]

टिप्पणी–३ अतिसुरभिरभाजि पुष्पश्रिया
मतनुतरतयेव सन्तानकः ।
तरुणपरभृतः स्वनं रागिणा
मतनुत रतये वसन्तानकः ॥
[शिशुपालवधम् स ६ प [illegible]]

यथा–

भययुतचित्तो विगतविलम्ब,
कथमपि यातो हरितकदम्बम् ।
तरणिसुतायास्तटभुवि कृष्ण,
स जयति गोपीवसनसतृष्णः ॥ २३० ॥

इति कुसुमविचित्रा १०८.

१०६ अथ तामरसम्

सरससुरूपसुगन्धसशोभ,
कुचयुगसङ्गमसवृत[1]लोभम् ।
रसयुतहारयुगाहितमुक्त,
कलयत तामरस वरवृत्तम् ॥ २३१ ॥

यथा –

विलसति मालतिपुष्पविकास,
न हि हरिदर्शनतो वनवासः ।
सखि ! नवकेतकिकण्टककर्ष,
वनकलितोनुतनूरुहहर्ष ॥ २३२ ॥

इति तामरसम् १०६

११० अथ मालती

कलय नकारमतोपि नायकौ,
तदनु विधारय पक्षिणा पतिम् ।
फणिपतिपिङ्गलनागभाषिता,
कविहृदि राजति मालती मता ॥ २३३ ॥

यथा–

कलयति[2] चेतसि नन्ददारक,
सकलवधूजनचित्त[3]हारकम् ।
निखिलविमोहकवेणुधारक,
दितिसुतसङ्घविनाशकारकम् ॥ २३४ ॥

इति मालती ११०

---

१ ख सभृतम् । २ ख कलयत । ३ ख चीरहारकम् ।

कुत्रचिद् इयमेव यमुना इति नामान्तर समते । 'अयि विजहीहि दृढोपगूहनम्' इत्युदाहरणान्तर मारविस्थिरम्[1]* ।

१११ अथ मणिमाला

आदौ विदधाना हारौ वरमेकं
मुक्ता रसवद्भ्यां सम्पूरकाभ्याम् ।
कर्णे रसपुष्पोद्यत्कुण्डलयुग्मा
छिन्ना रसयुक्तैर्वर्णैर्मणिमाला ॥ २३५ ॥

यथा–

गौरीकृतदेह ध्यानावधिमाल
नृत्ये विधुनान कीर्ति पुरकासम् ।
लोलानलकासे [1] सम्पूजितभासं
कामं शरणं त्वं सम्प्राप्य शिवासम् ॥ २३६ ॥

इति मणिमाला १११

११२ अथ जलधरमाला

यस्यामादौ पञ्चविरतौ वा कर्णा
पश्चात्प्रोक्ता दिनकरसंख्यावर्णा ।
मध्ये विप्रौ जलनिधिपादैर्विच्छिन्ना
नागप्रोक्ता जलधरमाला भिन्ना ॥ २३७ ॥

यथा–

शीर्ते पुष्परमिनवदाभ्यां धृत्वा
ताम्यच्चित्ता मलयजमूर्ति धृत्वा ।
वदास्यीठे तव सुचिरं ध्यायन्ती
तिष्ठन्त्येषा शठविधिवेष पश्यन्ती ॥ २३८ ॥

इति जलधरमाला ११२

---

१ ख कोर्ण ।

टिप्पणी—१ अयि विजहीहि दृढोपगूहनं
त्यज नवसङ्गमभीरु ! वल्लभम् ।
अरुणकरोद्गम एष वर्तते
वरतनु ! संप्रवदन्ति कुक्कुटाः ॥

यद्यपिदं वृत्तमौक्तिककारेण यमुनानाम्नोदाहृतं न भाति कोटं किन्तु वसन्त-
तिलकानुसारेण तु मात्रानुसारेण सिद्ध्यति । अतोऽस्माभिः योजितम् ।

११३ अथ प्रियंवदा

कुसुमसङ्गतकरा रसाहिता,
विमलगन्धकुचहारभूषिता ।
सरुतनूपुरसुशोभिता सदा,
जयति चेतसि सखे ! प्रियंवदा ॥ २३९ ॥

यथा–

व्रजवधूजनमनोविमोहनं,
सरसकेलिषु कलानिकेतनम् ।
सरसचन्दनविलेपचर्चितं,
कलय चेतसि हरिं सदार्चितम् ॥ २४० ॥

इति प्रियंवदा ११३.

११४ अथ ललिता

हारद्वयाञ्चितकुचेन भूषिता,
हस्तस्थितोज्ज्वलसुपुष्पकङ्कणा ।
पादे विरावयुतनूपुराञ्चिता,
चित्ते चकास्ति ललिता विलासिनी ॥ २४१ ॥

यथा–

गोपीषु केलिरससक्तचेतसं,
सूर्यात्मजा विलुलितातिवेतसम् ।
चित्तावमोहकरवेणुधारकं,
वन्दे सदा ललितनन्ददारकम् ॥ २४२ ॥

इति ललिता ११४.

इयमेव अन्यत्र सुललिता इति गणभेदेन उक्तम् । अतएव 'तो भो जरौ सुललिता श्रुतौ यतिः ।' इति वृत्तसारे सयतिं लक्षणं लक्षितमिति ।

११५ अथ ललितम्

धेहि भकारं तदनु च तगणं,
धारय न वा तदनु च सगणम् ।
बाणविरामं फणिपतिकलितं,
चेतसि वृत्तं कलयत ललितम् ॥ २४३ ॥

१२८ अथ प्रमुदितवदना

सरसकविजनाहिता भाविता,
　　भवति सुकविपिङ्गलेनोदिता ।
सकलरसिकचित्तहृद्या तदा,
　　प्रमुदितवदना तु नौ रौ यदा ॥ २४९ ॥

यथा–

कलय सखि ! विराजि वृन्दावनं,
　　सहचरि ! कुरु मे शरीरावनम् ।
यदि कथमपि मानसे भावये,
　　यदुकुलतिलक तदैवानये ॥ २५० ॥

इति प्रमुदितवदना ११८

इयमेव अन्यत्र प्रभा*[1] ।

११९ अथ नवमालिनी

सखि ! नवमालिनी रसविरामा,
　　ननु कलयालि पूर्वयतियुक्ताम् ।
नजभयकारभावितपदाढ्या,
　　फणिपतिनागपिङ्गलविभक्ताम् ॥ २५१ ॥

यथा–

इह कलयालि ! नन्दसुतबाल,
　　नवघनकान्तिनिर्जिततमालम् ।
सरसविलासरासकृतमाल,
　　मुनिवरयोगिमानसमरालम् ॥ २५२ ॥

इति नवमालिनी ११९

१२० अथ तरलनयनम्

जलधि-नगणमिह रचयत,
　　रविमित लघुमिह कलयत ।
सुकविफणिपतिरिति वदति,
　　तरलनयनमिति हि भवति ॥ २५३ ॥

---

*टिप्पणी—१ वृत्तरत्नाकर अ० ३, का० ६५

यथा–

तव कुसुमनिमहसितमयि,
गततनुमनुकमयति मयि ।
इति हि सखि ! हरिरनुवदति
परिकमय दुखमयि सुवति ! ॥ २५४ ॥

इति तरलनयनम् १२

अत्र प्रस्तारगत्या द्वादशाक्षरस्य पण्णवत्यधिक सहस्रचतुष्टयं ४०९६ भेदा भवन्ति तेषु कियन्त प्रदर्शिता शेषभेदा सुधीभि प्रस्तार्य सूचनीया इति¹ ।'

इति द्वादशाक्षरम्।

अथ त्रयोदशाक्षरम

तत्र–

१२१ वाराह

यस्मिन् पादे दृश्यन्ते समुक्ता षट्कर्णा
सूर्यागामेकेनाप्राणो सस्याका वर्णा ।
कर्णस्यान्ते यस्मिन् संप्रोक्तश्चैको हारः
सोऽयं नागोक्तो वाराहो वृत्तानां सार ॥ २५५ ॥

यथा–

कल्पान्तप्रोद्यद्वारां राशौ दृष्ट्वा मग्नं
य क्षोणीपृष्ठं दंष्ट्राग्रे कृत्वा समग्रम् ।
हत्वा दैत्यं दुष्यन्त सिन्धोर्मध्यादागात्
कुर्यात् कामं² सोऽयं सर्वेषां रक्षां वेगात् ॥ २५६ ॥

इति वाराह १२१

१२२ अथ माया

हारौ हृत्वा स्वर्णसुमेरद्वयमुक्तौ
प्रत्येकं हस्तौ चमराभ्यामपि सक्तौ ।
मिथ्याचित्तस्यस्य दधाना³चरवर्णं
माया सर्वेषां हृदये राजति तूर्णं ॥ २५७ ॥

---

१ ख प्रतौ – वलितुर्य नास्ति । २ ख कोल । ३ ख दधानां चरवम् ।
४ ख तूर्णम् ।

*टिप्पणी–१ तम्मध्येऽन्तु शाष्टपेपभेदाः पञ्चममविदिनप्रसोचनीया ।

एतस्या एवान्यत्र श्रुति. नवयतिनहित मगण - तगण - यगण-सगण-गुरुयुत मत्तमयूरमिति गणान्तरेण नामान्तरमुक्तम् । तथा च छन्दोमञ्जर्याम् [द्वितीयस्तवके का ९७] 'वेदै रन्ध्रैम्तौ यसगा मत्तमयूरम् ।' इति लक्षणात् ।
यथा–

वन्दे गोप गोपवधूभि कृतरास,
हस्ते वश रावि दधान वरहासम् ।
नव्ये कुञ्जे सविदधान नवकेलि,
लोलाक्ष राधामुखपद्माकरहेलिम् ॥ २५८ ॥

इति माया १२२

यथा वा,

अस्मद्वृद्धप्रपितामहश्रीरामचन्द्रभट्टविरचित कृष्णकुतूहले महाकाव्ये रासवर्णनप्रस्तावे—

रासक्रीडासक्तवचस्कायमनस्का,
सस्कारातिप्रापितनाट्यादिविशेषा ।
वृन्दारण्य तालतलोद्घट्टनवाचा-
मत्यासगाच्चक्रुरिमा मत्तमयूरम् ॥ २५९ ॥

यथा वा, छन्दोमञ्जर्याम् [द्वितीयस्तवके का० ९७]

लीलानृत्यन्मत्तमयूरध्वनिकान्त,
चञ्चन्नीपामोदिपयोदानिलरम्यम् ।
कामक्रीडाहृष्टमना गोपवधूभि,
कसध्वसी निर्जनवृन्दावनमाप ॥ २६० ॥

'गौरीमम्बामम्बुरुहाक्षीमहमीडे,*१ त ससारध्वान्तविनाश हरिमीडे*२'

---

*टिप्पणी—१ 'लीलारब्धस्थापितलुप्ताखिललोका
लोकातीतैर्योगिभिरन्तश्चिरमृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ १ ॥
[शङ्कराचार्यकृतगौरीदशकस्तोत्र प० १]

*टिप्पणी—२ स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं
यस्मिन्नेतत् ससृतिचक्र भ्रमतीत्यम् ।
यस्मिन् दृष्टे नश्यति तत्ससृतिचक्र,
त ससारध्वान्तविनाश हरिमीडे ॥ १ ॥
[शङ्कराचार्यकृतहरिमीडे स्तोत्र प०-१]

यथा–

विलोलद्विरेफावलीना विरावेण,
हिमाशो कराणा च सङ्गेन दावेण ।
वपुर्मे सदा दाहित शीतयस्वालि,
पुरो दर्शयित्वा वपुर्मालतीमालि ॥ २६५ ॥

इति कन्दम् १२४

१२५ अथ पङ्कावलि

भ कुरु तदनु नकारमिहानय,
धेहि जमथ जगण परिभावय ।
शखमिह तदनु भामिनि मानय,
पङ्कसुपरिकलितावलिमानय ॥ २६६ ॥

यथा–

कोमलसुललितमालति[1]मालिनि,
पङ्कजपरिमलसलुलितालिनि ।
कोकिलकलकल[2]कूजितशालिनि,
राजति हरिरिह वञ्जुलजालिनि ॥ २६७ ॥

इति पङ्कावलि १२५

१२६ अथ प्रहर्षिणी

कर्णाभ्या सुललितकुण्डल दधाना,
शखाभ्यामतिसुरसा कुचाढ्यहारा ।
विश्राम ननु रवनूपुरस्य युग्मे,
बिभ्राणा सखि ! जयति प्रहर्षिणीयम् ॥ २६८ ॥

यथा–

यद्दन्ते विलसति भूमिमण्डल त-
न्मालिन्यश्रियमुपयातमुज्ज्वलाभे ।
देवेन्द्रैरभिकलित. स्तवप्रयोगै-
रस्माक वितरतु श स कोलदेह ॥ २६९ ॥

यथा वा,

अस्मद्वृद्धप्रपितामह-महाकविपण्डितश्रीरामचन्द्रभट्टविरचिते कृष्णकुतूहले महाकाव्ये श्रीभगवदाविर्भाववर्णनप्रस्तावे––

---

१ ख. कुन्दकुसुमालिनि । २ ख कोकिलनवकल ।

सत्य सद्वसु वसुववदेवकीभ्यां
रोहिण्यामुडुनि नभस्य कृष्णपक्षे ।
पजन्ये क्टति निशीथनीरवायां
मष्टम्यां निगमरहस्यमाविरासीत् ॥ २७० ॥

इति प्रहर्षिणी १२६

१२७ अथ रुचिरा

पयोधरे कुसुमितहारभूषिता
सुपुष्पिणी सरसविरावनूपुरा ।
रसान्विता सकनकरावकङ्कणा,
चतुमति सखि ! रुचिरा विराजते ॥ २७१ ॥

यथा–

कमापिम निजवयिताविहारिणं
पयोधर सखि ! कलये विराविणम् ।
हरिं विना मम सकल विषायितं
हरे पुन सकलमिद सुधायितम् ॥ २७२ ॥

इति रुचिरा १२७

१२८. अथ चण्डी

कलय मधुमिह धारय हस्त
तदमु च विरचय सं किल दास्तम् ।
चरणविरतियुतभासुरहारा
त्रिजगति चरसमि राजति चण्डी ॥ २७३ ॥

यथा–

गगनचरणयुतपुरगोभा
बहुविधविरचितमामसलोभा ।
हरिगमवनमनुगमानि राधा
गनि मनसिजहतमाममबाधा ॥ २७४ ॥

इति चण्डी १२८.

१२६ अथ मञ्जुभाषिणी

करसङ्गिपुष्पयुतकङ्कणान्विता,
रसरूपरावमितनूपुराञ्चिता ।
कुचशोभमानवरहारधारिणी,
कुरुते मुद मनसि मञ्जुभाषिणी ॥ २७५ ॥

यथा–

जनितेन मित्रविरहेण दु खिता,
मिलितु तथैव वनिता हरेर्हरित् ।
विधुबिम्बचित्तभवयन्त्रपूजन,
कुसुमैस्तनोति नवतारकामयै. ॥ २७६ ॥

इति मञ्जुभाषिणी १२६

सुनन्दिनी इत्यन्यत्र । अन्यत्रेति शम्भौ । क्वचिदियमेव प्रबोधिता च'* ।

१३० अथ चन्द्रिका

कुरु नगणयुग धेहि पादे ततः,
तगणयुगलक गोऽपि चान्ते तत ।
चरणमनु तथा कामवर्णान्विता ,
हयरसविरतिश्चन्द्रिका पूजिता ॥ २७७ ॥

यथा[1]–

कलयत हृदये शैलसधारक,
मुनिजनमहित देवकीदारकम् ।
व्रजजनवनिता-दु खसन्तारक,
जलधररुचिर दैत्यसहारकम् ॥ २७८ ॥

इति चन्द्रिका १३०

यथा वा–

'इह दुरधिगमै किञ्चिदेवागमै ।' इत्यादि किरातार्जुनीये*[2] । क्वचिदियमेव उत्पलिनी इति प्रसिद्धा ।

---

१ ख यथा उदाहरण नास्ति ।

*टिप्पणी—१ छन्दोमञ्जरी, द्वितीयस्तबक, कारिका ६६ एव १०२ ।

*टिप्पणी—२　'इह दुरधिगमै किञ्चिदेवागमै
सततमसुतर वर्णयत्यन्तरम् ॥
अमुमतिविपिन वेददिग्व्यापिन
पुरुषमिव पर पद्मयोनि परम् ॥
[किरातार्जुनीयम् स० ५, प० १८]

१११ अथ कलहंस

सगण विधेहि जगण च सुयुक्त
सगणद्वय कुरु पुन फणिवित्तम् ।
गुरुमन्तगं कुरु तथा हृतचित्त
कलहंसनामकमिदं वरवृत्तम् ॥ २७९ ॥

यथा–

नवनीतचोरममलद्युतिशोभ
व्रजसुन्दरीवदनपङ्कजलोभम् ।
नीलताविलापवनिताकुलरासं
कलये हरिं निजहृदा वरहासम् ॥ २८० ॥

इति कलहंसः १११

कुत्रचिदयमेव सिंहनाद इति क्वचिच्च कुटजाख्यमिति ।

११२ अथ मृगेन्द्रमुखम्

कुरु नगण तदनन्तरं नरेन्द्र
तदनु च जं कुरु पदिणामधेयम् ।
तदनु विधारय नूपुर पदान्ते
रचय मृगेन्द्रमुखं मुरोम कान्ते ! ॥ २८१ ॥

यथा–

कुमुदवनीषु सखे ! विपुलवश्य
कमलवनस्य सदा हृतातिगम्य ।
विधुरुदितो ययसाकृतातिमोद
प्रविरलमीषु च हसकोकशोक ॥ २८२ ॥

इति मृगेन्द्रमुखम् ११२

११३ अथ ललना

द्विजवरगणगौ धेहि ललने
भगणमथ तथा गणिनामभिधेयम् ।
मुनिरसविरति राजमानितेयं
फणिपतिनिगदिता राजति ललनम् ॥ २८३ ॥

यथा–

ललना हृदये मन्मोहगुरु
चकितनिनयन व्यवहाराभिमानुम् ।

शशधरवदन राधिकारसाल,
सरसिजनयन पङ्कजालिमालम् ॥ २८४ ॥

इति क्षमा १३३.

इयमेव क्वचिद् गणान्तरेणापि क्षमैव[1]* भवति ।

१३४ अथ लता

कलय नगण विधेहि तत कर,
जगणयुगल च देहि तत परम् ।
चरणविरतौ गुरु कुरु सम्मता,
रसकृतयतिर्मुदा विहिता लता ॥ २८५ ॥

यथा–

कलय हृदये मुदा व्रजनायक,
ललितमुकुट सदा सुखदायकम् ।
युवतिसहित व्रजेन्द्रसुत हरिं,
कनकवसन भवाम्बुनिधेस्तरिम् ॥ २८६ ॥

इति लता १३४

१३५ अथ चन्द्रलेखम्

कुरु न-सगणौ पक्षिराज च युक्त,
रचय रगण कामवर्णैरमुक्तम् ।
तदनु च पुन कुण्डल धेहि शेष,
कलय फणिना भाषित चन्द्रलेखम् ॥२८७॥

यथा–

नमत सतत नन्दगोपस्य सूनु,
फणिप-दमन दानवोलूकभानुम् ।
कमलवदन राधिकाया रसाल,
तरलनयन पङ्कजालीसुमालम् ॥ २८८ ॥

इति चन्द्रलेखम् १३५

चन्द्रलेखा[2]* इत्यन्यत्र ।

---

*टिप्पणी—१ वृत्तरत्नाकरस्य (अ० ३ का० ७५) नारायणीटीकायां 'इय क्षमैव आचार्यो मतभेदेन सज्ञान्तरार्थं पुनरूचे' ।

*टिप्पणी—२ छन्दोमञ्जरी, द्वितीयस्तवक, कारिका १०५

११६ अथ सुद्युतिः

कुरु न-सगणौ पादे तकारौ तथा
कमय वसम स्यु: कामवर्णा यथा ।
रसपरिमितैर्वर्णैस्तथा स्याद् यति
फणिपकथिता सद्योमते सुद्युति ॥ २८९ ॥

यथा–

मदनवसितैर्मु क्तायुता सद्वया
मृसितसमिता सोल्लाससत्साक्षिया ।
सखि हरिगृहाद् याति प्रगे राधिका
सकलसुदृशां नित्य मनोवामिका ॥ २९० ॥

इति सुद्युति ११६

११७ अथ लक्ष्मी

वर्णे विराजितरसकुम्भसान्विता
गन्धाढ्यपुष्पयुतकरेण शोभिता ।
वक्षोरुहे च विमलहारशोभिनी
लक्ष्मी सदा फलतु ममातुल फलम् ॥ २९१ ॥

यथा–

वन्दे हरिं फणिपतिभोगशायिनं
सर्वेश्वरं सकलजनेष्टदायिनम् ।
पीताम्बरं मणिमुकुटातिभासुरं,
गो-गोपिकानिकरवृत हतासुरम् ॥ २९२ ॥

इति लक्ष्मी ११७

११८. अथ विमलमतिः

जगविमित नगणमिह कलय
तदनु च नगि लगुमिह रचय ।
यतिरतिगुणमितमिति भवति
विलसु यति विमलगति गुरति ! ॥ २९३ ॥

यथा–

अभिनवसजलजलदविमल,
निजजनविहतसकलशमल[1] ।
कमलसुललितनयनयुगल,
जय ! जय ! सुरनुतपदकमल ॥ २९४ ॥

इति विमलगति १३८

[2]अत्रापि प्रस्तारगत्या त्रयोदशाक्षरस्य द्विनवत्युत्तर शतमष्टौ सहस्राणि च ८१९२ भेदा भवन्ति, तेषु कतिचन भेदा समुदाहृता, शेषभेदा सुधीभि प्रस्तार्य समुदाहरणीया इत्यल पल्लवेन ।*

इति त्रयोदशाक्षरम् ।

अथ चतुर्दशाक्षरम्

तत्र–

१३९. सिंहास्य

यस्मिन्निन्द्रै सख्याता राजन्ते युक्ता वर्णा,
पादे सूर्याश्वै सख्याका सशोभन्ते कर्णा ।
नागानामीशेनैतत् प्रोक्त सिंहास्य कान्ते !
भूपालाना चित्तानन्दस्थान धेहि स्वान्ते ॥ २९५ ॥

यथा–

यो दैत्यानामिन्द्र वक्षस्पीठे हस्तस्याग्रै-
र्भिद्यद् ब्रह्माण्ड व्याकुर्योच्चैर्व्यामृद्नादुग्रै ।
दत्तालीकान्युन्मिश्र निर्यद्विद्युद्वृद्धास्य-
स्तूर्णं सोऽस्माक रक्षा कुर्याद्घोर(वीर)सिंहास्य ॥ २९६ ॥

इति सिंहास्य १३९

१४०. अथ वसन्ततिलका

हारद्वय स्फुरदुरोजयुत दधाना,
हस्त च गन्धकुसुमोज्ज्वलकङ्कणाढ्यम् ।
पादे तथा सरुतनूपुरयुग्मयुक्ता,
चित्ते वसन्ततिलका किल चाकसीति ॥ २९७ ॥

---

१ ख समल । २. पङ्क्तित्रय नास्ति क प्रतौ ।

* टिप्पणी– ग्रन्थान्तरेषु समुपलब्धशेषभेदा पञ्चमपरिशिष्टे पर्यवेक्षणीया ।

११६ अथ सुद्युति

कुरु म-सगणौ पादे तकारौ तथा,
कलय वलयं स्युः कामवर्णा यथा ।
रसपरिमितैर्वर्णैस्तथा स्याद् यति
फणिपकथिता सद्योमते सुद्युतिः ॥ २८९ ॥

यथा–

मदनकलितैर्भ्रूर्मुग्धा सत्रपा
मृगितसमिता लोलासक्ताश्रिया ।
सखि हरिगृहाद् याति प्रगे राधिका
सकलसुवृषा नित्यं मनोबाधिका ॥ २९० ॥

इति सुद्युतिः ११६

११७ अथ लक्ष्मी

कर्णे विराजितरसकुम्भसान्विता
गन्धाढ्यपुष्पयुतकरेण शोभिता ।
वक्षोरुहे च विमलहारशोभिनी,
लक्ष्मी सदा फलतु ममातुलं फलम् ॥ २९१ ॥

यथा–

वन्दे हरिं फणिपतिभोगशायिनं
सर्वेश्वरं सकलजनेष्टदायिनम् ।
पीताम्बरं मणिमुकुटादिभासुरं,
गो-गोपिकानिकरवृतं हतासुरम् ॥ २९२ ॥

इति लक्ष्मी. ११७

११८. अथ विमलगतिः

असधिमित नगणमिह कलय
तदनु च सरिर लघुमिह रचय ।
फणिपतिगुरुभितमिति भवति
विरम्रु यति विमलगति सुद्युति ! ॥ २९३ ॥

यथा–

अभिनवसजलजलदविमल,
निजजनविहतसकलशमल[1] ।
कमलसुललितनयनयुगल,
जय ! जय ! सुरनुतपदकमल ॥ २९४ ॥

इति विमलगति १३८

[2]अत्रापि प्रस्तारगत्या त्रयोदशाक्षरस्य द्विनवत्युत्तर शतमष्टौ सहस्राणि च ८१९२ भेदा भवन्ति, तेषु कतिचन भेदा समुदाहृता, शेषभेदा सुधीभि प्रस्तार्य समुदाहरणीया इत्यल पल्लवेन ।*

इति त्रयोदशाक्षरम् ।

अथ चतुर्दशाक्षरम्

तत्र–

१३९. सिंहास्य

यस्मिन्निन्द्रै सख्याता राजन्ते युक्ता वर्णा,
पादे सूर्यश्वै सख्याका सशोभन्ते कर्णा ।
नागानामीशेनैतत् प्रोक्त सिंहास्य कान्ते !
भूपालाना चित्तानन्दस्थान धेहि स्वान्ते ॥ २९५ ॥

यथा–

यो दैत्यानामिन्द्र वक्षस्पीठे हस्तस्याग्रै-
भिद्यद् ब्रह्माण्ड व्याक्रुश्योच्चैर्व्यामृद्नादुग्रै ।
दत्तालीकान्युन्मिश्र निर्यद्विद्युद्वृद्धास्य-
स्तूर्णं सोऽस्माक रक्षा कुर्याद्घोर(वीर)सिंहास्य ॥ २९६ ॥

इति सिंहास्य १३९

१४० अथ वसन्ततिलका

हारद्वय स्फुरदुरोजयुत दधाना,
हस्त च गन्धकुसुमोज्ज्वलकङ्कणाढ्यम् ।
पादे तथा सरुतनूपुरयुग्मयुक्ता,
चित्ते वसन्ततिलका किल चाकसीति ॥ २९७ ॥

---

१ ख समल । २ पङ्क्तित्रय नास्ति क प्रतौ ।

* टिप्पणी– ग्रन्थान्तरेषु समुपलब्धशेषभेदा पञ्चमपरिशिष्टे पर्यवेक्षणीया ।

हस्ताग्रे राजद्विरचितवलयद्वन्द्वा,
स्तुत्या सम्प्रोक्ता वरकविभिरसम्बाधा ॥ ३०३ ॥

यथा -

वन्दे गोपाल व्रजजनतरुणीधीर,
रासक्रीडायामभिगतयमुनातीरम् ।
देवाना वन्द्य हृतवरवनिताचीर,
बाले सयुक्त दितिसुतदलने वीरम् ॥ ३०४ ॥

इति असम्बाधा १४२

१४३ अथ अपराजिता

द्विजपरिकलिता करेण विराजिता,
कुचयुगकलिता प्रलम्बितहारिणी ।
भुवननिगदितातिशोभितवर्णिनो,
कृतमुनिविरतिर्जयत्यपराजिता ॥ ३०५ ॥

यथा—

अतिरुचिदशनैः सभातमसा हर,
दितिसुतरुधिरैं सुरक्तनखाङ्कुर ।
जलभृदुडुगणौ सटाभिरुपाहरत्[1],
जयति हरितनुर्भटानपि सहरत्[2] ॥ ३०६ ॥

इति अपराजिता १४३.

१४४ अथ प्रहरणकलिका

रचयत नगणद्वयमथ भगण,
लघुगुरुसहित कलयत नगणम् ।
प्रहरणकलिका मुनियतिसहिता,
फणिपतिकथिता कविजनमहिता ॥ ३०७ ॥

यथा —

नम मधुमथन जलनिधिशयन,
सुरगणनमित सरसिजनयनम् ।
इति गदनमतिर्भवति हृदि यदा,
भवजलनिधि[त]स्तरति सखि ! तदा ॥ ३०८ ॥

---

१ ख उपाहरन् । २ ख. सहरन् ।

यथा वा कल्पकुतूहले—

व्रजयुवतिभिरियमिमतवचसि
प्रतिपदममृतद्रवमिव विकिरति ।
मनसिजविशिखप्रपतनविधुत
स्वविरहदहनप्रशमनमकसि[1] ॥ ३०९ ॥

इति मधुरमकलिका १४४

१४५ अथ वासन्ती

कर्णौ कृत्वा कुण्डलसहितौ गन्धं पुष्पं
हस्ते धृत्वा कङ्कणमथ हारं राजन्तम् ।
स्वर्णेनाढ्यं नूपुरमथ धृत्वा राजन्ती
नागप्रोक्ता राजति कविचित्ते वासन्ती ॥ ३१० ॥

यथा—

वन्दे गोपीमन्मथजनकं कंसारातिं
भूमेः कार्यार्थं नृषु कृतमिथ्याविख्यातिम् ।
रासे वंशीवादननिपुणं कुञ्जे कुञ्जे
लीलालोलं गोकुलमदनारीणां पुञ्जे ॥ ३११ ॥

इति वासन्ती १४५

१४६ अथ लोला

कर्णे कुण्डलयुक्ता हस्तं स्वर्णसनाथं
बिभ्राणा वलयाढ्यं हारौ चोज्ज्वलपुष्पौ ।
सम्यक् च दधाना दिव्यं नूपुरयुग्मं
नागोक्ता कविचित्ते कान्ता राजति लोला ॥ ३१२ ।

यथा—

गोपालं कलयेऽहं नित्यं नन्दकिशोरं
वृन्दारण्यनिवासं गोपीमानसचौरम्[2] ।
वंशीवादनसक्तं नव्ये कुञ्जकुटीरे
नारीभिः कृतरासं कालिन्दीवरतीरे ॥ ३१३ ॥

इति लोला १४६

---

१ क अकसि । २ क चोरं ।

१४७ अथ नान्दीमुखी

द्विजपरिकलिता हस्तयुक् कङ्कणाढ्या,
विरुतविलसितौ नूपुरौ धारयन्ती ।
रसकनकयुत हारमुच्चैर्दधाना,
स्वरविरतियुता भाति नान्दीमुखीयम् ॥ ३१४ ॥

यथा–

नखगलदसृजा पानतो भीषणास्यः
सुरनृपतिमुखैर्देवसघैरुपास्य ।
भयजनकरवैर्नादयद्दिङ्मुखानि,
प्रकटयतु स व सिंहवक्त्र सुखानि ॥ ३१५ ॥

इति नान्दीमुखी १४७,

१४८ अथ वैदर्भी

कर्णे कृत्वा कनकसुललित ताटङ्क,
सविभ्राणा द्विजमथ वलय हस्ताग्रे ।
दिव्य हारद्वितयमथ दधाना युक्त
वेदैश्छिन्ना जगति विजयते वैदर्भी ॥ ३१६ ॥

यथा–

वन्दे नित्य नरमृगपतिदेह व्यग्र,
दैत्येशोर स्थलदलनविधावत्युग्रम् ।
प्रह्लादस्याभिलषितवरद सृक्काग्रे,
सलिह्यन्त रुधिरविलुलित जिह्वाग्रम् ॥ ३१७ ॥

इति वैदर्भी १४८

१४९. अथ इन्दुवदनम्

धेहि भगण तदनु धारय जकार,
हस्तमथ कारय ततोऽपि च नकारम् ।
हारयुगल तदनु देहि चरणान्ते,
नागकृतमिन्दुवदन भवति कान्ते ! ॥ ३१८ ॥

यथा–

नौमि वनितावितरासरसयुक्त,
गोकुलवधूजनमनोहरणसक्तम् ।

देवपतियर्वहरसम्बनसुवक्ष,
मूमिवभये निहतदैत्यगणलक्षम् ॥ ३१९ ॥

इति इमुखनम् १४९

स्पोमिसक्रमन्यम* ।

१२ अथ शरभी

कर्णं स्वर्णोज्ज्वलमभिततटङ्कयुक्त
सविप्राणा द्विजमय रुत नूपुराढयम् ।
हारं पुष्पं यमययुगल धारयन्ती
वेदच्छिन्ना जयति शरभी पिङ्गलोक्ता ॥ १२० ॥

यथा–

वन्दे कृष्णं नवजलधरस्यामलाङ्गं
वृन्दारण्ये व्रजयुवतिभिर्जातसङ्गम् ।
कालिन्दीये सरसपुलिने क्रीडमानं
कालीयाहे प्रथितयशसो धूतमानम् ॥ ३२१ ॥

इति शरभी १२

१२१ अथ अहिधृति

रचय मयुगलं कुरु ततो भगणं,
लघुगुरुसहित कुरु तथा जगणम् ।
मुनिविरतियुता फणिनृपस्य कृति
जगति विजयते सुविमलाऽहिधृति ॥ १२२ ॥*

यथा–

सकलतनुभृतां जनमपेयतरं
विगतवि[प]भयं रचमितु कृपया ।
पतति तरुवराम्बिरसि नन्दसुते
भुजगभरसहा विजयतेऽहिधृति ॥ १२३ ॥*

इति अहिधृति १२१

१२२ अथ विमला

रचय म भूपती कुरु तथा भगणं
लघुयसयान्वितं च विरतौ जगणम् ।

ब. सबमार्ग ; २ पूर्व पद नास्ति क प्रती ।
*टिप्पणी—१ वृत्तरत्नाकर अ १ का ८२

फणिपतिभाषिता रविहयैर्विरति-
वेरकविमानसेऽतिविमला जयति ॥ ३२४ ॥

यथा–

व्रजजननागरीदधिहृतावतुला,
तरणिसुतातटे हरितनुर्विमला[1] ।
वरवनितादृशा सुसुकृतैककला,
मम विमले सदा भवतु हृद्यचला ॥ ३२५ ॥

इति विमला १५२

१५३. अथ मल्लिका

कुरु गन्वयुग्मसहित मृगाधिपतिं,
रचयाशु सन्ततमथो नरावपि सम् ।
इह मल्लिका कलयता विलासवती,
नवपञ्चकैर्यतियुता मुदो[2] जननीम् ॥ ३२६ ॥

यथा–

सखि ! नन्दसूनुरिह मे मनोहरण,
जनताप्रसादसुमुखस्तमोहरण ।
भविता सहायकरणो जनानुगत,
करवै कमत्र शरण वने सुखत ॥ ३२७ ॥

इति मल्लिका १५३

१५४ अथ मणिगणम्

जलधिमित नगणमिह कलयत,
तदनु च लघुयुगमपि रचयत ।
सकलफणिनृपतिविरचितमिति,
निजहृदि कलयत मणिगणमिति ॥ ३२८ ॥

यथा–

भुजयुगलविलसितफणिवलय,
कृतसकलदितिसुतकुलविलय ।
प्रलयसमयभयजनक सलय[3],
वृषगमनमपि सुखमनुकलय ॥ ३२९ ॥

इति मणिगणम् १५४

---

१ पद्यस्य पूर्वार्द्ध भाग नास्ति ख. प्रतौ । २ ख मुदा । ३ ख जनसकलय ।

देवपतिसमूहरक्षणकृतसुदक्ष
भूमिवलये मिहतदैत्यगणसक्षम् ॥ ३१९ ॥

इति इन्दुवदनम् १४९

स्त्रोतिक्रमन्यत्र* ।

१५　अथ शरभी

कर्णं स्वर्णोज्ज्वलसमितघाटद्भुयुक्त
सविभ्राणा द्विसमय रस नूपुरावयम् ।
हारं पुष्पं बलमयुगलं धारयन्ती
वेदैश्छिन्ना जयति शरभी पिङ्गमोक्ता ॥ ३२० ॥

यथा–

वन्दे कृष्णं नवजलधरश्यामलाङ्ग
वृन्दारण्ये व्रजयुवतिभिर्जातसङ्गम् ।
कालिन्दीये सरसपुलिने क्रीडमानं
कालीयाहे प्रथितयशसो मूतमानम् ॥ ३२१ ॥

इति शरभी १५

१५१ अथ अहिधृति

रचय मयुगलं कुरु ततो नगण
लघुगुरुसहितं कुरु तथा भगणम् ।
मुनिविरतियुता फणिनृपस्य कृतिः,
जगति विजयते सुविमलाऽहिधृति ॥ ३२२ ॥[१]

यथा–

सकलतनुभृतां अभयमेयतर
विगतवि[ध]मर्म रचयितु कृपया ।
पतति तरुवराब्धिरपि मन्वमुते
भुजमरसहा विजयतेऽहिधृति ॥ ३२३ ॥*

इति अहिधृति १५१

१५२ अथ विमला

रचय स-भूपती कुरु तथा ममर्प
भ्रमुकमयाचितं च विरतौ जगणम् ।

---

* श्लवमार्ग । २ पूर्व पद नास्ति क प्रतौ ।
टिप्पणी—१ वृत्तरत्नाकर: अ ३ श्लो ८१

यथा–

अयममृतमरीचिर्दिग्वधूकर्णपूर
सपदि परिविधातु कोऽपि कामीव कान्त ।
सरस इव नभस्तोऽस्य·तविस्तारयुक्ता·
दुडुगणकुमुदानि प्रोच्चकैरुच्चिनोति ॥ ३३३ ॥

यथा वा, पाण्डवचरिते—

भवनमिव ततस्ते वाणजालैर्कुर्वन्,
गजरथहयपृष्ठे वाहुयुद्धे च दक्षा ।
विधृतनिशितखड्गाश्चर्मणा भासमाना,
विदधुरथ समाजे मण्डलात् सव्यवामात् ॥ ३३४ ॥

यथा वा, अस्मत्पितामहमहाकविपण्डितश्रीरायभट्टकृते शृङ्गारकल्लोले खण्डकाव्ये—

मन इव रमणीना रागिणी वारुणीय,
हृदयमिव युवानस्तस्करा स्व हरन्ति ।
भवनमिव मदीय नाथ शून्यो हि देश-
स्तव न गमनमीहे पान्थ कामाभिरामा ॥ ३३५ ॥

यथा वा, कृष्णकुतूहले—

निरवधिदिनमाना य विना गोपवध्व-
स्तमभिकमभिसाय वीक्षमाणा ननन्दु ।
स्मितमधुरमपाङ्गालोकन प्रीतिवल्या,
कुसुममिव तदीय वीक्ष्य कृष्णोप्यतुष्यत् ॥ ३३६ ॥

इति मालिनी १५६

१५७ अथ चामरम्

पक्षिराजभूपतिक्रमेण यद् विराजते,
वाणभूमिसख्ययाक्षर च यत्र भासते ।
नागराजभाषित तदेव चारुचामर,
मानसे विधेहि पाठतोऽपि मोहितामरम् ॥ ३३७ ॥

यथा–

नौमि गोपकामिनीमनोविनोदकारण,
लीलयावधूतकसराजमत्तवारणम् ।
कालियाहिमस्तकोल्लसन्मणिप्रकाशित,
नन्दनन्दन सदैव योगिचित्तभासितम् ॥ ३३८ ॥

'अत्रापि प्रस्तारगत्या चतुर्दशाक्षरस्य चतुरशीत्यधिकानि त्रिशतानि षोडश-सहस्राणि च भेदास्तेषु कियन्तो भेदा प्रदर्शिता शेषभेदा सुधीभिराकरव स्वमत्या वा प्रस्तार्य समूहनीया इति दिक् *।

इति चतुर्दशाक्षरम् ।

अथ पञ्चदशाक्षरम्

तत्र प्रथमम्–

१२५ लीलाखेलः

यस्मिन् वृत्ते रव्यस्वै सस्याता दृश्यन्ते कर्णाः
पादे पादे तिथ्या सम्प्रोक्ताः संशोभन्ते वर्णाः ।
हारस्येकोऽन्ते यस्मिन्नागानामीशेन प्रोक्तं,
लोके वृत्तानां सारं लीलाखेलाख्यं तद्वृत्तम् ॥ १० ॥

यथा

देवैर्वन्द्य त्रैलोक्यास्थानं देहं सर्वीकुर्वन्
दैत्यानामीशं भूम्यां क्वात¹ पातालस्थं कुर्वन् ।
स्वाराज्यं देवेशा यात्स्यस्त स्वर्याऽप सयच्छन्
मामव्याद् गोविन्दो वैरोच्यानाशी²'पद्य गर्जन् ॥ ३३१ ॥

इति लीलाखेलः १२५

यथा वा –

'मा कान्ते पक्षस्यान्ते पर्याकाशे देशेस्वाप्सी इति ज्योतिषिकाणां कालपरिमाणपर उदाहरणमिति कण्ठाभरणे* । लीलाखेलस्य एतस्यैवाग्यम सारङ्गिका'* इति नामान्तरमुक्तम् ।

१२६ अथ मालिनी

द्विजकरवलयाढ्या नूपुरारावयुक्ता
श्रवणरचितपुष्पप्रोतताटङ्कयुग्मा ।
वसुरचितविरामा सर्वलोकैकवर्णा
फणिपनृपतिकान्ता भासते मालिनीयम् ॥ ३३२ ॥

---

१ पंक्तिरयं नास्ति क प्रतौ । २ ख क्वातः । ३ ख वैरोचन्याशीः

*टिप्पणी—१ ग्रन्थान्तरेषु प्राप्तशेषभेदा पञ्चमपरिशिष्टे पर्यालोच्याः ।

*टिप्पणी–२ मा कान्ते । पक्षस्यान्ते पर्याकाशे देशे स्वाप्सी
कान्ते वकन भूत पूर्वं चन्द्र मत्वा रात्री देव् ।
भुत्साम भाटस्येतस्येतो राहु कूट ग्रासात्
तस्माद्धस्तान्ते हर्म्यस्यान्ते पर्यंकान्ते कर्तव्या ॥
[कण्ठाभरण]

*टिप्पणी–३ प्राकृतपैङ्गलम्-द्वितीयपरिच्छेद पद्य १२६ ।

यथा–

अयममृतमरीचिर्दिग्वधूकर्णपूर
सपदि परिविधातु कोऽपि कामीव कान्त ।
सरस इव नभस्तोऽत्यन्तविस्तारयुक्ता-
दुडुगणकुमुदानि प्रोच्चकैरुच्चिनोति ॥ ३३३ ॥

यथा वा, पाण्डवचरिते—

भवनमिव ततस्ते वाणजालैरकुर्वन्,
गजरथहयपृष्ठे वाहुयुद्धे च दक्षा ।
विघृतनिशितखड्गाश्चर्मणा भासमाना,
विदधुरथ समाजे मण्डलात् सव्यवामात् ॥ ३३४ ॥

यथा वा, अस्मत्पितामहमहाकविपण्डितश्रीरायभट्टकृते शृङ्गारकल्लोले खण्डकाव्ये—

मन इव रमणीना रागिणी वारुणीय,
हृदयमिव युवानस्तस्करा स्व हरन्ति ।
भवनमिव मदीय नाथ शून्यो हि देश-
स्तव न गमनमीहे पान्थ कामाभिरामा ॥ ३३५ ॥

यथा वा, कृष्णकुतूहले—

निरवधिदिनमाना य विना गोपवध्व-
स्तमभिकमभिसाय वीक्षमाणा ननन्दु ।
स्मितमधुरमपाङ्गालोकन प्रीतिवल्या,
कुसुममिव तदीय वीक्ष्य कृष्णोप्यतुष्यत् ॥ ३३६ ॥

इति मालिनी १५६

१५७ अथ चामरम्

पक्षिराजभूपतिक्रमेण यद् विराजते,
वाणभूमिसख्ययाक्षर च यत्र भासते ।
नागराजभाषित तदेव चारुचामर,
मानसे विधेहि पाठतोऽपि मोहितामरम् ॥ ३३८ ॥

यथा–

नौमि गोपकामिनीमनोविनोदकारण,
लीलयावधूतकसराजमत्तवारणम् ।
कालियाहिमस्तकोल्लसन्मणिप्रकाशित,
नन्दनन्दन सदैव योगिचित्तभासितम् ॥ ३३८ ॥

यथा वा भूषणे[1]*—

रासलास्यगोपकामिनीजनेन खेलता
पुष्पपुञ्जमञ्जुकुञ्जमध्यगेन दोमता ।
तामनूत्यशालिगोपबालिकाविलासिना
माधवेन नामतो सुखाय मन्दहासिना ॥ १३९ ॥

इति चामरम् १२७

एतस्यैव ग्रन्थान्तरे तूणक *[2] इति नामान्तरम् ।

१२८ अथ भ्रमरावलिका

चरणे विनिधेहि सकारमिहपमितं,
कुरु वर्णमपीपुमिताकरसम्मितम् ।
फणिनायकपिङ्गलचित्तमुदं कलिका
सखि ! भाति कवीन्द्रमुखे भ्रमरावलिका ॥ १४० ॥

यथा—

कलकोकिलकूजितपूजितमु(ल)वनं
मलयाचलशीतसरोजवनीपवनम् ।
हिमदीधितिकान्तिपयःपरिधौतमिव
जगदाशु विलोक्य[1] परित्यज मानमिदम् ॥ १४१ ॥

यथा वा भूषणे[3]—

सखि ! सम्प्रति कं प्रति मौनमिदं विहित
मदनेन धनुः सशरं स्वकरे निहितम् ।
मतिशालिनि का वनमालिनि मानकथा
रतिनायकसायकदुःखमुपैषि[2] वृथा ॥ १४२ ॥

इति भ्रमरावलिका १२८

भ्रमरावलीति पिङ्गले *

१ ख जगदाशुमिति लोक्य । २ 'मुपैति' वाणीभूषणे ।

*टिप्पणी—१ वाणीभूषणम् द्वितीयाध्याय प २९९
२ छन्दोमञ्जरी द्वितीयस्तबक कारिका ११७
३ वाणीभूषणम् द्वितीयाध्याय पद्य २९९
४ प्राकृतपैङ्गलम् द्वितीयपरिच्छेद प १२४

१५९. अथ मनोहंसः

प्रथम विधेहि कर जकारविराजित,
जगण ततो भगणेन कारय भूषितम् ।
विनिधेहि पक्षिपतिं ततस्तिथिजाक्षर,
कुरु हंसमेणविलोचने मनस परम् ॥ ३४३ ॥

यथा–

तनुजाग्निना सखि ! मानस मम दह्यते,
तनुसन्धिरुष्णगदारुवत् परिभिद्यते ।
अधर च शुष्यति वारिमुक्तसुशालिवत्,
कुरु मद्गृह कृपया सदा वनमालिमत् ॥ ३४४ ॥

यथा वा–

नवमञ्जुवञ्जुलकुञ्जकूजितकोकिले,
मधुमत्तचञ्चलचञ्चरीककुलाकुले ।
समयेतिधीरसमीरकम्पितमानसे,
किमु चण्डि मानमनोरथे न विखिद्यसे ॥ ३४५ ॥

इति मनोहंस १५९

१६० अथ शरभम्

जलनिधिकृतमिह विरचय नगण ,
चरणविरतिमनुविरचय सगणम् ।
वरफणिपतिविरचितमतिरुचिर ,
शरभमखिलहृदि विलसति सुचिरम् ॥ ३४६ ॥

यथा–

नभसि समुदयति सखि ! हिमकिरण ,
वहति सुलघुलघुमलयजपवनम् ।
त्यजति तिमिरमिदमपि(भि) जननयन ,
द्रुतमनुविरचय मधुरिपुशयनम् ॥ ३४७ ॥

इति शरभम् १६०

इदमेवान्यत्र शशिकला*[1] इति नामान्तरेण उक्तम् ।
अथ मणिगुणनिकरस्रजौ छन्दसी, किञ्च—
इदमेव हि यदि वसुयति ८ मणिगुणनिकराख्यमीर्यते हि तदा ।
यदि तु रसे ६ विश्राम स्रगिति समाख्या तदा लभते ॥ ३४८ ॥

---

*टिप्पणी—१ छन्दोमञ्जरी द्वितीयस्तवक, कारिका १३१

यथा वा भूषणे[1]–

रासलास्यगोपकामिनीजनेन सेवता
पुष्पपुञ्जमञ्जुकुञ्जमध्यगेन दोव्यता ।
तामनृत्यशालिगोपबालिकाविलासिना
माधवेन जायते सुखाय मन्दहासिना ॥ १३९ ॥

इति चामरम् ११७.

एतस्यैव प्रयत्न तूणक[2] इति नामान्तरम् ।

११८ अथ भ्रमरावलिका

चरणे विनिधेहि सकारमिपूपमितं,
कुरु वर्णमपीपुमिथाकरसंप्रमितम् ।
फणिनायकपिङ्गलभाषितमुख कलिका
सखि ! भाति कवीन्द्रमुखे भ्रमरावलिका ॥ १४० ॥

यथा–

कलकोकिलकूजितपूजितमू (त्न) वनं
मनबाञ्छितवीमसरोजवनीपवनम् ।
हिमदीधितिकान्तिपयःपरिलोभितमिदं
धगदाशु विलोक्य[1] परित्यज मानमिदम् ॥ १४१ ॥

यथा वा भूषणे[3]–

सखि ! सम्प्रति क प्रति मौनमिदं विहितं
मदमेव धनु सधर स्वकरे मिहितम् ।
नतिशालिनि का वनमालिनि मानकथा
रतिनामकसायकदुःखमुपैपि[2] वृथा ॥ १४२ ॥

इति भ्रमरावलिका ११८.

भ्रमरावलीति पिङ्गले[4]

---

१ ख. जगदाशुवि लोक्य । २ 'मुपैति' वाणीभूषणे ।

*टिप्पणी—१ वाणीभूषणम्, द्वितीयाध्याय प १६९
२ छन्दोमञ्जरी द्वितीयस्तबक कारिका १३७
३ वाणीभूषणम्, द्वितीयाध्याय पद्य १६६
४ प्राकृतपैङ्गलम् द्वितीयपरिच्छेद प १६४

१५९. अथ मनोहंसः

प्रथम विधेहि कर जकारविराजित,
जगण ततो भगणेन कारय भूषितम् ।
विनिधेहि पक्षिपति ततस्तिथिजाक्षर,
कुरु हंसमेणविलोचने मनस परम् ॥ ३४३ ॥

यथा–

तनुजाग्निना सखि ! मानस मम दह्यते,
तनुसन्धिरुण्णगदारुवत् परिभिद्यते ।
अधर च शुष्यति वारिमुक्तसुशालिवत्,
कुरु मद्गृह कृपया सदा वनमालिमत् ॥ ३४४ ॥

यथा वा–

नवमञ्जुवञ्जुलकुञ्जकूजितकोकिले,
मधुमत्तचञ्चलचञ्चरीककुलाकुले ।
समयेतिधीरसमीरकम्पितमानसे,
किमु चण्डि मानमनोरथे न विखिद्यसे ॥ ३४५ ॥

इति मनोहंस १५९

१६० अथ शरभम्

जलनिधिकृतमिह विरचय नगण ,
चरणविरतिमनुविरचय सगणम् ।
वरफणिपतिविरचितमतिरुचिर ,
शरभमखिलहृदि विलसति सुचिरम् ॥ ३४६ ॥

यथा–

नभसि समुदयति सखि ! हिमकिरणं ,
वहति सुलघुलघुमलयजपवनम् ।
त्यजति तिमिरमिदमपि(भि) जननयन ,
द्रुतमनुविरचय मधुरिपुशयनम् ॥ ३४७ ॥

इति शरभम् १६०

इदमेवान्यत्र शशिकला*[1] इति नामान्तरेण उक्तम् ।
अथ मणिगुणनिकरस्रजो छन्दसी, किञ्च—
इदमेव हि यदि वसुयति ८ मणिगुणनिकराख्यमीर्यते हि तदा ।
यदि तु रसे ६ विश्राम स्रगिति समाख्या तदा लभते ॥ ३४८ ॥

---

*टिप्पणी—१ छन्दोमञ्जरी द्वितीयस्तवक, कारिका १३१

अपि च

मणिगुणनिकरोदाहृतिरिह शरभोदाहृती ज्ञेया ।
स्रगुदाहरणं ज्ञेयम् लक्षणवाक्यं तु शरभस्य ॥ १४९ ॥

यथा वा–

नरकरिपुरवतु निखिलसुरगति
रमितमहिममरसहजनिवसति[1] ।
अनवधिमणिगुणनिकरपरिचित
सरिदधिपतिरिव धृततनुविभव ॥ १५० ॥
अयि ! सहचरि ! रुचिरतरगुणमयी
प्रविमलवसतिरनपगतपरिमला ।
स्रगिव निवसति ललयमुपमरसा ,
सुमुखि ! मुदितजनुजदसमहृदये ॥ १५१ ॥

इति छन्दोमञ्जर्यामुदाहरणत्रयं* यतिभेदेनोक्तम् । प्रकृते तु शरभमेव इति न कश्चिद् विशेष ।

१५१ अथ निशिपालकम्

*भेहि भगणं तदनु भूपतिमथो कर -
देहि भगण च रगणं कुरु ततः परम् ।
नागनृपपिङ्गलसुभाषितमुदीरितं
वृत्तमभलं हृदि निधेहि निशिपालकम् ॥ १५२ ॥

यथा–

गोपतरुणीजनमनोहरणपण्डितं
हस्तयुगधारितसुवेणुपरिमण्डितम् ।
चन्द्रकविराजितविलोलमुकुट मुदा
नौमि हरिमर्कतनयातटगतं सदा ॥ १५३ ॥

यथा वा भूषणे[2] –

चन्द्रमुखि ! जीवमुखि (पि) ! याति मलयानिले
याति मम चित्तमिव याति मदनानिले ।

---

१ क. ललितमिह भुवि । २ नाइ 'वाणीभूषणे' ।

*टिप्पणी—१ छन्दोमञ्जरी द्वितीयस्तबक कारिका १११ ११२
२ वाणीभूषणम् द्वितीयाध्याय पद्य १२६

तापकर-कामशर-शल्यवरकीलित[1],
मामिह हि पश्य जहि कोपमतिशीलितम्[2] ॥ ३५४ ॥

इति निशिपालकम् १६१.

१६२. अथ विपिनतिलकम्

रचय नगण तदनु धेहि हस्त मुदा,
नगणसहित रगणयुग्ममन्ते सदा ।
रसनवयति फणिपभाषित सुन्दर
विपिनतिलक कलय वाणविध्वक्षरम् ॥ ३५५ ॥

यथा–

नरवरपतेरिव नरा. शशाङ्काशवः,
तिमिरनिकर. सपदि चोरवद् गच्छति ।
अयमपि रवि सखि ! हृताधिकारिप्रभ,
कथयति विधो खगकुल जय वदिवत् ॥ ३५६ ॥

यथा वा–

जयति करुणानिधिरशेषसत्तारक,
कलितललितादिवनितामनोहारक ।
सकलधरणीपकुलमण्डलीपालकः,
परमपदवीकरणदेवकीबालक ॥ ३५७ ॥

इति विपिनतिलकम् १६२

१६३. अथ चन्द्रलेखा

कर्णे ताटङ्कयुग्म पुष्पाढ्यहारौ दधाना,
बिभ्राणा नूपुरस्य द्वन्द्व सुराव सुचित्तम् ।
पादान्ते धारयन्ती वीणा सुवर्णावियुक्ता,
नागोक्ता चन्द्रलेखा सप्ताष्टछेदैरमुक्ता ॥ ३५८ ॥

यथा–

नित्य वन्दे महेश गौरीशरीरार्द्धयुक्तं,
दग्धाऽनङ्ग पुरारिं वेतालसङ्घैरमुक्तम् ।
बिभ्राण चन्द्रलेखा नृत्येषु कृत्ति धुनान,
गङ्गासञ्जातसङ्ग दृष्ट्या त्रिलोकी पुनानम् ॥ ३५९ ॥

इति चन्द्रलेखा १६४.

चण्डलेखा इत्यन्यत्र ।

---

१ तल्पभरशीलितम्, 'वाणीभूषणे' । २. शेषमतिसञ्चितम् 'वाणीभूषणे' ।

तापकर-कामशर-शल्यवरकीलित[1],
मामिह हि पश्य जहि कोपमतिशीलितम्[2] ॥ ३५४ ॥

इति निशिपालकम् १६१.

१६२. अथ विपिनतिलकम्

रचय नगण तदनु धेहि हस्त मुदा,
नगणसहित रगणयुग्ममन्ते सदा ।
रसनवयति फणिपभाषित सुन्दर
विपिनतिलक कलय बाणविध्वक्षरम् ॥ ३५५ ॥

यथा–

नरवरपतेरिव नरा शशाङ्काशवः,
तिमिरनिकर सपदि चोरवद् गच्छति ।
अयमपि रवि सखि ! हृताधिकारिप्रभ,
कथयति विधो खगकुल जय बदिवत् ॥ ३५६ ॥

यथा वा–

जयति करुणानिधिरशेषसत्तारक,
कलितललितादिवनितामनोहारक ।
सकलधरणीपकुलमण्डलीपालकः,
परमपदवीकरणदेवकीबालक ॥ ३५७ ॥

इति विपिनतिलकम् १६२

१६३ अथ चन्द्रलेखा

कर्णे ताटङ्कयुग्म पुष्पाढ्यहारौ दधाना,
बिभ्राणा नूपुरस्य द्वन्द्व सुराव सुचित्तम् ।
पादान्ते धारयन्ती वीणा सुवर्णावियुक्ता,
नागोक्ता चन्द्रलेखा सप्ताष्टछेदैरमुक्ता ॥ ३५८ ॥

यथा–

नित्य वन्दे महेश गौरीशरीरार्द्धयुक्त,
दग्धाऽनङ्ग पुरारिं वेतालसङ्घैरमुक्तम् ।
बिभ्राण चन्द्रलेखा नृत्येषु कृत्ति धुनान,
गङ्गासञ्जातसङ्ग दृष्ट्या त्रिलोकी पुनानम् ॥ ३५९ ॥

इति चन्द्रलेखा १६४

चण्डलेखा इत्यन्यत्र ।

---

१ तल्पभरशीलितम्, 'वाणीभूषणे' । २. शेषमतिसञ्चितम् 'वाणीभूषणे' ।

१६४ अथ चित्रा

कर्णद्वन्द्वं ताटङ्काभ्यां योजितं कारयित्वा
हारौ बिभ्राणा स्वर्णाढ्यं पुष्पयुक्तं तथैव ।
विम्युक्तर्वर्णं संयुक्ता कङ्कणौ धारयन्ती,
शोभां धत्ते चित्रां चित्रा शब्दवन्नूपुराभ्याम् ॥ ३६० ॥

यथा–

कालिन्दीकूले केलीलोलं वधू'सङ्घयुक्तं,
वन्दे गोपालं रक्षायां नन्दगोपस्य सक्तम् ।
हस्तद्वन्द्वे धृत्वा दवाग्नेर्विदिकां पूरयन्तं
वर्तमान् हत्वा देवानां शकटं दूरमन्तम् ॥ ३६१ ॥

इति चित्रा १६४

चित्रमिदमन्यत्र' ।

१६५. अथ केसरम्

कुरु नगणं ततोऽपि च विधेहि भूपति,
मगणपयोधरौ तदनु पक्षिणां पतिम् ।
फणिपतिभाषितं विविधविभावितांक्षरं
सुकविमनोहरं हृदि निधेहि केसरम् ॥ ३६२ ॥

यथा–

चिरमिह मानसे कलय नन्दवारकं
भरवनमालिनं विविधतापहारकम् ।
व्रजवनितारसोत्थधिनिमग्नमानसं
रवितनयातटे कलितपीतवाससम् ॥ ३६३ ॥

इति केसरम् १६५.

१६६ अथ एला

प्रथमं चरं रचय नगणमनु कान्ते !
नगणद्वयं तदनु गुरु सगणमन्ते ।
फणिभाषिता दशपरिकलितविरामा
कृतशंभुतिः सकलरचितमिरैला ॥ ३६४ ॥

---

१ क वधू ।

टिप्पणी—१ दामोदरकृत द्विनीयापरक वाणिका १११

यथा–

हृदि भावये विमलकमलनयनान्त ,
जनपावन नवजलधररुचिकान्तम् ।
व्रजनायिकाहृदयमधिजनितकाम ,
वनमालिन सकलसुरकुलललामम् ।। ३६५ ।।

इति एला १६६.

१६७ अथ प्रिया

कुरु नगणयुग धेहि त भगण तत ,
प्रतिपदविरतो भासते रगणोऽन्तत. ।
मुनिरचितयति[1] र्नागराजफणिप्रिया ,
सकलतनुभृता मानसे लसति प्रिया ।। ३६६ ।।

इदमेव हि यदि वसुयति८ रलिरिति सज्ञा तदाप्नोति ।
लक्षणवाक्ये मुनियतिरुदिता वसुकृतयतिश्च यथा ।। ३६७ ।।

यथा–

कलय दशमुखारि हताखिलदानव ,
मुनिजनमखपालमृषा भुवि मानदम् ।
सरसिजनयनान्त शरासनभञ्जक ,
कपिकुलवरराज्ञ सदा प्रियसज्ञकम् ।। ३६८ ।।

इति प्रिया १६७

१६८ अथ उत्सव

पक्षिराज-नगणो भगण-द्वितय तत.
कारयाशु पदशेषकृतो रगणो मत ।
उत्सव फणिनागकृत सखि ! भासते ,
पङ्क्तिजाक्षरविरामयुत कविमानसे ।। ३६९ ।।

यथा–

बभ्रमीति हृदय जलधौ तरणिर्यथा ,
दह्यते सखि ! तनुर्नलिनीव हिमागमे ।
वायुलोलकदलीव तनुर्मम वेपते ,
चन्दन शुचि सरोवदिद परिशुष्यति ।। ३७० ।।

इति उत्सव १६९

---

१ ख यति ।

१११ अथ उद्धुरम्।

भुवनविरचितमिह लघुमुपनय ,
तदनु विपुलतरगुमिह विरचय ।
उडुगणमखिलहृदयहृतमदम—
मुपिकृतविरतिमनुकुरु सुवदन ! ॥ ३७१ ॥

यथा–

दहनगतमसकनकनिभवसन
कटिघृतविरुतरुचिरवररसन ।
सुरकृतनमन जलनिधिनिवसन
धामनुविरचय कुसुमनिमहसन ॥ ३७२ ॥

इति उद्धुरम् १११

¹अत्रापि प्रस्तारगत्या पञ्चदशाक्षरस्य द्वात्रिंशत्सहस्राणि सप्तशतानि अष्ट षष्ट्युत्तराणि ३२७६८ भेदास्तेषु आद्यन्तसहिता कियन्त प्रोक्ता, शेषभेदा प्रस्ताय लक्षणीया इति दिक्॥* ।

इति पञ्चदशाक्षरम्।

अथ षोडशाक्षरम्

तत्र–

१७ राम:

यस्मिन्नष्टौ पादस्यस्या युक्ता सदृश्यन्ते कर्णा,
सद्योमन्ते पादे पादे शृङ्गारे संस्याता वर्णा ।
यस्मिन् सर्वस्मिन् पाद स्याद् वेदर्षे²यद्विश्राम
सर्पाणामीशेन प्रोक्त गच्छन्द स्यु (स्तु) अष्टो राम ॥३७३॥

यथा–

दण्डाघर्दैर्वेगैर्नित्यं यस्य पायात्सोऽर्द्ध राम
सदाणां दानृत्ये दक्ष सर्वेषां कामानां धाम ।
भग्नीभृत्यात्यन्तं शिवा दत्तामाशां भर्तं येनात्
मातुर्मूर्ध्नि बद्ध्वा बिभ्रद् यो मे हन्ते यत्नं मानात् ॥ ३७४ ॥

इदमेवान्यत्र ब्रह्मरूपकम**इति नामान्तरं मतम् ।

इति राम १०

१ [illegible] नास्ति क [illegible]। २ क [illegible]।

* टिप्पणी—१ [illegible]।

टिप्पणी—२ [illegible] १०४

१७१ अथ पञ्चचामरम्

शरेण नूपुरेण यत्क्रमेण भाविताक्षर,
वसुप्रयुक्तभेदभाग् भवेच्च षोडशाक्षरम् ।
फणीन्द्रराजपिङ्गलोक्तमुक्तमत्र भासुर,
विधेहि मानसे सदैव चारु पञ्चचामरम् ।। ३७५ ।।

यथा–

कठोरठात्कृतिध्वनत्कुठारधारभीषण,
स्वय कृतप्रतिज्ञया सहस्रबाहुदूषणम् ।
समस्तभूमिदक्षिणे मखे मुनीन्द्रतोषण,
नतो महेन्द्रवासिन भृगुन्तु[1] वंशभूषणम् ।। ३७६ ।।

यथा वा, अस्मद्वृद्धप्रपितामह-श्रीरामचन्द्रभट्टमहाकविपण्डितविरचित दशावतारस्तोत्रे जामदग्न्यवर्णने—

अकुण्ठधार भूमिदार कण्ठपीठलोचन-
क्षणध्वनद्ध्वनत्कृतिक्वणत्कुठारभीषण ।
प्रकामवाम जामदग्न्यनाम राम हैहय-
क्षयप्रयत्ननिर्दय व्यय भयस्य जृम्भय ।। ३७७ ।।

इति पञ्चचामरम् १७१

एतस्यैव अन्यत्र नराचम्[1]*इति नामान्तरम् ।

१७२ अथ नीलम्

वेद-भकारविराजितमद्भुतवृत्तवर,
भामिनि ! भावय चेतसि कङ्कणशोभि करम् ।
पिङ्गलनागसुभाषितमालि विमोहकर,
नीलमिद रसभूमिविभावितवर्णधरम् ।। ३७८ ।।

यथा–

पर्वतधारिणि गोपविहारिणि 'नन्दसुते,
सुन्दरि हारिणि'[2] कसविदारिणि बालयुते ।
पङ्कजमालिनि केलिषु शालिनि मे सुमति-
र्वेणुविराविणि भूम(भ)रहारिणि जातरति ।। ३७९ ।।

इति नीलम् १७२.

---

१. ख. भूगुरु । '–' २ क प्रतौ नास्ति ।

*टिप्पणी—१ वाणीभूषणम्, द्वितीयाध्याय, प० २७३

१७३ अथ चम्पकमाला

'हारमेरुव्यक्रमेण यद्विराजते सुकेशि !,
षोडशाक्षरेण यद् विकासित भवेत् सुवेषि ! ।
पिङ्गलेन भाषित समस्तनागनायकेन
तदिह चम्पकमालिका कवीन्द्रमोददायकेन ॥ ३८० ॥

यथा–

आलि ! रासजातलास्यलीलया सुशोभितेन,
गरिकाविधातुवन्यभूषणानुभूषितेन ।
गोपिकाविमोहिरावववंशिकाविनोदितेन
मन्मनो हृत व्रजाटवीषु केलिमोदितेन ॥ ३८१ ॥

यथा वा भूषणे *—

आलि ! याहि मञ्जुकुञ्जगुञ्जितालिलालितेन,
भास्करात्मजाविराजिराजि'तीरकाननेन ।
शोभिते स्थले स्थितेन सङ्गता यदूत्तमेन
माधवेन भाविनी तडिल्लतेव नीरदेन ॥ ३८२ ॥

इति चम्पकमाला १७३

एतस्यैवान्यत्र चित्रसङ्गम्* इति नामान्तरम् ।

१७४ अथ मदललिता

कर्णे कृत्वा कनकरुचिरं ताटङ्कसहितं,
सविश्रामा द्विजमथ पुन' स्वर्णद्वयवसया ।
हारौ धृत्वा कुसुमकलितौ हस्तेन रुचिरा
वेदे षड्भिर्मदललिता क्षिप्रा रसयति' ॥ ३८३ ॥

यथा–

कालिन्दीये तटभुवि सदा' केलीषु ललित
राधाचित्तप्रणयसदन गोपेषु (पीसु) ललितम् ।
मविश्राण विलसदधिर यस्य करतले
ध्यायेन्नित्यं व्रजपतिसुतं चित्ते'तिविमले ॥ ३८४ ॥

इति मदललिता १७४

---

१ क हारमेरुव्यक्रमेण यद्विराजते सुरेश षोडशाक्षरैर्भवेत् सुकेशि षोडशाक्षरेण ।
२ क रम्यतीरकाननम । ३ क तदपरितरे ।

टिप्पणी–१ वाणीभूषणम्, द्वितीयाध्याय पद्य १७८
२ छन्दोमञ्जरी द्वितीयस्तबक कारिका १४८

१७५ अथ वाणिनी

कुरु नगण विधेहि जगण ततो भकार,
जगणमथोऽपि रेफयुतमन्तजातहारम् ।
षडधिकपक्तिवर्णकलित सुवृत्तसार,
कलयत वाणिनीति कविभि कृतप्रचारम् ॥ ३८५ ॥

अनवरतं खराशुतनयाचलज्जलौघै,
तटभुवि[1]सलुप्ते*[1]ऽखिलनृणा विनाशिताघै ।
द्विजजनसाधिताऽनुपमसप्ततन्तुभोक्ता,
पशुपजनैर्हरि सह वनोदन जघास[2] ॥ ३८६ ॥

इति वाणिनी १७५.

१७६ अथ प्रवरललितम्

यकार पूर्वस्मिन् रचय मगण धारयाशु,
नकार हस्त च प्रथय रगण धेहि वासु ।
गुरु पादस्यान्ते विरचय फणीन्द्रेण गीत,
सुहास्ये विश्राम प्रवरललित नाम वृत्तम् ॥ ३८७ ॥

तडिल्लोलैर्मेघैर्दिशि दिशि महाध्वानवद्भि-
र्गजानीकाकारैरनवरतमाप सृजद्भि ।
व्रज भीत[3] वीक्ष्य द्रुतमचलराज कराग्रे,
दधद्रक्षा कुर्यात् भवजलनिधावत्युदग्रे ॥ ३८८ ॥

इति प्रवरललितम् १७६

१७७ अथ गरुडरुतम्

द्विजवरमत्र धेहि रगण नकारं तत,
कुरु रगण ततोऽपि रगण पदान्ते मत ।
षडधिकपक्तिवर्णकलित समस्ते पदे,
गरुडरुत समस्तफणिराजचित्तास्पदे ॥ ३८९ ॥

---

१ ख विटपितले लुते । २ क वतोदन भुक्ति । ३ ख छन्न ।

टिप्पणी—१ अत्र पादे नगणमनु जगणोपस्थितिर्युक्ता किन्त्वत्र 'सलुप्ते' इति पाठे यगणो जायते तदयुक्तम् ।

यथा–

मृगगणदाहके वननदीसरःशोषके
प्रसति तपन् विलोलनिजहेतिजिह्वाततौ ।
भयभरखिन्न'डिम्भवदनं निरीक्ष्याशु यः
ववदहनं पपौ स दिशतान् मनोवाञ्छितम् ॥ ११० ॥

इति यवबलम् १७७

१७८ अथ चकिता

देहि ममिह स कर्णे हारौ कुण्डलमबले !,
धारय कुसुमं पुष्पग्रन्थं कामिनि ! तरले ! ।
रूपवलयकं पादप्रान्ते स्यादिह चकिता
यदसु च विरति' काम्यम्यक्ति स्मरसे' भविता ॥ १११ ॥

यथा–

कामिनि ! सुघने वृन्दारण्ये मन्दय नयनं
भामिनि ! भवने भव्याकारे भावय शयनम् ।
शीतलपवने धन्ये पुण्ये सज्जननमने
त्वामिह कलये सल्पेऽनल्पे कुञ्जरगमने ॥ ११२ ॥

इति चकिता १७८

१७९ अथ गजतुरगविलसितम्

धारय रौहिणेयमथ पतगवरपति
कारय वह्निमेय-नगणवरगुरुयतिम् ।
षोडशवर्णधारि-गजतुरगविलसितं,
भामिनि ! भावयेदमपि मुनियतिरचितम् ॥ ११३ ॥

यथा

सुन्दरि ! नन्दनन्दनमिह भरणिवलये
मानिनि ! मामवाममपि' न हि न हि कलये ।
भावय भावनीयगुणगणपरिकलितं
चेतसि चिन्तयाशु सखि ! मुनिजनवलितम् ॥ ११४ ॥

इति गजतुरगविलसितम् १७९

क्वचिद् इदमेव ऋषभगजविलसितम् * इति नामान्तरेणोक्तम् ।

१ ख मिह । २ ख हरसे । ३ ख मामवामगुणमिह न कलये ।
टिप्पणी—१ वृत्तरत्नाकर: अ ३ का ९९ छन्दोमञ्जरी द्वि स्त का १४९

१८० अथ शैलशिखा

धेहि भकारमत्र खगराजमवेहि तत,
　　कारय न ततोऽपि भगणो भगणेन युत ।
नूपुरमेकसख्यमवधेहि पदान्तगत,
　　शैलशिखाभिध त्वमवधारय नागकृतम् ॥ ३९५ ॥

यथा–

गोपवधूमयूरवनितानवमेघनिभ,
　　दानवसङ्घदारणविधावतिसप्रतिभ ।
तुम्बरुनारदादिकमन सरसीषु गज,
　　वाञ्छितमातनोतु तव गोपपतेस्तनुज ॥ ३९६ ॥

इति शैलशिखा १८०

१८१ अथ ललितम्

कारय भ ततोऽपि रगण विधेहि नगण,
　　पक्षिपतिं विधारय पुनस्तथैव नगणम् ।
कङ्कणमन्तग कुरु समस्तपादविरतौ,
　　धेहि मन सदैव ललिते फणीश्वरकृतौ ॥ ३९७ ॥

अत्रापि सप्तभिर्नवभि प्रायो विरतिर्भवतीति उपदिश्यते ।

यथा–

गोपवधूमुखाम्बुजविकासने दिनपति,
　　दानवसङ्घमन्तकारिदारणे मृगपति ।
लोकभयापहः सकलवन्द्यपादयुगल,
　　श कुरुता ममापि च विलोलनेत्रकमल ॥ ३९८ ॥

इति ललिलम् १८१

१८२ अथ सुकेसरम्

नगण-सगणौ विधेहि जगण तत पर,
　　सगण-जगणौ च नूपुरमथोऽनन्तरम् ।
फणिनृपतिभाषित रसविधूदिताक्षर,
　　कलय हृदये सदा सुखकर सुकेसरम् ॥ ३९९ ॥

यथा–

नरपतिसमूहकण्ठतटघट्टनोद्भवै-
　　रुडुगणनिभै स्फुलिङ्गनिकरैर्भयानक ।
विलसति नृपेन्द्रशत्रुगणधूमकेतुवत्,
　　तव रणविधौ स्थित करतले कृपाणक ॥ ४०० ॥

इति सुकेसरम् १८२

१८३ अथ ललना

प्रथमं कलय करतलमात्मना ह्युपर्या[1],
ललनां नगणयुगलवर्ती बभाकमिताम् ।
फणिराजमणितगुण(रु)विराजितामतुला,
कलयाशु सपदि सुजनमानसे वसिताम्[2] ॥ ४०१ ॥

यथा

विदधातु सकलफलममारत तनुते,
सनकादिनिखिलमुनिनतो वने वनिते ! ।
व्रजराजतनय इह सदा हृदा कलित
स चराचरजनतनुमहोदयो फलित ॥ ४०२ ॥

इति ललना १८३

१८४ अथ गिरिवरधृति

धरपरिमितमिह नगणमनु कुरुत
विधुविरचितमथ लघुमपि रचयत ।
फणिपतिरिति किल मधुरमनुवदति
कलयत निजहृदि गिरिवरधृतिरिति ॥ ४०३ ॥

यथा –

विधिधनिचयहृतनिगिलरजनिचर !
निजभुजयुगवलरणविनिहतपर ! ।
बिधुधमिहतमय ! दशमुखमुखहर !
दशरथनृपसुत ! जय ! जय ! रघुवर ! ॥ ४०४ ॥

इति गिरिवरधृति १८४

अथसलयति *दशयम्र ।

अत्रापि प्रस्तारगत्या पाञ्चाशारम्य पञ्चपञ्चिगलगाणि पञ्चषताति षट् त्रिशद्वृत्तानि १७५ १ अत्रास्तु विषता सहिता धावमेदा प्रस्तार्य स्वेच्छया नामानि धारयन्त्या (विमाय) लक्षणीया दशगुदिन्यते ।[2]

इति पाडशाक्षरम् ।

---

१ क ह्युप लाम् । २ ख वसितम् । ३ ख पंक्तिद्वयं नास्ति क प्रती ।

टिप्पणी—१ ग [illegible] निरीक्षणक पृ ११६

„ —२ [illegible]

अथ सप्तदशाक्षरम्

तत्र प्रथमम्–

१८५ लीलाधृष्टम्

वृत्ते यस्मिन्नष्टौ पादे कर्णा सयुक्ता सदृश्यन्ते,
हारश्चैक प्रान्ते यस्मिन् वर्णा शैलश्चन्द्रै शोभन्ते ।
सर्वेषा नागाणामीशेनैतत्सप्रोक्त धेहि स्वान्ते,
भूपालाना चित्तानन्दस्थान लीलाधृष्टाख्य कान्ते [1] ॥ ४०५ ॥

यथा–

वारा राशौ सेतु बद्ध्वा लङ्कायामातङ्कौघ दास्यन्,
नानावर्णै सुग्रीवाद्यै लङ्काया[1] भिन्न दुर्गं कुर्वन् ।
सीताचित्ते प्रेमाधिक्यै लोहै कीलैर्ग्राव्णीवोत्कीर्णा,
काकुत्स्थ. कल्याण कुर्याद युष्माक क्रव्यादाब्धि तीर्ण ॥ ४०६॥

इति लीलाधृष्टम् १८५

१८६ अथ पृथ्वी

पयोधरविराजिता करसुवर्णवत्कङ्कणा,
सुगन्धकुसुमोज्ज्वला सरसहारसशोभिनी ।
सुरूपयुतकुण्डला कनकरावसुनूपुरा,
वसुप्रथितसस्थितिर्जगति भाति पृथ्वी सदा ॥ ४०७ ॥

यथा–

हरिर्भुजगनायक निजगिरिं भवानीपति,
गजेन्द्रममराधिपो निजमरालमब्जासन ।
द्विजा विबुधकूलिनी जगति जायमाने नृप !,
त्वदीययशसोज्ज्वले किल गवेषयन्त्यातुरा ॥ ४०८ ॥

यथा वा, कृष्णकुतूहले—

अनेन नयताऽधुना महदुलूखल शाखिनो,
रयातियुगमन्तरा ककुभयोरिह क्रामता ।
इतीरयति केचन श्रदधुराशु गोपान्हृदा,
पुरो विहरति स्वके शिशुकदम्बके नापरे ॥ ४०९ ॥

इत्यादि शतशो निदर्शनानि काव्येषु ।

इति पृथ्वी १८६

---

१. ख लकाया ।

१८७ अथ मालावती

द्विजविलसिता पयोधरविराजिता हारिणी
सरसकरयुकसुवर्णवसया लसत्कुण्डला ।
विलसयुतनूपुरा मुनिदिगीशसंख्याक्षरा
भुजङ्गपतिभाषिता जगति भाति मालावती ॥ ४१० ॥

यथा–

वनचरकदम्बकैरपरसिन्धुसोमाधरै-
करजवसनायुधैर्जलधिनीरमाच्छादयन् ।
रघुपतिरुपागतः सखि ! निशाचराधीश्वरं
रणभुवि निहत्य वास्यति सवातुल सम्मदम् ॥ ४११ ॥

इति मालावती १८७

मालाधर इति पिङ्गले * नामान्तरम् ।

१८८ अथ शिखरिणी

सुरूपं स्वर्णाढ्यं श्रवणमथिताटङ्कयुगलं
सदा सविभ्राणा द्विजमथ सुपुष्पाढ्यवसयौ ।
सुरूपं हस्ताग्रं तदनु वमती राजति रसै-
श्छिवैश्छिन्ना नागप्रथितमहिमेयं शिखरिणी ॥ ४१२ ॥

यथा–

दिशि स्फारीभूतैः कविनिकरगीतैस्तव रणं
स्तवैर्वास्याधक्रैर्द्विगुणितरयः क्षोणितिलक ।
प्रतापो दावाग्निस्तव खरकरस्पर्धकठिनो
विपक्षक्षोणीन्द्र प्रथितवनमथ प्रभवति[1] ॥ ४१३ ॥

यथा वा ममैव पद्यवकृते खण्डकाव्ये–

यदा कंसादीनां निधनविषये यादवपुरीं
गतः श्रीगोविन्दः पितृभवनतोऽक्रूरसहितः ।
तदा तस्योम्मीलद्‌विरहदहनज्वालगहने
पपात श्रीराधाकमिततदशाधारणरतिः ॥ ४१४ ॥

---

१ ख. प्रवति ।

*टिप्पणी—१ प्राकृतपिंगलम् द्वितीयपरिच्छेद पद्य १७८

यथा वा, कृष्णकुतूहले—

विना तत्तद्वस्तु क्वचिदपि च भाण्डानि भगवत्,
　　प्रसादान्ताऽभूवन् प्रतिभवनमित्यद्भुतमभूत् ।
भयोद्यद्वैलक्ष्याऽवितथवचसस्तच्चरणयो-
　　र्निपेतुस्ता हस्ताहृतवसनमुक्तामणिगणा ॥ ४१५ ॥

यथा वा, रूपगोस्वामिकृत-हसदूतकाव्ये[1]*—

दुकूल विभ्राणो दलितहरितालद्युतिहर,
　　जपापुष्पश्रेणीरुचिरुचिरपादाम्बुजतल ।
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुख,
　　परानन्दाभोग स्फुरतु हृदि मे कोऽपि पुरुषः ॥ ४१६ ॥

यथा वा, श्रीशङ्कराचार्यकृत-सौन्दर्यलहरीस्तोत्रे[2]*—

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा,
　　दवीयास दीन स्नपय कृपया मामपि शिवे ।
अनेनाऽय धन्यो भवति न च ते हानिरियता,
　　वने वा हर्म्ये वा समकरनिपातो हिमकर ॥ ४१७ ॥'

इत्यादि महाकविप्रबन्धेषु शतशो निदर्शनानि द्रष्टव्यानि ।

इति शिखरिणी १८८

१८९ अथ हरिणी

द्विजरसयुता कर्णद्वन्द्वस्फुरद्वरकुण्डला,
　　कुचतटगत पुष्प हार तथा दधती मुदा ।
विरुतललित सबिभ्राण[2] पदान्तगनूपुर,
　　रसजलनिधिश्छिन्ना नागप्रिया हरिणी मता ॥ ४१८ ॥

यथा–

सपदि कपय शौर्याविशस्फुरत्करजद्विजा,
　　गिरिवरतरूनुन्मृद्नन्तस्तथोत्पथगामिनः ।
अहमहमिका कृत्वा वारानिधेरतिलङ्घने[3],
　　तटभुवि गता सप्रेक्षन्ते मुखानि परस्परम् ॥ ४१९ ॥

---

१. क प्रतौ नास्तीदम्पद्यम् । २ ख सबिभ्राणा । ३. ख. लघते ।

*टिप्पणी—१ श्रीरूपगोस्वामिकृत हसदूतम् प्रथमपद्यम्
　　२ शकराचार्यकृत-सौन्दर्यलहरी पद्य ५७

यथा वा, कृष्णकुतूहले—

> हसितवदने दृष्ट्वा चेष्टां सुतस्य सविस्मये
> यशसुरथ ते गोपापत्यौ तदद्भुतमन्यत ।
> तदनु कतिचिद् बाला मात्रे यमेन सहोचिरे
> मृषमनुपद कृष्ण प्राशीदिति प्रतिभाजुष ॥ ४२० ॥

यथा वा लक्ष्यलक्षणयुक्त तत्रैव—

> प्रहितहृदयोदञ्चत्तत्तद्गतिप्रतिभाजुषां,
> त्रिभुवनपतिप्रत्यासत्तिस्फुरत्पुलकस्पृशाम् ।
> शिथिलकबरीबन्धस्रस्तस्रजां हरिणीदृशां
> न समरसतः कायप्रायो लघुर्गुरुरप्यभूत् ॥ ४२१ ॥

एवमेवार्थं ऊहनीयः । यथा वा– 'अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे[1]' इत्यादि रघुवंशे महाकाव्यादिसत्कविप्रबन्धेषु च भूमनिदर्शनानि ।

इति हरिणी १८६

१९ अथ मन्दाक्रान्ता

> कर्णौ पुष्पद्वितयसहितौ गन्धबद्धस्तयुक्ता
> हारं रूपं तदनु वलयं स्वर्णसञ्जातशोभम् ।
> संबिभ्राणा विरलसमितौ नूपुरौ वा पदान्ते
> मन्दाक्रान्ता जयति निगमच्छेदयुक्ता रसैश्च ॥ ४२२ ॥

यथा–

> सिन्धोः पारे वधमुखपुरी वानरास्तत्र दूताः
> पम्पाशम्पाशतयुतजलश्रीसमेघावलीकाः ।
> वासः केकाकवलिततटे माल्यवान्ऋष्यमूके
> दैवो वामः पुनरयमतो भावि किं किं न जाने ॥ ४२३ ॥

---

*टिप्पणी— १ अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥
[रघुवंश स ३ प ७]

यथा वा, कृष्णकुतूहले—

हृत्वा ध्वान्तस्थितमपि वसुप्रक्षिपत् पक्ष्म[राजि-]
स्पन्दं विन्दन् व्रजति कुहचित् कैश्चनालक्ष्यमाणः ।
छिद्राणि द्राक् कलयति शयाशक्यशिक्यस्थभाण्डे[1],
निद्रा भक्त्वा द्रवति जवतस्ताडयत् सुप्तबालात् ।। ४२४ ।। (?)

इति मन्दाक्रान्ता १९०

१९१ अथ वंशपत्रपतितम्

कारय भं ततोऽपि रगणं रचय नं-भगणौ,
धेहि नकारमेरुवलयान् तदनु सुललितान् ।
व्योमसुधांशुभिः कुरु हयैः तदनु च विरतिं[2],
चेतसि वंशपत्रपतितं रचय फणिकृतम् ।। ४२५ ।।

यथा—

जानकि ! नैव चेतसि कृथा रजनिचरमतिं,
राघवदूततामुपगतं कलय हृदि निजे ।
जल्पति मारुतात्मविति तदा जनकतनयया-
दत्त[3] न मुद्रिकाऽपि कलिता जलपिहितदृशा ।। ४२६ ।।

यथा वा—

'सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि ।' इति किरातार्जुनीये*।

इति वंशपत्रपतितम् १९१

स्त्रीलिङ्गमिति केचित् । वंशवदनम् इति शाम्भवे तस्यैव नामान्तरमुक्तम् ।

१९२ अथ नर्दटकम्

कुरु नगणं ततः कलय जं वद भं च ततो,
जगणयुगं ततो रचय कारय मेरुगुरू ।
फणिपतिभाषितं मुनिविधूदितवर्णधरं,
कविजनमोहकं हृदि विधारय नर्दटकम् ।। ४२७ ।।

---

१ ख. भारो । २ ख विरतिं । ३ ख हन्त ।

*टिप्पणी—१ सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि,
क्षीणपयस्युपेयुषि भिदा जलधरपटले ।
खण्डितविग्रहं वलभिदो धनुरिह विविधाः,
पूरयितुं भवन्ति विभवशिखरमणिरुचः ।।४३।।
[किरातार्जुनीयम् स० ५, प० ४३]

यथा–

मनुलयमूर्च्छया क्षपितदेहलता गमता
नयनजलेन दूषितमुखी[1] तव भूमिसुता ।
रघुवरमुद्रिकां हृदि निधाय सुखातिशये
मुकुलितलोचना क्षणममूवमृतस्मपिता ॥ ४२८ ॥

यथा वा श्रीमागवते दशमस्कन्धे वेदस्तुतौ* —

जय ! जय ! जह्यजामजितदोपगृहीत[2]गुणाम् । इत्यादि ।

इति नर्दटकम् ११२

अथ कोकिलकम्

मुनिरसवेदैर्विरतिर्यदि कोकिलकं तदेदमेव भवेत ।
तदुदाहरणं लक्षणवाक्ये श्रयं सुधीभिरिति ॥ ४२९ ॥

यथा वा छन्दोमञ्जर्याम *—

ललदरुणेक्षणं मधुरमायणमोदकरं
मधुसमयागमे सरसकेलिभिरुल्लसितम् ।
भ्रमिसमितद्युति रविसुतावनकोकिलकं
मनु कलयामि त सखि ! सदा हृदि मन्दसुतम् ॥ ४३० ॥

गणविरचना सैव विरतिकृत एवात्र भेद इति नामान्तरम् ।

इति कोकिलकम् ।

११३ अथ हारिणी

कर्णे कृत्वा कनकलसितं ताटङ्कसंराजितं
संबिभ्राणा त्रिजगय रत्नस्वर्णाचितौ नूपुरौ ।
पुष्पं हारौ सरसवसनं संधारयन्ती मुदा
वेदै षड्भिर्विरचितयति र्धीसोदिता हारिणी ॥ ४३१ ॥

---

१ क दूषितमुखा । २ क गृहीतगुणाम् ।

* टिप्पणी—१ जय जय जह्यजामजितदोपगृहीतगुणां
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
अगजगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ॥
[भागवत-दशमस्कन्ध अ ८७ श्लो १४]

२ छन्दोमञ्जरी द्वि स्त का १६७ ।

यथा–

वद्ध्वा सिन्धू नगरमिह मे राम समायात्यय,
रोद्धु [1] श्रुत्वा दशमुख इति प्रीतोऽभवत्तत्क्षणम् ।
वाह्वो कण्डू गमयितुमना पश्चान्नर राघव,
श्रुत्वाऽवज्ञाकलुपितमना लङ्केश्वरोऽभूत्तदा ॥ ४३२ ॥

इति हारिणी १९३.

१९४. अथ भाराक्रान्ता

आदौ कुर्यान् मगण-भगणौ ततो नगणो मत,
रेफ दद्यात्तदनुरुचिर विधेहि कर तत ।
मेरु हार विरचय तत फणीश्वरभाषिता,
भाराक्रान्ता जलनिधिरसैर्विरामयुता मता ॥ ४३३ ॥

यथा–

सिन्धोर्वन्ध रघुवरकृत निशम्य दशाननो,
दध्यो मूद्ध्नर्ना [2] सपदि वहुधा व्यधाच्च विधूननम् ।
शङ्के च्योतन्मणिकपटतो रघूत्तमरागिणी,
सत्यामाख्या जगति तनुते तदा कमलालया ॥ ४३४ ॥

इति भाराक्रान्ता १९४

१९५ अथ मतङ्गवाहिनी

हारमेरुजक्रमेण जायते यदा विराजिता,
शैलभूमिसख्यकाक्षरैस्तथा भवेद् विकासिता ।
पण्डितावलीविनोदकारिपिङ्गलेन भाषिता,
जायते मतङ्गवाहिनी गुणावलीविभूषिता ॥ ४३५ ॥

यथा–

नौम्यह विदेहजापतिं शरासनस्य 'भञ्जक,
वालिजीवहारिणं विभीषणस्य राज्यसञ्जकम् ।
लक्ष्यवेधने तथा सदा शरासनस्य' [3] धारिण,
रावणद्रुह कठोरभानुवशदीप्तिकारणम् ॥ ४३६ ॥

इति मतङ्गवाहिनी १९५

---

१ ख योद्धुम्। २ ख मूर्द्ध्न.। ३, '–' चिह्नगतोंऽश क प्रतौ नास्ति ।

११६ अथ पथकम्

रचय नगण स तस्यान्ते धेहि पश्चात् मकारं,
तदनु चरणे तस्य द्वन्द्वं कारयाशु विहारम् ।
समुनिविधुभिः पादे चिह्नं पिङ्गलेन प्रयुक्तं,
कलय हृदये सम्यक् षष्ठं पथकं वृत्तसारम् ॥ ४३७ ॥

यथा–

श्रयमिह पुरः पारावारः चेतसा गम्यपारः
सपदि सहितः पाथः सङ्घैर्मार्षणो वीचिहस्तः ।
कपिगणमहासेना चैय पारमुत्प्रेक्षमाणा
रचय मिह न्याय्यं शीघ्रं वानराणां पते [१] तत् ॥ ४३८ ॥

इति पथकम् ११६

११७ अथ वसमुखहरम्

वसमिमिपरिमित नगणमिह विरचय
तदनु च चरपरिमितलघुमपि कलय ।
सकलफणिगणमरपतिरिति हि वदति
सखि ! कलय निजहृदि वसमुखहरमिति ॥ ४३९ ॥

यथा–

जय ! जय ! रघुवर [२] ! असधितरणनिपुण !
दशरथसुत ! विबुधनिकरकलितगुण !
सुरविमतदलवदनकुमकदनकर !
सुरगणनुतचरण ! शमिह मम वितर ॥ ४४० ॥

इति वसमुखहरम् ११७

[३] अत्रापि प्रस्तारगत्या सप्तदशाक्षरस्य एकं लक्षं एकत्रिंशत् सहस्राणि द्विसप्ततिश्च १३१०७२ भेदास्तेषु कियन्तः प्रोक्ताः । शेषभेदाः प्रस्तार्य समुदाहरणीया इत्यलमतिविस्तरेण [३]* ।

इति सप्तदशाक्षरम् ।

---

१ ख अयमपि । २ ख पते । ३ चिन्हितांशं नास्ति ख प्रतौ ।

*टिप्पणी १–अस्तरवातरहतस्यावीतिश्रान्तभेदा पञ्चपरिशिष्टेऽवलोकनीयाः ।

अथ अष्टादशाक्षरम्

तत्र–

१६८ अथ लीलाचन्द्र

अश्वै सख्याता यस्मिन् वृत्ते पादे पादे शोभन्ते कर्णा.,
पश्चाद् वेदै सख्याता हारा योगैश्चन्द्रैस्सयुक्ता वर्णा ।
लीलाचन्द्राख्य वृत्त प्रोक्त नागानामीशेनैतत् कान्ते !,
रन्ध्राङ्कैर्वर्णै सविच्छिन्न धेहि स्वान्ते भास्वन्नेत्रान्ते ॥ ४४१ ॥

यथा–

हालापानोद्घूर्णन्नेत्रान्तस्तुच्छीकुर्वत्कैलास भासा,
नीलाम्भोजप्रोद्यच्छोभावत् स्कन्ध द्वन्द्वे सराजद्वासाः ।
माला वक्ष पीठे बिभ्राणो न्यक्कुर्वन्ती कान्त्यालीन् तूर्णं,
तालाङ्कस्सर्वेषा लोकाना कल्याणौघ दद्यात् सम्पूर्णम् ॥४४२॥

इति लीलाचन्द्र १६८

१६९ अथ मञ्जीरा

पूर्व [1] कर्णत्रित्व कारय पश्चाद्धेहि भकार दिव्य,
हार वह्निप्रोक्त धारय हस्त देहि मकार चान्ते ।
रन्ध्रैर्वर्णैर्विश्राम कुरु पादे नागमहाराजोक्त,
मञ्जीराख्य वृत्त भावय शीघ्र चेतसि कान्ते ! स्वीये ॥ ४४३ ॥

यथा–

सिन्धुर्गम्भीरोऽय राजति गन्तार कपयस्तत्पार,
शैले शैले केकी कूजति वातोऽय मलयाद्रेर्वाति ।
लङ्काया वैदेही तिष्ठति कामोऽय पुरत सज्जास्त्र,
सामग्रीय तावल्लक्ष्मण सर्वं पूर्वंकृतस्याधीनम् ॥ ४४४ ॥

यथा वा, भूषणे[1]*–

प्रौढध्वान्ते गर्जद्वारिदधाराधारिणि काले गत्वा,
त्यक्त्वा प्राणानग्रे कौलसमाचारानपि हित्वा यान्ती ।
कृत्वा सारङ्गाक्षी साहसमुच्चै केलिनिकुञ्ज शून्य,
दृष्ट्वा प्रागत्राण भावि कथं वा नाथ ! वद प्रेयस्या ॥४४५॥

इति मञ्जीरा १६९.

---

१ ख पूर्णम् ।

*टिप्पणी—१ वाणीभूषणम्, द्वितीयाध्याय, पद्य २६४

२　अथ चर्चरी

कुण्डल दधती सुरूपसुवर्णराचरसाहित
　　नूपुर कुचयुग्मसङ्गतदिव्यहारविभूषिता ।
हस्तयुग्मसुरूपकङ्कणभासिता फणिभाषिता
　　चर्चरी कविमानसे परिभाति भावुकवामिनी ॥ ४४६ ॥

यथा–

रासकेलिरसोद्धतप्रियगोपवध ! जगत्पते !
　　दैत्यसूदन ! भोगिमर्द्दन ! देवदेव ! महामते !
कंसनाशन ! वारिजासनवन्द्यपाद ! रमापते !
　　चिन्तयामि विभो ! हरे ! तव पादुके मिदशमु ते ॥ ४४७ ॥

[1]यथा वा अस्मत्तातचरणानां श्रीमन्दनन्दनाष्टके–

मन्दहासविराजित मुनिवृन्दवन्द्यपदाम्बुजं
　　सुन्दराधरमन्दराधरधारि धारु ससद्भुजम् ।
गोपिकाकुचयुग्मकुङ्कुमपङ्कपिञ्जवक्षस
　　मन्दनन्दनमाश्रये मम किं करिष्यति भास्करिः ॥ ४४८ ॥

[2]यथा वा, तेषामेव श्रीसुन्दरीध्यानाष्टके–

कल्पपादपवाटिकावृतदिव्यसौधमहार्णवे
　　रत्नसङ्कुलान्तरीपसुनीपराजि विराजते
चिन्तितार्थविभागवक्षसुरत्नमन्दिरमध्यगां
　　मुक्तिपादपवल्लरीमिह सुन्दरीमहमाश्रये ॥ ४४९ ॥

यथा वा भूषणे[3]–

कोकिलाकलकूजित न शृणोषि सम्प्रति सादरं
　　मन्यसे तिमिरापहारि सुधाकरं न सुधाकरम् ।
दूरमुज्झसि भूषण विकसासि चन्दनमारुते
　　कस्य पुण्यफलेन सुन्दरि ! मन्दिरं न सुखायते ॥ ४५० ॥

---

१ २ मन्दनन्दनाष्टक–सुन्दरीध्यानाष्टकाभ्यामेव पद्यद्वयं नास्ति क प्रतौ ।

३ वाणीभूषणम् द्वितीयाध्याय पद्य १६६

यथा वा, मार्कण्डेयमहामुनिविरचितचन्द्रशेखराष्टके—[प्रथम पद्यम्]

रत्नसानुशरासन रजतादिशृङ्ग निकेतन,
　　सिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ।
क्षिप्रदग्धपुरत्रय त्रिदशालयैरभिवन्दित,
　　चन्द्रशेखरमाश्रये मम किं करिष्यति वै यम ॥ ४५१ ॥

यथा वा, शङ्कराचार्यकृत-नवरत्नमालिकास्तोत्रे[1]—

कुन्दसुन्दरमन्दहासविराजिताधरपल्लवा-
　　मिन्दुविम्वनिभाननामरविन्दचारुविलोचनाम् ।
चन्दनागुरुपङ्करूषिततुङ्गपीनपयोधरा,
　　चन्द्रशेखरवल्लभा प्रणमामि शैलसुतामहम् ॥ ४५२ ॥

इत्यादि महाकविप्रवन्धेषु सहस्रशो निदर्शनानि अनुसन्धेयानि ।

इति चर्चरी २००　इति द्वितीय शतकम् ।

२०१ अथ क्रीडाचन्द्र

यकार रसेनोदित सर्वपादेपु सधेहि युक्त,
　　तथा धेहि पादे नगाधीशशीतांशु[2]सख्यातवर्णम ।
कवीनामधीशेन नागाधिराजेन सभाषित तत्,
　　मुदा क्रीडया शोभित चन्द्रसज्ञ हृदा धेहि[3] वृत्तम् ॥ ४५३ ॥

यथा– मुनीन्द्रा पतन्ति स्म हस्त नृपा कर्णयुग्मे तथाधु,
　　सभाया नियुक्ता दधु कम्पमुच्चैस्तदा स्तम्भसङ्घा ।
सुराणा समूहेन नाश्रावि लोके तथान्योन्यवाच[4]-
　　स्तदा रामसभिन्नवाणासनाढ्यातपूर्णो[5] त्रिलोके ॥ ४५४ ॥

यथा वा, भूषणे*[1]–

भ्रमन्ती धनुर्मुक्तनाराचधारानिरुद्धे समस्ते,
　　नभः प्राङ्गणे पक्षिवाय्वो प्रयाते निरन्ते प्रशस्ते ।

---

१ नवरत्नमालिकाया पद्य क प्रतौ नास्ति ।　२ 'शीतांशु' क प्रतौ नास्ति । ३ धेहि । ४ ख वाणी । ५ ख सनाद्यातपूर्णं ।

टिप्पणी—१ रा प्रा वि प्र ग्र० स० १४२५० स्थ उपरोक्तपद्य नास्ति, किन्त्वस्य स्थाने निम्नोद्धृत पद्य वर्तते ।
'पदान्यासनम्रीकृतक्षोणिचक्रत्रुटन्ममंकूर्मं
　　भ्रमत्तुङ्गखङ्गाङ्कविक्षेपकौत्रेरवैर च दर्पम् ।
भुजङ्गेऽशानि श्वासवातोच्चलच्चक्रवालाचलेन्द्र',
　　शिवायास्तु चन्द्रेन्दुचूडामणेस्ताण्डवाडम्वर व ॥२९६॥
　　　　[वाणीभूषणम्, द्वि अ प २९८]

तथा चण्डगाण्डीवधामावलीनीचरक्षाविरक्ष ¹
यमूवाङ्कुराओ यथा न स्थितोऽसौ विपक्ष स्वपक्ष ॥ ४५५ ॥

इति क्रीडाचक्र २१

२२ अथ कुसुमितलता

कर्णौ ताटङ्कप्रथितयशसौ² धारयन्ती द्विजं च
प्रोद्यद्रूपावधि कनककलितं कङ्कणं चादधाना ।
पुष्पाढ्यौ हारौ तदनु दधती रावयन्नूपुरौ च
छिन्ना बाणार्णैः कुसुमितलता स्याद् रसैर्वाजिभिश्च ॥४५६॥

यथा–
पूर्णश्रेमाग्ने हलकमनया³ मिसपातामभूस
तासाङ्के गाङ्ग क्षिपति रमसात्सागसाङ्कप्रवाहे ।
हर्म्याणां सङ्घे कुसुमिरमितधूर्णित भूमितं च
क्रीडार्थं कामैरिव विरचिते⁴ कोविद चैत्रराजे ॥ ४५७ ॥

यथा वा–
गौड पिष्टान्नं दधि सकृशर निर्जलं मद्यमम्लम् । इत्यादि वाग्भटे चिकित्साग्रन्थे ।¹*

इति कुसुमितलता २२

२३ अथ नन्दनम्

रचय नकारयुक्त-जगणं विधेहि परधाच्च भं,
कुरु जगणं ततोऽपि रगणं विधेहि रेफं तत ।
क्षितरचितां विधेहि विरतिं तथा हयैर्मासितां
कविजननन्दनं कुरु सखे ! सदा ध्रुवा नन्दनम् ॥ ४५८ ॥

यथा–
तव यशसा त्रिलोकवलये धवलतामागते
बहुमनिशास्वपि प्रकटितास्वचकोरकैश्चञ्चव ।
अगति पयःप्रवाहमतिभि सुखं मरालैर्वृतं
सपदि गुहां गता हिमभिया मुनीश्वरा दुर्बला ॥ ४५९ ॥

---

१ ग विभ्रमौ । २ क यशसौ । ३ क हलकमलया । ४ क मदयुही । ५ क विरचितं कौतुकात् ।

टिप्पणी—१ 'ग्राम्यानूपं पिशितमबलं शुष्कशाकं तिलान्
गौडं पिष्टान्नं दधि सकृशरं विज्जलं मद्यमम्लम् ।
वागावल्लूरं समशनमथो दुर्बलातर्पणं दिवा हि
स्वप्नं नाराजी स्वप्नपुरवसाम् वर्जयेन्मैथुनं च ॥
[वाग्भट—अष्टाङ्गहृदय म १७ श्लो ४२]

यथा वा, छन्दोमञ्जर्याम्[1]*—

तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं,
　　मधुरिपुपादपङ्कजरजः सुपूतपृथ्वीतलम्।
मुरहरचित्रचेष्टितकलाकलापसंस्मारकं,
　　क्षितितलनन्दनं भज सखे! सुखाय वृन्दावनम् ॥ ४६० ॥

यथा वा, ''अहृत धनेश्वरस्य युधि यः समेतमायोधनम्'। इत्यादि भट्टिकाव्ये[2]*।

इति नन्दनम् २०३

२०४. अथ नाराचः

रचय न-युगलं समस्ते पदे वेदसंख्याकृतं,
　　तदनु च कलयाशु पक्षिप्रभुं भासमानं पदे।
वसुहिमकिरणप्रयुक्ताक्षरोद्भासमानं हृदा,
　　परिकलय फणीन्द्रनागोक्त-नाराचवृत्तं मुदा ॥ ४६१ ॥

यथा–

सुरपतिहरितो गलत्कुन्तलच्छाद्यमानं मुखं,
　　सपदि विरहजेन दुःखेन मित्रस्य पाण्डुप्रभम्।
अनुहरति घनेन सञ्छादितः किञ्चिदुद्यत्प्रभः,
　　समुदितवरमण्डलोऽयं पुरः शीतरश्मिः प्रिये! ॥ ४६२ ॥

यथा वा, 'रघुपतिरपि तात वेदो विशुद्धो प्रगृह्य प्रियाम्।' इत्यदि रघुवंशे[3]*।

षोडशाक्षरप्रस्तारे नराचः, अत्र तु नाराचः इत्यनयोर्भेदः।

इति नाराचः २०४

मञ्जुला इत्यन्यत्र।

---

१ पंक्तिरियं नास्ति क प्रतौ।

*टिप्पणी—१ छंदोमञ्जरी, द्वि० स्तबक, का० १७५ या उदाहरणम्

,, २ अहृत धनेश्वरस्य युधि यः समेतमायोधनं,
　　तमहमितो विलोक्य विबुधैः कृतोत्तमाऽऽयोधनम्।
विभवमदेन निह्नुतह्रियाऽतिमात्रसम्पन्नकं,
　　व्यथयति सत्पथादधिगताऽथवेह सपन्नं कम् ॥
[भट्टिकाव्य, सर्ग १०, प० ३७]

,, ३ रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां,
　　प्रियसुहृदि विभीषणे सगमय्य श्रियं वैरिणः।
रविसुतसहितेन तेनानुयातः स सौमित्रिणा,
　　भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥
[रघुवंश, स० १२, प० १४]

२ ५. अथ चित्रलेखा

कर्णं कृत्वा कनकमुलसित कुण्डलप्राप्तशोभं
संविप्राणा द्विजमय च करं कङ्कणेन प्रयुक्तम् ।
पुष्पं हारद्वयमथ दधती रावबद्दूपुरौ च,
वेदैरश्वैर्मुनिरचितयतिर्भासते चित्रलेखा ॥ ४६३ ॥

यथा–

श्रीमद्राघवयमिह गगने त्वत्प्रतापाहितस्य,
छिन्नस्येन्दु कलयति सुषमां मुद्गणे सीसकस्य ।
ताराशोभां विदधति विमतो हारितस्य प्रतापै
स्फोटस्यैषा दिगपि किमु हरे कुङ्कुमैर्भाति कीर्णा ॥४६४॥

इति चित्रलेखा २ ५

२ ६ अथ भ्रमरपदम्

कारय मं ततोऽपि रगणमथ नगणयुगलं
धेहि नकारक तदनु च विरचय करतलम् ।
भाषितमक्षरैर्गिरिवरहिमकरपरिमितै
पिङ्गलभाषितं भ्रमरपदमिदमतिललितम् ॥ ४६५ ॥

यथा-

नीलतम पटाधिगतमिव[1] मुडुगणमसिल
मौक्तिकमेव कालनरपतिररतिमसितदरम् ।
वासवदिग्गतद्विजपतय इह कलितकर
यच्छति सोऽपि तानमुकलयति निजकरमपि ॥ ४६६ ॥

इति भ्रमरपदम् २ ६

२ ७ अथ शार्दूलललितम्

आदौ म सतत विधेहि तदनु सम सरसिज
तत्पश्चाद् विरचय च कलय सं कर्णं तदनुगम् ।
तस्याग्रे कुरु रूपहस्तमतुलं जानीहि सरसं
मध्यप्रेमभरामसे सुललिते शार्दूललसितम् ॥ ४६७ ॥

---

[1] ख विम ।

यथा–

श्रीगोविन्दपदारविन्दमनिश वन्देऽतिसरस,
मायाजालजटालमाकुलमिद मत्वाऽतिविरसम् ।
वृन्दारण्यनिकुञ्जसञ्चरणत. सञ्जातसुपम,
[1]दम्भोल्यकुशसध्वज सरसिजप्रोद्भासमसमम् ॥ ४६८ ॥

इति शार्दूललतितम् २०७.

२०८. अथ सुललितम्

कलय नयुगल पश्चाद्वक्रं तथातिमनोहर,
तदनु विरचये कर्णौ पुष्पान्वितौ भगण तत. ।
वितनु सुललित पक्षीन्द्र वा विलासिनीसुन्दर,
मुनिविरतियुत वेदैश्छिन्न हयैश्च विभावितम् ॥ ४६९ ॥

यथा–

त्रिजगति जयिनस्ते ते भावा नवेन्दुकलादय,
परिणतिमधुरा काम सर्वे मनोरमता गता ।
मम तु तदखिल शून्यारण्यप्रभ सखि ! जायते,
मुररिपुरहित तस्माद् भद्रे समाह्वय त हरिम् ॥ ४७० ॥

इति सुललितम् २०८

२०९ अथ उपवनकुसुमम्

सलिलनिधिपरिमित-नगणमिह विरचय,
तदनु च रसनिगदितलघुमपि कलय ।
कविजनहितसकलफणिपतिकथितमिह,
हृदि कलय सुललितमुपवनकुसुममिति ॥ ४७१ ॥

यथा–

असितवसनवरललितहलमुशलधर !,
निजतनुरुचिविर्जितपुरमथनगिरिवर ! ।
द्विविदकपिवरकदनकर ! नवरुचिचय !,
जय ! जय ! कुरुनरपतिनगरजनितभय ! ॥ ४७२ ॥

इति उपवनकुसुमम् २०९.

---

१ ख दम्भोल्यकुशकेतनाब्जनुचिर सच्छोभमसमम् ।

'अत्रापि प्रस्तारगत्या अष्टादशाक्षरस्य सप्तद्वयं द्वापष्टिसहस्राणि चतुश्चत्वा रिंशदुत्तरं च शत २६२१४४ भेदास्तेषु कियन्तो भेदा प्रोक्ता शेषभेदास्तूह्या सुधीभिरिति दिक ।*'

इति अष्टादशाक्षरम् ।

अथ एकोनविंशाक्षरम्

तत्र प्रथमम्–

२१ अथ नागानन्दः

भववानां सल्याका यस्मिन् सर्वस्मिन् पादे संदृश्यन्ते कर्णाः
पश्चाद् बाणे संप्रोक्ता हारा युक्ता रत्नैर्भू म्या प्रोक्ता वर्णाः ।
सर्वेषां नागानामीशेनैतत् प्रोक्तं नागानन्दाख्यं वृत्तं,
विद्वेषां मध्ये कृत्वा समज्जस्यानन्दानां धारां राध्रौ चित्तम् ॥ ४७३ ॥

यथा–

जैनप्रोक्तानां धर्माणां सर्वेभ्यो लोकेभ्यः शिक्षां संदास्यन्
यज्ञानां हिंसाक्तानां तन्मूलानां वेदानां वा निन्दां कुर्वन् ।
सर्वस्मिंस्त्रैलोक्ये भूतानां रक्षारूपां धर्मनिष्ठामास्यन्
कल्याणं कुर्यात् सोऽयं गोविन्द श्रीबुद्धो बोधाभिख्यां गृह्णन् ॥४७४॥

इति नागानन्दः २१

२११ अथ शार्दूलविक्रीडितम्

कर्णं कुण्डलपुष्पगन्धललितं हारं च वक्षोरुहे
हस्तं कङ्कणयुग्मसुस्वरतरं सब्दोल्लसन्नूपुरी ।
रूपाढ्यो रसना तथैव च यत्रातीक्ष्णांशुविच्छेदित,
श्रीमत्पिङ्गलसमाधितं विजयते शार्दूलविक्रीडितम् ॥ ४७५ ॥

यथा

ते राजप्रतिपक्ष'कीर्तिततिमीतिस्फीतिरपिण्डाकृति
र्ह्याम्बाजितिमसत्करम्बनिहितहस्तेताम्बजप्रोज्ज्वलम् ।
तन्वीमण्डलपाण्डुरद्युतिपुरस्फूर्जद्विभोर्मण्डलं
राहोर्मण्डक(ल)सज्जमेतदुदयत्यासण्डसाधाभुजे ॥ ४७६ ॥

१ पठितवर्णं नास्ति क प्रतौ । २ ख राजस्ते परिपूर्णकीर्ति ।

*टिप्पणी—१ अष्टादशाक्षरछन्दस्य ग्रन्थान्तरेषूपलब्धभेदभेदाः वक्ष्यमपरिशिष्टे द्रष्टव्याः ।

यथा वा, ममैव पाण्डवचरिते अर्जुनागमने द्रोणवाक्यम्—

ज्ञान यस्य ममात्मजादपि जना. शस्त्रास्त्रशिक्षाधिक,
पार्थः सोऽर्जुनसज्ञकोऽत्र सकलैः कौतूहलाद् दृश्यताम् ।
श्रुत्वा वाचमिति द्विजस्य कवची गोधाङ्गुलित्राणवान्,
पार्थस्तूणशरासनादिरुचिरस्तत्राजगाम द्रुतम् ।। ४७७ ।।

यथा वा, कृष्णकुतूहले—

उन्मीलन्मकरध्वजव्रजवधूहस्तावधूताञ्चल-
व्याजोदञ्चितबाहुमूलकनकद्रोणीक्षणादीक्षणे ।
उद्यत्कण्टककैतवस्फुटजनानन्दादिसख्यामित-
ब्रह्माद्वैतसुखश्चिर स भगवाश्चिक्रीड तत्कन्दुकैः ।। ४७८ ।।

इत्यादि महाकविप्रबन्धेषु सहस्रश उदाहरणानि प्रत्युदाहरणत्वेन[1] द्रष्टव्यानि ।

इति शार्दूलविक्रीडितम् २११.

२१२. अथ चन्द्रम्

प्रतिपदमिह कुरु नगणत्रितयमथ कलय,
जगणमिह नगणयुगल तदनु च विरचय ।
चरणविरतिमनु रुचिर कुसुममथ वितनु,
सकलफणिनृपतिकृत-चन्द्रमिति शृणु सुतनु ! ।। ४७९ ।।

यथा –

नवकुलवनजनितमन्दमरुदिह वहति,
किरणमनुकलयति विधुस्त्रिजगति सुमहति ।
सपदि सखि ! मम निजहित वचनमनुकलय,
समनुसर वनगतहरिं तनुमतिसफलय ।। ४८० ।।

यथा वा, भूषणे[1]*—

अनुपहृतकुसुमरसतुल्यमिदमधरदल-
ममृतमयवचनमिदमालि विफलयसि चल ।
यदपि यदुरमणपदमीश मुनिहृदि लुठति,
तदपि तव रतिवलितमेत्य वनतटमटति ।। ४८१ ।।

इति चन्द्रम् २१२

चन्द्रमाला इत्यस्यैव नामान्तर पिङ्गले*[2] ।

---

१ ख 'प्रत्युदाहरणत्वेन' नास्ति ।

टिप्पणी—१ वाणीभूषणम्, द्वितीयाध्याय, पद्य ३००
टिप्पणी—२ प्राकृतपैंगलम्, परिच्छेद २, पद्य १९०

२१३ अथ चवलम्

द्विजवरगणमिह रचय जलनिधिपरिमितं
तदनु कलय सगणमथ चरणविरतिगतम् ।
सकलकविकुलहृदयसुखविलुठनकरणं
फणिपतिभणित-चवलमिह शृणु सुखकरणम्[1] ॥ ४८२ ॥

यथा–

घनमिह कलय सखि ! कनकयुतमिव विमलं,
गगनतलमपि विगतजलधरमतिचपलम् ।
गतघनरचनमिदमपि शिखिकुलमबलं
नवमधुरिदमथ मम कुसुमविशिखतरलम् ॥ ४८३ ॥

यथा वा भूषणे[1]—

उपगत इह सुरभिसमय इति सुमुखि ! वदे
निधुवनमपि सह पिब मधु वहि रयमपदे ।
कमलमयमनुसर सखि ! तव रमसपरं
प्रियतमगृहगममुचितमनुचितमपरम् ॥ ४८४ ॥

इति चवलम् २१३

चवला इति पिङ्गले * ।

२१४ अथ शम्भुः

कुरु हस्तं स्वर्णविराजत्कङ्कणपुष्पोपवृगन्धैर्युक्तं
श्रवणं ताटङ्कसुरम्यप्राप्तरसं हारश्च पश्चात् ।
रसनायुग्मं कनकैर्मात्यन्तविराजवृवक्राभ्यां प्रान्ते
नवभूषणैं कथितं नागाधिपसम्भाषणं वृत्तं कान्ते ! ॥४८५॥

यथा–

नवसन्ध्या यक्षिभीत्या पश्चिमसिन्धौ मित्रे संमग्ने
नलिनीयं पङ्कजनेत्रं मीलयतीवात्यन्तं शोकेन ।
हरितो यस्य पतमीमाना विस्तैरम्भौनीव संयमु[2]
वरभूस्योश्वाम्बरमुच्चमनुसमूहारक्तं संयमु ॥ ४८६ ॥

---

१ ख. सुखकरणम् । २ ख संयमु ।

*टिप्पणी—१ वाणीभूषणम् द्वितीयाध्याय पद्य १२
२ प्राकृतपैङ्गलम् परि २ पद्य १६९

यथा वा*[1]–

जय ! मायामानवमूर्ते दानववंशध्वंसव्यापारी[1],
बलमाद्यद्रावणहृत्याकारण[2]लङ्कालक्ष्मीसंहारी[3] ।
कृतकंसध्वंसन-कर्मशंसन-गो-गोपी-गोपानन्दी[4],
बलिलक्ष्मीनाशन-लीलावामन-दैत्यश्रेणीनिष्कन्दी[5] ॥ ४८७ ॥

इति शम्भु २१४

२१५ अथ मेघविस्फूर्जिता

यकारं संदेहि प्रथममथ मं देहि पश्चान्नकारं,
करं तस्याप्यन्ते रचय रुचिरं रेफयुग्मं ततोपि ।
गुरुं तस्याप्यन्ते कलय ललितं षड्रसच्छेदयुक्तं,
कुरु च्छन्दः सारं फणिपकथितं मेघविस्फूर्जिताख्यम् ॥ ४८८ ॥

यथा–

विलोलै[6] कल्लोलैस्तरणिदुहितुः क्रीडनं कारयन्तं,
लसद्वंशं कंसप्रभृतिकठिनान् दानवानर्दयन्तम् ।
सुराणां सेन्द्राणां ददतमभयं पीतवस्त्रं दधानं,
सलीलं विन्यासैश्चरणरचितैर्भूमिभागं पुनानम् ॥ ४८९ ॥

यथा वा, कविराक्षसकृतदक्षिणानिलवर्णने—

उदञ्चत्कावेरीलहरिषु परिष्वङ्गरङ्गे लुठन्तः
कुहूकण्ठीकण्ठीरवरवलवत्रासितप्रोषितेभाः ।
अमी चैत्रे मैत्रावरुणितरुणीकेलिकङ्केल्लिमल्ली-
चलद्वल्लीहल्लीसकसुरभयश्चण्डि चञ्चन्ति वाताः ॥४९०॥

इत्यादि ।

इति मेघविस्फूर्जिता २१५

२१६ अथ छाया

सुरूपाढ्यं कर्णं कनकललितं ताटङ्कयुग्मान्वितं,
द्विजं गन्धं स्वर्णं वलययुगलं पुष्पाढ्यहारद्वयम् ।
दधाना पादान्ते ललितविरुतप्रोद्भासितं नूपुरं,
रसैः षड्भिश्छिन्ना फणिपकथिता छाया सदा राजते ॥४९१॥

---

१ ख. व्यापारिन् । २ ख हिंसाकारण । ३ संहारिन् । ४ ख गोपानन्दिन् । ५ ख निष्कन्दिन् । ६ ख वधूटी ।

*टिप्पणी—१ वाणीभूषणम्, द्वितीयाध्याय, पद्य ३०४

यथा–

भवच्छेदे दक्षं दितिसुतकुलध्वान्तस्य विध्वसने,
सदाक्षोभ वक्षःस्थलगतलसद्वत्नांशुभिभू पितम् ।
वधूभिर्गोपानां तरणितनयाकुञ्जेषु रासस्पृह
सदा नन्दादीनाममितसुखदं गोपालमेव भजे ॥ ४६२ ॥

इति धम्या २१६

२१७ अथ सुरसा

कर्णद्वन्द्व विराजत् कुसुमसुललित कुण्डलयुग
सभिप्राणा ततोपि द्विजमथ च करं कङ्कणयुतम् ।
रूपाढ्या दिव्यरावा कुसुमविलसिता नूपुरयुता
धीमैरश्वस्य बाणैर्विरचितविरतिर्भाति सुरसा ॥ ४६३ ॥

यथा–

गोपाल केलिलोलं व्रजजनतरुणी-रासरसिक
कालिन्दीये निकुञ्जे पशुपसुलगणैर्वेष्टिततनुम् ।
वशीरावेण गोपीसुललितमनसां मोहनपरं
कंसादीनामराति व्रजपतितनय नौमि हृदये ॥ ४६४ ॥

इति सुरसा २१७

२१८ अथ फुल्लदाम

कर्णौ स्वर्णाढ्यौ कुसुमरसमयौ रूपरावान्वितौ चेद्
पुष्पोद्यद्रूपौ कनकविरचित नूपुर पुष्पदामम् ।
हारौ रावाढ्यौ विलसदमलगौ कङ्कणेनातिरम्यौ
धास्वल्लोकानां सुकविततुल फुल्लदाम प्रसिद्धम् ॥ ४६५ ॥

यथा–

दीव्यद् देवानां परमधनकरं कामपूरं जनानां
धास्वद्भक्तानां परिकलितकलाकौशलं कामिनीनाम् ।
विद्यामन्दानां परम[१] निलयनं वेदगम्यं पुराणं
पुण्यारण्यानां गहनमहिमं नौमि मूर्द्ध ना मिताम्तम् ॥४६६॥

इति फुल्लदाम २१८

१ 'विद्यामानन्दानां परम' इति मालित क प्रतौ ।

२१६ अथ मृदुलकुसुमम्

रचय नगणमिह रसपरिमित[1]मनुकलय,
शिशिरकिरणरचित कुसुमगणनमपि कुरु ।
सकलभुजगनरपतिकथितमिदमतिशय-
सुललितमृदुलकुसुममिति हृदि परिकलय ॥ ४६७ ॥

यथा–

अयि ! सहचरि ! निरुपममृदुलकुसुमरचित-
मनुकलय सरसमलयजकणलुलितमिति ।
वरविपिनगततरुवरतलकलितशयन-
मनुसर सरसिजनयनमनुपमगुणमिह ॥ ४६८ ॥

इति मृदुलकुसुमम् २१६

[2]अत्रापि प्रस्तारगत्या एकोनविंशत्यक्षरस्य लक्षपञ्चक चतुर्विंशतिसहस्राणि अष्टाशीत्युत्तर शतद्वय ५२४२८८ भेदास्तेषु कतिपयभेदा प्रोक्ता, शेषभेदाः सुधीभि प्रस्तार्य उदाहरणीया, इत्युपदिश्यते[1]* ।

इत्यूनविंशत्यक्षरम् ।

अथ विंशाक्षरम्

तत्र प्रथमम्–

२२० योगानन्द

यस्मिन् वृत्ते दिक्सख्याता सलग्ना शोभन्तेऽत्यन्त पूर्णा कर्णा-
स्तद्वल्लीलालोले पादप्रान्ते विख्याता ख्याप्यन्ते नख्या वर्णा ।
श्रीमन्नागाधीशप्रोक्त विद्वत्सार हारोद्धार धेहि स्वान्ते,
तद्वद्वृत्त योगानन्द सर्वानन्दस्थान धैर्याधान कान्ते ! ॥४६६॥

यथा–

वन्देऽह त रम्य गम्य कान्त सर्वाध्यक्ष देव दीप्त धीर,
नाथ नव्याम्भोदप्रख्य काम श्रव्य राम मिश्र सेव्य वीरम् ।
सर्वाधार भव्याकार दक्ष पाल कसादीना काल बाल,
आनन्दाना कन्द विद्यासिन्धु सेवे येन क्षिप्त मायाजालम् ॥५००॥

इति योगानन्द २२०

---

१ ख परिगनु । २ पङ्क्तित्रय नास्ति क प्रतौ ।

*टिप्पणी—१ लभ्यशेषभेदा पञ्चमपरिशिष्टे विलोकनीया ।

२२१ अथ गीतिका

कुरु हस्तसमिसुघन्नुकद्रूमरपरावसमन्वित
वरपक्षिराजविराजित मवगम्भयुग्मविभूषितम् ।
कुरु मल्लकोरवधारिण रसमुग्धसुन्दरस्र्पिणो
रवमुक्तनूपुरमत्र मेहि विधेहि मामिमि ! गीतिकाम् ॥ ५०१ ॥

यथा–

अयि ! मुञ्च माममवेहि धाममुपैहि कुञ्जगत हरिं
नवकञ्जधारविलोचनं भयमोचनं भवसन्तरिम् ।
कुरुषे विलम्बमकारण सखि ! साधयाशु मनोरथं
ननु खिद्यसेऽतिमृषा वृथा जनुर्वियारयसे कथम् ॥ ५०२ ॥

यथा वा–

असमीश-पावक-पाकशासन-वारिजासनसेवया
गमित जनुर्जमकास्मजापतिरप्यसेव्यत मो मया ।
करुणापयोनिधिरेक एव[1] सरोजदामविलोचन
स परं करिष्यति दु:खशेष मशेषदुर्गतिमोचम ॥ ५०३ ॥

अथ सालसालतमालवञ्जुलकोविदारमनोरमा' इत्यादि । शिष्टो काव्ये च प्रत्युदाहरण[3]मिति ।

इति गीतिका २२१

२२२ अथ गण्डका

हारपुष्पसुन्दर विधेहि त मनोहरं मनोहरेण
नागराजकुम्भरेण भावित च रेण मत्पयोधरेण ।
अन्तगेन चामरेण राजितं विराजितं च काहलेन
गण्डकेति यस्य नाम धारितं सुपण्डितेन पिङ्गलेन ॥ ५०४ ॥

यथा–

देव! देव[2] वासुदेव! ते पदाम्बुजद्वयं विभावयेम
नाम पुष्पदाम[4]धामतेजसा सदा हृदा विधारयेम ।
तावदेव सारवस्तु नाग्यदस्ति किञ्चनात्र धारितेन
वाजिराजिकुञ्जरादिसाधनेन तेन किं विभावितेन ॥ ५ ५ ॥

---

१ क एक । २ क दुःखनाय । ३ क तदुदाहरणम् ४ क पुष्पदाम ।

*टिप्पणी– १ एतस्यास्य निर्दिष्टलक्षणकारिका परिस्फुटा नैवास्ति किन्तु पञ्चचर्णमेव भीष्ट तदुदाहरणेनैव परिज्ञायते—'पञ्चस्वपि हारपुष्पयोः(ऽ) नवधारमनु क्रमेण यगण तदनु चामर-काहलयो.(ऽ)न्यतम कमेणात् गण्डकावृत्त स्यादिति ।

यथा वा, भूषणे[1]* प्रत्युदाहरणम्—

दृष्टमस्ति वासुदेव विश्वमेतदेव शेष[वक्त्र]क तु',
वाजिरत्नभृत्यदारसूनुगेहवित्तमादिवन्नव तु ।
त्वत्पदाब्जभक्तिरस्तु चित्तसीम्नि वस्तुतस्तु सर्वदैव,
शेषकाललुप्तकालदूतभीतिनाशनीह हन्त सैव ॥ ५०६ ॥

क्वचिदियमेव चित्तवृत्तम् इति । केवल वृत्तमात्रमन्यत्र[2]* ।

इति गण्डका २२२.

२२३. अथ शोभा

यकार प्रागस्ते तदनु च मगण कथ्यते यत्र बाले !,
ततोऽपि स्यात् पश्चाद् यदि नगणयुग स्यात्तकारद्वय च ।
ततश्चान्ते हारद्वयमुपरितन कारयाशु प्रकाम,
रसैरश्वैश्छिन्ना मुनिविरतिगता भासते काऽपि शोभा ॥५०७॥

यथा–

रमाकान्त वन्दे त्रिभुवनशरण शुद्धभावैकगम्यं,
विरञ्चे स्रष्टार विजितघनरुचि वेदवाचावगम्यम् ।
शिव लोकाध्यक्ष समरविजयिन कुन्दवृन्दाभदन्त (वदात),
सहस्रार्चीरूप विधृतगिरिवर हार्दकञ्जे वसन्तम् ॥ ५०८ ॥

इति शोभा २२३.

२२४ अथ सुवदना

आदौ मो यत्र बाले ! तदनु च रगणो जङ्घासुघटितः,
पश्चाद्देयो नकारस्तदनु च यगणस्तातेन रचित ।
कार्यौ तत् पार्श्वदेशे तदनु लघुगुरू ज्ञेया सुवदना,
नागाधीशेन नुन्ना नखमितचरणा नव्या सुमदना ॥ ५०९ ॥

यथा–

श्रीमन्नारायण त नमत बुधजना ससारशरण,
सर्वाध्यक्ष वसन्त निजहृदि सदय गोपीविहरणम् ।
कल्याणाना निधान कलिमलदलन वाचामविषय,
क्षीराब्धौ भासमान दमितदितिसुत वेदान्तविषयम् ॥ ५१० ॥

---

१ शेषवक्त्रभाजि 'वाणीभूषणे' ।

*टिप्पणी—१ वाणीभूषणम्, द्वि० अ०, पद्य ३०८

२ छन्दोमञ्जरी, द्वि० स्तबक, का० २०६ एव वृत्तरत्नाकर', अ० ३, का १०३

यथा वा हलायुधभट्टविरचितछन्दोवृत्तौ''*—

या पीनाङ्गोत्तुङ्ग'स्तनजघनघनाभोगालसगति
यस्याः कर्णावतंसोत्पलरुचिजयिनी दीर्घे च नयने ।
सीमा सीमन्तिनीनां सकलजहृदया या च त्रिभुवने
सम्प्राप्ता साम्प्रतं मे नयनपथमसौ दैवात् सुवदना ॥ ५११ ॥

इति सुवदना २२४

२२५ अथ प्लवङ्गभङ्गमङ्गलम्

यदा लघुगुरु निवेश्यते तदा प्लवङ्गभङ्गमङ्गल
जरौ जरौ जरौ रसप्रयुक्तमुच्यते भगी सुमङ्गलम् ।
कवीन्द्रपिङ्गभोदितं सुचङ्गहारभूषितं मनोहरं
प्रमाणिका-पदद्वयेन पूर्यते च यच्च पञ्चचामरम् ॥ ५१२ ॥

यथा–

नवीनमेघसुन्दरं भजेम भूपुरन्दरं विभुं वरं
प्रकामधामभासुरं दयाममद्भुताम्बरं दयापरम् ।
विभासिनीभुजान्तरानिरुद्धमुग्धविग्रहं स्मरातुरं
चराचरादिजीवजातपातकापहं जगद्गुरुं परम् ॥ ५१३ ॥

इति प्लवङ्गभङ्गमङ्गलम् २२५

२२६ अथ शशाङ्कचलितम्

कर्णं पयोधरकरौ यदा च भवतो विलासललिते
स यस्तत सुतनु ! जं सुहस्तकथितं शशाङ्कचलिते ।
ततोऽपि चेद् भवति जं सुपाणिघटितो वसौ च विरति
स्ततो रसैरपि यतिं कलावति भवेत् पुनः रसमति ॥५१४॥

यथा–

कृष्णं प्रणौमि सततं जनेन सहितं सदा शुभरतं
कल्याणकारिचरितं सुरैरभिनुतं प्रमोदमणितम् ।
कलादिदर्पदलनं च कलाकुतुकिनं विलासभवनं
संसारपारकरणं परोदमकरं सरोजनयनम् ॥ ५१५ ॥

इति शशाङ्कचलितम् २२६

---

१ मा पीनो नतङ्गुङ्ग 'हलायुधे । २ यस्याः सीमन्तिनीनां 'हलायुधे । ३ क
प्रदमुदं वरम् । ४ क चरितम् ।

*टिप्पणी—१ अध्याय ७ कारिकायां २१ उदाहरणम् ।

२२७. अथ भद्रकम्

वेदसुसम्मितमादिगुरु कुरु जोहल कमल प्रिये !,
अन्तगत कुरु पुण्यसुकङ्कणराजित विजितक्रिये ।
रन्ध्ररमैरपि वाणविभेदितविशक कुरु वर्णक,
कामकलारसरासयुते निजमानसे कुरु भद्रकम् ॥ ५१६ ॥

यथा–

चेतसि पादयुग नवपल्लवकोमल किल भावये,
मञ्जुलकुञ्जगत सरसीरुहलोचन ननु चिन्तये ।
आनय नन्दसुत सखि! मानय मेदुर रजनीमुख,
कुञ्चितकेशममु परिशीलय कामुक कुरु मे सुखम् ॥ ५१७ ॥

इति भद्रकम् २२७

२२८. अथ अनवधिगुणगणम्

रसपरिमितमिति सरसनगणमिति[१] विरचय,
विकचकमलमुखि ! लघुयुगमनुमतमनुनय ।
सुतनु ! सुदति ! यदि निगदसि वहुविधमनवधि-
गुणगणमनुसर नखलघुमितमनुलवमयि ! ॥ ५१८ ॥

यथा–

अनुपमगुणगणमनुसर मुरहरमभिनव-
मभिमतमनुमत[२]मतिशयमनुनयपरमव ।
सकपटयदुवरकरधृतगिरिवरपरमयि,
कुरु मम सुवचनमफलय सखि न हि न हि मयि ॥ ५१९ ॥

इति अनवधिगुणगणम् २२८.

[३]अत्रापि प्रस्तारगत्या विंशत्यक्षरस्य दशलक्षमष्टचत्वारिंशत्सहस्राणि षट्-सप्तत्युत्तराणि पञ्चशतानि च १०४८५७६ भेदा भवन्ति, तेषु चाद्यन्तसहिता विस्तरभीत्या कियन्तो भेदा लक्षिता, शेषभेदाः सुबुद्धिभि प्रस्तार्य सूचनीया इति दिक् ।[१*]

इति विंशाक्षरम् ।

---

१ ख मिह । २ ख मनुगत । ३ पक्तिचतुष्टय नास्ति क प्रतौ ।

*टिप्पणी—१ लब्धशेषभेदा पञ्चमपरिशिष्टे समालोकनीया ।

अथ एकविंशाक्षरम्

तत्र प्रथमम्—

२२१ अथ ब्रह्मानन्द

यस्मिन् वृत्ते पङ्क्ति स्याता तोमन्तेऽयमन्त कर्णा प्रान्ते चैकोहार
नागाधीशप्रोक्तोऽपार सारोद्धारो ब्रह्मानन्दो वृत्तानां सार ।
विश्रामश्च प्रायो यस्मिन् वेद योर्नै शलेन्द्रै शस्त्रैर्वा स्यात् प्रान्ते
विंशत्या वर्णैरेकाग्रै सयुक्तैर्लीलालोले सोऽयं ज्ञेय कान्ते ॥२२०॥

यथा–

सर्वं कामव्यासग्रस्त मत्वा स्त्रीषु व्यासङ्ग हित्वा कृत्वा धैर्यं
कालीन्दीये कुञ्जे कुञ्जे भ्राम्यद्भृङ्गे सगीते भ्रातृम् मत्वा कौयम् ।
श्रीगोविन्द वृन्दारण्ये मेघश्याम गायन्त वेणुक्वाणैर्मन्द
ब्रह्मानन्द प्राप्याचल ध्यात्वा चेत साफल्य चेहि स्वान्तेऽमन्दम ॥२२१

इति ब्रह्मानन्द २२१.

२१ अथ स्रग्धरा

आदौ मो यत्र बाले ! तदनु च रगण स्याद् प्रसिद्धस्तु यस्मा
पश्चाद् मं चापि नं च त्रिगुणितमपि यं धेहि कान्ते ! विचित्रम् ।
शैलेन्द्रै सूर्यवाहैरपि च मुनिगणैर्द् श्यते चेद् विराम
कामव्यासक्तचित्त युवति ! निगदिता स्रग्धरा सा प्रसिद्धा ॥२२२॥

यथा ममैव पाण्डवचरिते—

दृष्टेनाथ द्विजेन त्रिदशपतिसुतस्तत्र वत्राभ्यगुञ्ज
कर्णोऽपि प्राप्तमानस्सदसि कुरुपतेर्दैवयुद्धार्थमागाद् ।
जम्भाराति स्वसूनोरुपरि जलधरैस्सव्यधाद्वातपत्र
चण्डांशुश्चापि कर्णोपरिमितकिरणानाततानातिपीडाद् ॥२२३॥

यथा वा मत्पितु रूकवर्णने—

सक्प्रामारण्यचारी विकटभटभुजस्तम्भभूभृद्विहारी
शत्रुक्षोणीशचेतोमृगनिकरपरानन्दविक्षोभकारी ।
मातङ्गमातङ्गकुम्भस्थलगलदमलस्थूलमुक्ताप्रहारी
स्फारीभूताङ्गधारी जगति विजयते रङ्गपञ्चाननस्ते ॥ २२४॥

यथा वा, कृष्णकुतूहले—

केशिद्वेषिप्रसूश्च क्वचिदथ समये सद्मदासीषु कार्य-
व्यग्रासु प्रग्रहान्तग्रहणचलभुजाकुण्डलोद्ग्रीवसूनु ।
पुत्रस्नेहस्नुतोरस्तनमनणुरणत्कङ्कणक्वाणमुद्यत्-
कम्पस्विद्यत्कपोल दधिकचविगलद्दामबन्ध ममन्थ ॥५२५॥

इति स्रग्धरा २३०.

२३१. अथ मञ्जरी*1

कङ्कण कुरु मनोहर तदनु सुन्दर रचय तुम्बुर,
सुन्दरी कलय सुन्दरी तदनु पक्षिणामपि पति तत ।
भावमातनु तत पर सुतनु ! पक्षिण च कुरु सङ्गत,
भावमेव कुरु मञ्जरी [तदनु] जोहल विरचयातत ॥५२६॥
रगणनगणक्रमेण च सप्तगणा भान्ति यत्र सरचिता ।
नव-रस-रसयतिसहिता वदन्ति तज्ज्ञास्तु मञ्जरीमिति ताम् ॥ ५२७ ॥

यथा—

हारनूपुरकिरीटकुण्डलविराजिता वरमनोहर,
सुन्दराधरविराजिवेणुरवपूरिताखिलदिगन्तरम् ।
नन्दनन्दनमनङ्गवर्द्धनगुणाकर परमसुन्दर,
चिन्तयामि निजमानसे रुचिरगोपगोधनधुरन्धरम् ॥ ५२८ ॥

यथा वा, श्रीशङ्कराचार्याणा नवरत्नमालिकायाम्—

दाडिमीकुसुममञ्जरीनिकरसुन्दरे मदनमन्दिरे,
यामिनीरमणखण्डमण्डितशिखण्डके तरलकुण्डे (कुण्डले) ।
पाशमकुशमुदञ्चित दधति कोमले कमललोचने !
तावके वपुषि सन्तत जननि ! मामक भवतु मानसम् ॥५२९॥

इति मञ्जरी २३१

२३२ अथ नरेन्द्र

कुण्डलवज्ररज्जुमुनिगणयुतहस्तविराजितशोभ,
पाणिविराजिशखयुगवलयित-कङ्कणचामरलोभ ।
कामविशोभयोगवरविरतिगचन्द्रविलोचनवर्ण,
पन्नगराजपिङ्गल इति गदति राजति वृत्तनरेन्द्र ॥ ५३० ॥

---

*टिप्पणी—१ मञ्जरीवृत्तस्य लक्षणोदाहरणप्रत्युदाहरणानि नैव सन्ति क प्रतौ ।

अथ एकविंशाक्षरम्

तत्र प्रथमम्—

२२८. अथ ब्रह्मानन्द

यस्मिन् वृत्ते पङ्क्ति स्याता शोभन्तेऽप्यन्त कर्णाः प्रान्ते चकोहारः
नागाधीशप्रोक्तोऽपार सारोद्धारो ब्रह्मानन्दो वृत्तानां सारः ।
विश्रामश्च प्रायो यस्मिन् वेद श्रोत्रे शैलेन्द्रै वस्त्रैर्वा स्याद् प्रान्ते,
विख्यात्या वर्णैरेकाग्र संयुक्तैर्लीलालोले सोऽयं प्रेम कान्ते ।।१२०।।

यथा—

सर्वं कामव्यामग्रस्तं मत्वा स्त्रीषु व्यासङ्गं हित्वा कृत्वा धैर्यं
कालीन्दीये कुञ्जे कुञ्जे भ्राम्यद्भृङ्गे सगीते भ्रातुम् मत्वा क्षौमम् ।
श्रीगोविन्द वृन्दारण्ये मेघश्याम गायन्तं वेणुक्वाणैर्मन्दं
ब्रह्मानन्द प्राप्याजस्र ध्यात्वा चेत साफल्यं येहि स्वान्तेऽमन्दम् ।।१२१

इति ब्रह्मानन्द २२८.

२१ अथ स्रग्धरा

भादौ मो यत्र बाले ! तदनु च रगण स्याद् प्रसिद्धस्तु यस्मो
पश्चाद् भं चापि नं च त्रिगुणितमपि य येहि कान्ते ! विचित्रम् ।
शैलेन्द्रै सूर्यवाहैरपि च मुनिगणैर्दृश्यते चेद् विरामः,
कामव्यासक्तचित्ते सुवति ! निगदिता स्रग्धरा सा प्रसिद्धा ।। १२२ ।।

यथा ममैव पाण्डवचरिते—

दृष्टेनाथ द्विजेन त्रिदशपतिसुतस्तत्र दत्ताम्यनुज्ञ
कर्णोऽपि प्राप्यमानस्सदसि कुरुपतेर्द्रौ[illegible]युद्धार्थमागात् ।
जम्भारातिः स्वसूनोरुपरि जलधरैस्संव्यधादातपत्रं
चण्डांशुश्चापि कर्णोपरिनिजकिरणामातताना[illegible]विधीतात् ।।१२३।।

यथा वा मत्पितुः गङ्गावर्णने—

शम्भ्रामारण्यचारी विकटभटमुजस्तम्भभूभृद्विहारी
दानुश्रोणीन्[illegible]चेतोमृगनिकरगतानन्दविक्षोभकारी ।
माद्यन्मातङ्गकुम्भस्थलगलन्मसस्थूलमुक्तापहारी
स्फारोमूवारिपारी जगति विजयते गङ्गपञ्चाननरते ।। १२४ ।।

यथा वा, कृष्णकुतूहले—

केशिद्वेपिप्रमूञ्च क्वचिदथ रामये राधदासीपु कार्य-
व्यग्रासु प्रग्रहान्तग्रहणचलभुजाकुण्डलोद्ग्रीवसूनु. ।
पुत्रस्नेहस्नुतोरुस्तनमनणुरणत्कङ्कणक्वाणमुद्यत्-
कम्पस्विद्यत्कपोल दधिकचविगलद्दामवन्व ममन्थ ॥५२५॥

इति स्रग्धरा २३०.

२३१. अथ मञ्जरी*[1]

कङ्कण कुरु मनोहर तदनु सुन्दर रचय तुम्बुर,
सुन्दरी कलय सुन्दरी तदनु पक्षिणामपि पतिं तत ।
भावमातनु तत पर सुतनु ! पक्षिण च कुरु सङ्गत,
भावमेव कुरु मञ्जरी [तदनु] जोहल विरचयातत ॥५२६॥
रगणनगणक्रमेण च सप्तगणा भान्ति यत्र सरचिता ।
नव-रस-रसयतिसहिता वदन्ति तज्ज्ञास्तु मञ्जरीमिति ताम् ॥ ५२७ ॥

यथा–

हारनूपुरकिरीटकुण्डलविराजिता वरमनोहर,
सुन्दराधरविराजिवेणुरवपूरिताखिलदिगन्तरम् ।
नन्दनन्दनमनङ्गवर्द्धनगुणाकर परमसुन्दर,
चिन्तयामि निजमानसे रुचिरगोपगोधनधुरन्धरम् ॥ ५२८ ॥

यथा वा, श्रीशङ्कराचार्याणा नवरत्नमालिकायाम्—

दाडिमीकुसुममञ्जरीनिकरसुन्दरे मदनमन्दिरे,
यामिनीरमणखण्डमण्डितशिखण्डके तरलकुण्डे (कुण्डले) ।
पाशमकुशमुदञ्चित दधति कोमले कमललोचने !
तावके वपुपि सन्तत जननि ! मामक भवतु मानसम् ॥५२९॥

इति मञ्जरी २३१.

२३२ अथ नरेन्द्र

कुण्डलवज्ररज्जुमुनिगणयुतहस्तविराजितशोभ,
पाणिविराजिशखयुगवलयित-कङ्कणचामरलोभ ।
कामविशोभयोगवरविरतिगचन्द्रविलोचनवर्णं,
पन्नगराजपिङ्गल इति गदति राजति वृत्तनरेन्द्र ॥ ५३० ॥

---

*टिप्पणी—१ मञ्जरीवृत्तस्य लक्षणोदाहरणप्रत्युदाहरणानि नैव सन्ति क प्रतौ ।

मानिनि ! मानकारणमिह[1] जहिहि मन्दय त सखि ! कृष्ण
चिन्तय चिन्तनीयपदमनुमतमाकलयाशु सतृष्णम् ।
मोचय मोचजातमुपगतमपि मा कुरु मानसभङ्ग,
केवलमेव क्षेम सह सहचरि ! मन्तनु तत्तनुसङ्गम् ॥ ५३१ ॥

यथा वा–

पङ्कजकोषपानपरमधुकरगीतमनोज्ञतडाग
पञ्चमनादवादपर परभृतकाननसत्परभाग ।
वल्लभविप्रयुक्तकुसपरतमुभोमनयानदुरन्त
कि करवाणि सखि[2] मम सहचरि ! सन्निधिमेति वसन्त । ५३२।

इति नरेन्द्र २१२

२१३ अथ सरसी

सहचरि ! नो यदा भवति सा कथिता सरसी कवीश्वरै
यदि तु जभौ जजौ च भवतोपि भरौ समनन्तर परै ।
इह विरती यदा धरविलोचनजे भवतो मुनीश्वरै
शिशिरकरैस्तथा भवति लोचनतो गणमापदाक्षरै ॥ ५३३ ॥

यथा–

नमत सदा जना प्रणतकल्पतरु जगदीश्वरं हरिं,
प्रबलहृदन्धकारतरणि भवसागरपारसञ्चरिम ।
सकलसुरासुरादिजनसेवितपादसरोरुह परं
जलरुहशङ्खचक्रकमनीयगदाधरसुन्दराम्बरम् ॥ ५३४ ॥

यथा वा–

'तुरगशताकुलस्य परित' परमेकतुरङ्गजन्मन । इत्यादि माघकाव्ये[1] ।

इति सरसी २१३

सुरतरुरिति क्वचित् । सिद्धकम * इति क्वचित् ।

---

१ क मानकारिणिमिह । २ ख पञ्चमनादवादपर । ३ ख सखि

*टिप्पणी—१ 'तुरगशताकुलस्य परित' परमेकतुरङ्गजन्मन,
प्रमथितभूभृत प्रतिपथ मथितस्य भृशं महीभृता ।
परिचलतो बलानुजबलस्य पुर सतत धृतश्रिय
चिरविगतश्रियो जलनिधेश्च तदाभवदन्तरं महत् ॥ ८९ ॥
[शिशुपालवधम्–स १ प ८९]
२ वृत्तरत्नाकर, नारायणीटीकायाम्–अ ३ का १४

२३४. अथ रुचिरा

कुरु नगण ततो रचय भूमिपति दहन च सुन्दर,
तदनु विधेहि ज त्रिगुणितं ललित विहग तत परम् ।
मुनिमुनिभिर्भवेद्विरतिरप्यतुला सुकला मनोहरा,
सुकविवरैः परा निगदिता रुचिरा परमार्थतो वरा ।। ५३५ ।।

यथा–

नयनमनोहर परमसौख्यकर सखि ! नन्दनन्दन,
कनकनिभांशुक त्रिजगतीतिलक मुरलीविनोदनम् ।
भुवनमहोदय घनरुचि रुचिर कलये सदोन्नत[1],
सुरकुलपालक श्रुतिनुत सदयं दयित श्रिय पतिम् ।। ५३६ ।।

इति रुचिरा २३४

२३५ अथ निरुपमतिलकम्

सुतनु ! सुदति ! सरसमुनिमितनगणमिह रचय,
शिशिरकरजनयनमितमुपदमपि परिकलय ।
कनककटकवलयकलितकरकमलमुपनय,
फणिपतिभणितमिह निरुपमतिलकमिति कथय ।। ५३७ ।।

यथा–

जय ! जय ! निरुपम ! दिशि दिशि विलसितगुणनिकर !,
करधृतगिरिवर ! विगणितगुणगणवरसुकर ! ।
कनकवसनकटकमुकुटकलित ! मिलितललन !,
विजितमदन ! दलितशकट ! सबलदितिजदलन ! ।। ५३८ ।।

इति निरुपमतिलकम् २३५

[2]अत्रापि प्रस्तारगत्या एकविंशत्यक्षरस्य नवलक्ष सप्तनवतिसहस्राणि द्विसमधिकपञ्चाशदुत्तर शत २०९७१५२ भेदा भवन्ति, तेषु भेदसप्तक प्रोक्त, शेषभेदा. सुधीभिः स्वबुद्धया प्रस्तार्य सूचनीया इति दिक् ।*[1]

इति एकविंशाक्षरम् ।

---

१ ख सदोन्नति । २ पङ्क्तित्रय नास्ति क. प्रतौ ।

*टिप्पणी—१ एकविंशत्यक्षरवृत्तस्य ग्रन्थान्तरेषु लब्धशेषभेदा पञ्चमपरिशिष्टे द्रष्टव्या

अथ द्वाविंशत्यक्षरम्

तत्र प्रथमम्—

२१६ विद्यानन्द

यस्मिन् वृत्ते रुद्रप्रोक्ता कुन्तीपुत्रा नेत्रैर्नेत्रैर्वर्णाः पादप्रान्ते
पञ्चमि कर्णविश्राम स्यात् तद्वद् यस्मिन् रम्यः पाण्डो पुत्रैः स्यात् तस्यान्ते ।
भीमस्तागाधीशनाक सार वृत्त श्रव्य भव्य नव्य काम्य कान्ते !
बाले ! भीमासोले ! मुग्धे ! विद्यानन्द दिव्यानन्द सम्यग् मेहि स्वान्ते ॥२३९॥

यथा–

काशीक्षेत्रे गङ्गातीरे षण्मासीरे विश्वेशाङ्घ्रिद्वन्द्वं सम्यग् ध्यात्वा
कृत्वा तत्र मात्रायुक्तप्राणायाम शोध्य नस्यतत्तत्सङ्गं मुक्त्वा ।
मायाजाल सर्वं विश्व मत्वा चित्ते रम्य हर्म्यं पुत्रा किञ्चित्सैव
च्छद्मस्तकामक्रोधक्रौर्याक्रान्त भ्रान्त प्रान्ते नाहं देह सोऽहं तत्सत् ॥२४०॥

इति विद्यानन्द २१६

२१७ अथ हंसी

यस्यामष्टौ पूर्वं हारास्तदनु च दिनपतिमित वरवर्णाः,
दण्डाकाराः कान्ते ! चञ्चत्करयुगविलसितवलयविलोले ।
तद्वद्दीर्घावन्त्यौ वर्णौ *यतिरिह विलसति वसुभुवनार्णैः
सा विज्ञ या हंसी बाले ! प्रभवति यदि किल नयनभृगार्णा* ॥२४१॥

यथा–

प्रौढध्वान्ते प्रावृट्काले क्षितितलविलसिततरसितकन्दे
कालिन्दीये कुञ्जे कुञ्जे त्वदभिसरणकृत-सरसवेषा ।
राधा रम्या मायायुक्ता प्रसरति मनसिजविशिखविभूना
चन्द्रस्त्रग्भिर्विरचितमूपस्त्वमपि च विहरसि सरसकदम्बे*[१] ॥२४२॥

यथा वा–

श्रीकृष्णेन क्रीडल्लोला क्वचिदपि वनभुवि मनसिजभार्या
गोपालीनां चन्द्रगयोरस्माविसदरजनिगुरजमितरतीनाम् ।
धर्मभ्रदयनुपत्रामीनामुपचितरमणविमलतनुभाजां
रागश्रीणामागण्यानां मुदमुपनयति[१] मलयगिरिवात ॥२४३॥

इति हंसी २१७

---

*-*चिह्नगतोऽयं पाठो नास्ति क प्रतौ । १ १ ख राकाश्रीणामाननचन्द्रतमुपनयमिव ।

टिप्पणी—१ पाठोऽयं तत्रचाम्भुज वर्णोऽयमर्द्धमात्रीकृत्यदित्याख्य । यतोऽयम्
पाठे यदि विरचित इत्यत्र 'गुप्ता' वरोऽयं स्यात्तदोपपत्तिरिहाप्यत्र ।

२३८ अथ मदिरा

आदिगुरुं कुरु सप्तगण सखि ! पिङ्गलभापितमन्तगुरु,
पक्तिविराजि-र्यति च तत कुरु सूर्यविभासियर्ति च तत. ।
चिन्तय चेतसि वृत्तमिद मदिरेति च नाम यत प्रथित,
सप्तभकारगुरूपहित बहुभि कविभिर्वहुधा कथितम् ॥ ५४४ ॥

यथा–

मा कुरु मानिनि ! मानमये वनमालिनि सन्तति[1]शालिनि हे,
पाणितलेन कपोलतल न विमुञ्चति सम्प्रति किं मनुपे ।
यौवनमेतदकारणक न हि किञ्चिदतोऽपि फल तनुपे,
कुञ्जगत परिशीलय त परिलम्बमिद सखि ! किं कुरुपे ॥ ५४५ ॥

इति मदिरा २३८

इयमेव अस्माभिर्मात्राप्रस्तारे पूर्वखण्डे सवयाप्रकरणे मदिराभिसन्धाय सवया इत्युक्ता, सा तत एवाववारणीया ।

२३९. अथ मन्द्रकम्

कारय भ ततोपि रगण ततो नरनरास्ततश्च न-गुरू,
दिग्रविभिर्भवेच्च विरतिर्विलोचनयुगैरपीन्दुवदने ! ।
कल्पय पादमत्र रुचिरं कवीन्द्रवरपिङ्गलेन कथित,
मन्द्रकवृत्तमेतदवले ! सुभापितमहोदधे सुमथितम् ॥ ५४६ ॥

यथा–

दिव्यसुगीतिभि सकृदपि स्तुवन्ति भवये(भुवि ये) भवन्तमभय,
भक्तिभरावनम्रशिरस कृताञ्जलिपुटा निराकृतभवम् ।
ते परमीश्वरस्य पदवीमवाप्य सुखमाप्नुवन्ति विपुल,
भु　　स्पृशन्ति न पुनर्मनोहरसुताङ्गनापरिवृता ॥ ५४७ ॥

इति मन्द्रकम् २३९

२४०. अथ शिखरम्

मन्द्रकमेव हि वृत्त यदि दशरसयुगविरति भवेत् ।
शिखर तदत्र बाले ! कथित कविपिङ्गलेन तदा ॥ ५४८ ॥

---

१ ख सन्ततिशालिनी ।

अथ द्वाविंशत्यक्षरम्

तत्र प्रथमम्—

२१६ विद्यानन्दः

यस्मिन् वृत्ते ख्याप्रोक्ता कुन्तीपुत्रा नेत्रैर्नेत्रैर्वर्णा पादप्रान्ते
पड्भिः कर्णविश्रामः स्यात् तद्वद् यस्मिन् रम्ये पाण्डोः पुत्रे स्यात् तस्यान्ते
श्रीमन्नागाधीशेनोक्तं सारं वृत्तं श्रव्यं भव्यं नव्यं काव्यं कान्ते !
बाले ! लीलालोले ! मुग्धे ! विद्यानन्दं दिव्यानन्दं सम्यग् धेहि स्वान्ते ॥१३...

यथा–

काशीक्षेत्रे गङ्गातीरे चञ्चन्नीरे विश्वेशाधिष्ठानं सम्यग् ध्यात्वा
कृत्वा सत्स्नानायुक्तप्राणायामं शोध्यं नश्यत्तत्सङ्गं मुक्त्वा ।
मायाजालं सर्वं विश्वं मत्वा चित्ते रम्यं धर्म्यं पुण्यं किञ्चिच्चैतत्
भक्तस्वान्तकामक्रोधक्षोभाक्रान्ता भ्रान्ता प्रान्ते माभूद् देहे छोड़ तत्तत् ॥१४०॥

इति विद्यानन्दः २१६

२१७ अथ हंसी

यस्यामष्टौ पूर्वं हारास्तदनु च दिनपतिमित वरवर्णा
दण्डाकाराः कान्ते ! चञ्चत्करयुगविलसितवसनविलोले ।
तद्वद्दीर्घावन्त्यौ वर्णौ *मतिरिह विलसति वसुभुवनार्णे
सा विज्ञ या हंसी वामे ! प्रभवति यदि किल नयनयुगार्णा* ॥१४१॥

यथा–

ग्रीष्मान्ते प्रावृट्काले क्षितितलविलसिततरसितकदम्बे
कालिन्दीये कुञ्जे कुञ्जे त्वदभिसरणकृत-सरभसवेषा ।
राधात्यन्तं बाधायुक्ता प्रसरति मनसिजविशिखविधुना
वन्यस्रग्भिर्विरचितभूषस्त्वमपि च विहरसि सरसकदम्बे*[1] ॥१४२॥

यथा वा–

श्रीकृष्णेन क्रीडल्लोला क्वचिदपि वनभुवि मनसिजभाजा
गोपालीनां वक्त्रज्योत्स्नाविशदरजनिगृहसमितरतीनाम् ।
चञ्चद्भ्रश्यत्स्रग्मालीनामुपचितरभसविमलतनुभासां
रासक्रीडायासश्रमी मुहुरुपनयति[1] मलयगिरिवातः ॥१४३॥

इति हंसी २१७

** चिह्नगतोऽयं पाठो नास्ति क प्रतौ । १ १ क रासक्रीडायाससम्बंसमुत्समुत्तमवमिद ।

टिप्पणी—१ वाटीत्र तवनाम्बुज वर्णद्वयस्य नाग्नीन्द्रमरद्दिनत्वाच्च । यतोऽतिभिन्
पादे यदि विरचित'पदरचना 'गुप्ता' पदयोजना स्यात्तदोक्तविकारसंभवः ।

यथा वा–

मन्दाकिनीपुलिनमन्दारदामशतवृन्दारकार्च्चितविभो[1]!
नारायणप्रखरनाराचदिह्वपुरनाराधिदुष्कृतवता ।
गङ्गाचलाचलतरङ्गावलीमुकुटरङ्गावनीमतिपटो[2]!
गौरीपरिग्रहणगौरीकृतार्द्धं नव गौरीदृशी श्रुतिगता ॥५५४॥

यथा वा, अस्मद्वृद्धप्रपितामहकविपण्डितमुख्यश्रीमद्रामचन्द्रभट्टकृतनारायणाष्टके-

कुन्दातिभासि शरदिन्दावखण्डरुचि वृन्दावनव्रजवधू-
वृन्दागमच्छलनमन्दावहासकृतनिन्दार्थवादकथनम् ।
वन्दारुविभ्यदरविन्दासनक्षुभितवृन्दारकेश्वरकृत-
च्छन्दानुवृत्तिमिह नन्दात्मज भुवनकन्दाकृतिं हृदि भजे ॥ ५५५ ॥

इत्यादि महाकविप्रबन्धेषु शतश प्रत्युदाहरणानि[3] ।

इति मदालसम् २४२

२४३ अथ तरुवरम्

सहचरि ! रविहयपरिमित सुनगणमिह विरचय,
तदनु शिशिरकरपरिमित कुसुममिह परिकलय ।
कविवरसकलभुजगपतिनिगदितमिदमनुसर,
नवरससुघटित-नरवरसुपठित-तरुवरमिति ॥ ५५६ ॥

यथा–

अवनतमुनिगण ! करधृतगिरिवर ! सदवनपर !,
त्रिभुवननिरुपम ! नरवरविलसित ! सकपटवर ! ।
दमितदितिजकुल ! कलितसकलबल ! सततसदय !,
सरभसविदलितकरिवर ! जय ! जय ! निगमनिलय ! ॥ ५५७ ॥

अत्र प्रायोऽष्टाष्टरसैर्विरतिरित्युपदेश ।

इति तरुवरम् २४३.

अत्रापि प्रस्तारगत्या द्वाविंशत्यक्षरस्य एकचत्वारिंशल्लक्षाणि चतुर्नवति-सहस्राणि चतुरुत्तर शतत्रय ४१९४३०४ भेदा, तेषु भेदाष्टकमुक्तम् । शेषभेदास्तु शास्त्ररीत्या प्रस्तार्य प्रतिभावद्भिरुदाहर्त्तव्या । इति दिङ्मात्रमुपदिश्यते[1]* ।

इति द्वाविंशत्यक्षरम् ।

---

१ ख विभा । २ ख गतिपटो । ३ ख तदुदाहरणम् ।

*टिप्पणी—१ लब्धा शेषभेदा द्रष्टव्या पञ्चमपरिशिष्टे ।

यथा–

कृष्णपदारविन्दयुगलं ममन्ति ननु ये जना गुरुविनं
संसृतिसागरं गुणिपूर्णं तरन्ति मुदितास्त एव हि तत्र ।
दिव्यपुरीवरमभ्युदिते तटे कृतकूटा रमरन्ति परमं,
धाम निरन्तरं मनसि तज्जरामरणमितं जनुर्नं परमम् ॥ २४९ ॥

इति विग्गरम् २४०

मत्तगयस्य गणा एव मत्रापि यतिपूर्व एव परं भेद ।

२४१ अथ अच्युतम्

रसयुग निगमनगणमिह[1][*] कुरु पदि-पाणिसमाजितं
तदनु च रचय ममसमुचि । सखि ! पुष्पहारविराजितम् ।
निगमशिखिरकरविरचितयतियोगबद्धविभावितं
कविवरफणिपतिसुमणितमिति[2] मानम कलयाच्युतम् ॥ २५० ॥

यथा–

शमनतिमिरभरभरितविपिनमात्मनव विभावितं
न सभु सहचरि ! वितनु विदलितमाश्रयामि सुजीवितम् ।
कनकनिभवसनमरुणनयनमामयामि मनोहरं
मसृणमणिगणखचिततनुमपि हारयामि तमोहरम् ॥ २५१ ॥

इति अच्युतम् २४१

२४२ अथ मदालसम्

कर्णं जकारं रसयुग्मं विधेहि सखि ! कर्णं ततः कुरु रसं
हारं नकारमथ कर्णं नरेन्द्रमिह हस्तं विधेहि च ततः ।
सूर्याश्वसप्तयति कुर्याद् यथाभिरुचि पश्चाद् वसौ च विरतिः
नेत्रद्वयेन कुरु पादान्तवर्णमिति वृत्तं मदालसमिदम् ॥ २५२ ॥

यथा–

शम्भो ! जय प्रणमदम्भोजनाभविधिदम्भोलिपाणिचरणे
रम्भोरुगाढपरिरम्भोपभोगदिवि रम्भोपगीतसततम् ।
स्तम्भोदयप्रणतजम्भोपमाति विधुदम्भोपकल्पिततनो !
रम्भोदरप्रतिमशम्भो ! जयामममविदम्भोधि[3]वर्धनविधो ! ॥ २५३ ॥

---

१ क सुभावितमिति । २ ख विरति । ३ ख कम्बी च याति । ४ ख चिदम्भोधि ।

टिप्पणी—१ रसयुगनिगमनगणमिह इह—अच्युतवृत्ते चतुर्गमनहितच तुर्नगणमर्थात् चतुर्दशलघ्वक्षरमत्र 'कुरु' रचयेत्यर्थः ।

यथा वा–

मन्दाकिनीपुलिनमन्दारदामगतवृन्दारकार्च्चितविभो[1]!
नारायणप्रखरनाराचविद्धपुरनाराधिदुष्कृतवता ।
गङ्गाचलाचलतरङ्गावलीमुकुटरङ्गावनीमतिपटो[2]!
गौरीपरिग्रहणगौरीकृतार्द्ध तव गौरीदृशी श्रुतिगता ॥५५४॥

यथा वा, अस्मद्वृद्धप्रपितामहकविपण्डितमुख्यश्रीमद्रामचन्द्रभट्टकृतनारायणाष्टके-

कुन्दातिभासि शरदिन्दावखण्डरुचि वृन्दावनव्रजवधू-
वृन्दागमच्छलनमन्दावहासकृतनिन्दार्थवादकथनम् ।
वन्दारुविभ्यदरविन्दासनक्षुभितवृन्दारकेश्वरकृत-
च्छन्दानुवृत्तिमिह नन्दात्मज भुवनकन्दाकृति हृदि भजे ॥ ५५५ ॥

इत्यादि महाकविप्रबन्धेषु शतश प्रत्युदाहरणानि[3] ।

इति मदालसम् २४२

२४३. अथ तरुवरम्

सहचरि ! रविहयपरिमित सुनगणमिह विरचय,
तदनु शिखिरकरपरिमित कुसुममिह परिकलय ।
कविवरसकलभुजगपतिनिगदितमिदमनुसर,
नवरससुघटित-नरवरसुपठित-तरुवरमिति ॥ ५५६ ॥

यथा–

अवनतमुनिगण ! करधृतगिरिवर ! सदवनपर !,
त्रिभुवननिरुपम ! नरवरविलसित ! सकपटवर ! ।
दमितदितिजकुल ! कलितसकलबल ! सततसदय !,
सरभसविदलितकरिवर ! जय ! जय ! निगमनिलय ! ॥ ५५७ ॥

अत्र प्रायोऽष्टाष्टरसैर्विरतिरित्युपदेश ।

इति तरुवरम् २४३.

अत्रापि प्रस्तारगत्या द्वाविंशत्यक्षरस्य एकचत्वारिंशल्लक्षाणि चतुर्नवति-सहस्राणि चतुरुत्तर शतत्रय ४१९४३०४ भेदा, तेषु भेदाष्टकमुक्तम् । शेषभेदास्तु शास्त्ररीत्या प्रस्तार्य प्रतिभावद्भिरुदाहर्त्तव्या । इति दिङ्मात्रमुपदिश्यते[1]* ।

इति द्वाविंशत्यक्षरम् ।

---

१ ख विभा । २ख गतिपटो । ३ ख तदुदाहरणम् ।
*टिप्पणी—१ लब्धा शेषभेदा द्रष्टव्या पञ्चमपरिशिष्टे ।

अथ त्रयोविंशाक्षरम्

तत्र पूर्वम्—

२४४ दिव्यानन्दः

कुन्तीपुत्रा यस्मिन् वृत्ते दिक्सङ्ख्याता सैका शोभन्ते प्रान्ते चैको हार
रौद्रैर्नेत्रैर्यस्मिन् सर्वैर्वर्णैर्वा सोऽयं दिव्यानन्दश्छन्दोग्रन्थे सार. ।
विश्राम स्यात् षड्भिः कर्णैर्यस्मिंस्तद्वत् सार्के पाण्डोः पुत्रर्वा स्यात्तस्यान्ते,
भासे ! लीलालोले ! कामक्रीडासक्ते ! पूर्वोक्तं दिव्यं वृत्तं चेहि स्वान्ते ॥२५८॥

यथा–

वन्दे देवं सर्वाधारं विश्वाध्यक्षं लक्ष्मीनाथं तं क्षीराब्धौ तिष्ठन्तं
यो हस्तीन्द्रं भक्तं ग्राहग्रस्तं मत्वा हित्वाप्तं सर्वं स्त्रीवर्गं भासन्तम् ।
प्रास्थः सौपर्णे पृष्ठेऽप्यास्तीर्णेऽपि प्राप्तश्चक्री वेगादेवोच्चैः क्रीडन्
व्यापाद्याम् नक्रं[१] मध्ये वक्रं सद्यस्तं हस्तीन्द्रं ससारा मुक्तं कुर्वन् ॥२५९॥

इति दिव्यानन्दः २४४

२४५ [१] अथ सुन्दरिका

करयुक्तसुपुष्पद्वयलसिता ताटङ्कमनोहरहारधरा
द्विजकर्णविराजत्पदयुगला गन्धेन सुमण्डितकुण्डलिका ।
यदि सप्तभिरिभिता यतिविरति सर्वैरपि चेद्विहितिर्विहिता,
किल सुन्दरिका सा फणिभणिता नेत्राग्निकला कविराजहिता ॥२६०॥

यथा–

सखि ! पङ्कजनेत्र मुरहरणं विशं कमनीयकलामलितं
वरमौक्तिकहार सुखकरणं रम्यं रमणीवसये ललितम् ।
तरुणीजनचित्त वरतरणं भव्यं भवभीतिविनाशकरं
घनकुञ्चितकेशं मुनिशरणं नित्यं कलयेऽखिलदैत्यहरम् ॥ २६१ ॥

इति सुन्दरिका २४५[१]

२४५[२] अथ पद्मावतिका

सुन्दरिकैव हि बाले ! यदि मुनिरसवसुविरामिणी भवति ।
विज्ञापयन्ति तज्ज्ञाः पद्मावतिकेति भयभवहनकमलाम् ॥ २६२ ॥

यथा–

सखि ! नन्दकुमारं तनुजितमारं कुण्डलमण्डितगण्डयुगं
हृतकंसनरेशं रचितसुवेशं कुञ्चितकेशमशेषसुगम् ।

---

१ ख रौद्रै । २ ख नक्रं ।

यमुनातटकुञ्जे सतिमिरपुञ्जे कारितरासविलासपर,
मुखनिर्जितचन्द्र विगलिततन्द्र चिन्तय चेतसि चित्तहरम् ।। ५६३ ।।

इति पद्मावतिका २४५[२]

२४६ अथ अद्रितनया

सहचरि ! चेन्नजौ भजगणौ भजौ च भवतस्ततो भलगुरू,
शिवविरतिस्तथैव विरति प्रभाकरभवा भवेच्च नियता[1] ।
प्रतिपदमत्र वह्निनयनाक्षरैर्गणय पादमिन्दुवदने !,
जगति जया प्रकाशितनया जनै किल विभाविताऽद्रितनया ।। ५६४ ।।

प्रकारान्तरेणापि लक्षण यथा—

सुदति ! विधेहि न तदनु ज ततोऽपि भगण ततश्च जगण,
तदनु च देहि भ तदनु ज ततोऽपि भगण ततो लघुगुरू ।
कुरु विरतिं शिवे दिनकरे यतिं सुरुचिरा विभावितनया,
दहनविलोचनाक्षरपदा विधेहि सुभगे[2] ! मुदाऽद्रितनयाम् ।। ५६५ ।।

यथा–

नयनमनोरम विकसित पलाशकुसुम विलोक्य सरस,
विकचसरोरुहा च सरसी विभाव्य सुभृश मनोऽतिविरसम् ।
गगनतल च चन्द्रकिरणै कणैरिव[3] विभावसोस्सुपिहित,
सहचरि ! जीवन न कलये विना सहचर विधेहि विहितम् ।। ५६६ ।।

यथा वा–

'विलुलितपुष्परेणुकपिशप्रशान्तकलिकापलाशकुसुमम् ।।' इत्यादि भट्टिकाव्ये[1]*

इति अद्रितनया २४६

अश्वललितमिदमन्यत्र[2]*, तथाहि—

---

१ ख नियमा । २ ख सुभग । ३. ख करणैरिव ।

*टिप्पणी—१ 'विलुलितपुष्परेणुकपिश प्रशान्तकलिका-पलाशकुसुम,
कुसुमनिपातविचित्रवसुर्व सशब्दनिपतद् द्रुमोत्कशकुनम् ।
शकुननिनादनादिककुव्विलोलविपलायमानहरिण,
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ।।
[भट्टिकाव्य, स० ८, प १३१]

२ वृत्तरत्नाकर—नारायणीटीका अ० ३, का० १०६ ।

अथ त्रयोविंशाक्षरम्

तत्र पूर्वम्—

२४४ दिव्यानन्द

कुन्तीपुत्रा यस्मिन् वृत्ते दिक्संख्याता चैका शोभन्ते प्रान्ते चैको हार
रौद्रैर्नेत्रैर्यस्मिन् सर्वैर्वर्णैर्वा सोऽयं दिव्यानन्दश्छन्दोग्रन्थे सार ।
विश्रामः स्यात् षड्भिः कर्णैर्यस्मिंस्तद्वत् सार्द्धं[1] पार्श्वे पुष्पैर्वा स्यात्तस्मान्ते
बाले ! लीलालोले कामक्रीडासक्ते पूर्वोक्तं दिव्यं वृत्तं धेहि स्वान्ते ॥५५८॥

यथा—

वन्दे देवं सर्वाधारं विश्वाध्यक्षं लक्ष्मीनाथं तं क्षीराब्धौ तिष्ठन्तं
यो हस्तीन्द्रं भक्तं ग्राहग्रस्तं मत्वा हित्वाप्तं सर्वं स्त्रीवर्गं भासन्तम् ।
प्रारूढः सौपर्णे पृष्ठेऽप्यास्तीर्णेऽपि प्राप्तश्चक्री वेगाद्देवोऽच्चैः क्रीडन्
व्यापाद्याशु नक्रं[2] मध्ये चक्रं सद्यस्तं दन्तीन्द्रं ससारा मुक्तं कुर्वन् ॥५५९॥

इति दिव्यानन्दः २४४

२४५ [१] अथ सुन्दरिका

करयुक्तसुपुष्पद्वयसमिता ताटङ्कमनोहरहारधरा
द्विजकर्णविराजत्पदयुगला गन्धेन सुमण्डितकुण्डलका ।
यदि सप्तभिरिभा सरविरति शर्वैरपि चेद्विहतिर्विहिता
किल सुन्दरिका सा फणिभणिता नेत्राग्निकला कविराजहिता ॥५६०॥

यथा—

सखि ! पङ्कजनेत्रं मुरहरणं भज कमनीयकलाललितं
वरमौक्तिकहारं सुखकरणं रम्यं रमणीवलये ललितम् ।
तरणीजमधितटं करतरुणं भव्यं भवभीतिविनाशकरं
घनकुञ्चितकेशं मुनिशरणं नित्यं कलयेऽखिलभवेस्पहरम् ॥ ५६० ॥

इति सुन्दरिका २४५[१]

२४५[२] अथ पद्मावतिका

सुन्दरिकैव हि बाले ! यदि मुनिरसदशविरामिणी भवति ।
विज्ञापयन्ति तज्ज्ञाः पद्मावतिकेति नयनदहनकमलाम् ॥ ५६२ ॥

यथा—

सखि ! नन्दकुमारं दमुजितमारं कुण्डलमण्डितगण्डयुगं
हृतकंसनरेशं रचितसुवेशं कुञ्चितकेशमशेषसुगम् ।

---

१ ख पीठे । २ ख नक्रं ।

यमुनातटकुञ्जे सतिमिरपुञ्जे कारितरासविलासपर,
मुखनिर्जितचन्द्र विगलिततन्द्र चिन्तय चेतसि चित्तहरम् ।। ५६३ ।।

इति पद्मावतिका २४५[२]

२४६ अथ अद्रितनया

सहचरि ! चेन्नजौ भजगणौ भजौ च भवतस्ततो भलगुरू,
शिवविरतिस्तथैव विरति प्रभाकरभवा भवेच्च नियता[1] ।
प्रतिपदमत्र वह्निनयनाक्षरैर्गणय पादमिन्दुवदने !,
जगति जया प्रकाशितनया जनै किल विभाविताऽद्रितनया ।। ५६४ ।।

प्रकारान्तरेणापि लक्षण यथा—

सुदति ! विधेहि न तदनु जं ततोऽपि भगण ततश्च जगण,
तदनु च देहि भ तदनु ज ततोऽपि भगण ततो लघुगुरू ।
कुरु विरतिं शिवे दिनकरे यतिं सुरुचिरा विभावितनया,
दहनविलोचनाक्षरपदा विधेहि सुभगे[2] ! मुदाऽद्रितनयाम् ।। ५६५ ।।

यथा–

नयनमनोरम विकसित पलाशकुसुम विलोक्य सरस,
विकचसरोरुहा च सरसी विभाव्य सुभृश मनोऽतिविरसम् ।
गगनतल च चन्द्रकिरणै कर्णैरिव[3] विभावसोस्सुपिहित,
सहचरि ! जीवन न कलये विना सहचर विधेहि विहितम् ।। ५६६ ।।

यथा वा–

'विलुलितपुष्परेणुकपिशप्रशान्तकलिकापलाशकुसुमम् ।।' इत्यादि भट्टिकाव्ये[1]*

इति अद्रितनया २४६

अश्वललितमिदमन्यत्र[2]*, तथाहि—

---

१ ख नियमा । २ ख सुभग । ३ ख करणैरिव ।

*टिप्पणी—१ 'विलुलितपुष्परेणुकपिश प्रशान्तकलिका-पलाशकुसुम,
कुसुमनिपातविचित्रवसुधं सशब्दनिपतद् द्रुमोत्कशकुनम् ।
शकुननिनादनादिककुब्विलोलविपलायमानहरिण,
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ।।
[भट्टिकाव्य, स० ८, प १३१]

२ वृत्तरत्नाकर—नारायणीटीका अ० ३, का० १०६ ।

पवनविधूतवीचिचपल विलोकयति जीवित तनुभृतां,
न पुनरहीयमानमनिश नरावनितया वशीकृतमिदम् ।
सपदि निपीडनव्यतिकर यमादिव नराधिपाभरपशु
परवनितामवेक्ष्य कुरुत तथापि हतबुद्धिरस्खलितम् ॥ ५६७ ॥

इति प्रत्युदाहरणम्[1] ।

[2]अत्रापि गणयतिवर्णविन्यासस्तु पूर्ववदेव, नाममात्रे भेदः क्वचिद् विशेष ।[2]

२४७ अथ मालती

अत्रैव सप्तभगणानन्तर गुरुद्वयदानेन मालतीवृत्तं भवति । लक्षणं च यथा-

इयमेव सप्तभगणावनन्तरं भवति मालतीवृत्तम् ।
यदि गुरुयुगलोपहिता पिङ्गलनागस्तदाख्याति ॥ ५६८ ॥

यथा –

चन्द्रकचारुमयूरशिखण्डकमण्डलमौलिविजृम्भितचन्द्रकिशोरं
वन्यनवीनविभूषणभूषितनन्दसुतं वनिताधरलोभम् ।
धेनुकदानवदारणदक्ष-दयानिधि-दुर्गमवेदरहस्य
नौमि हरिं विविधावलिमालितभूमिभरापनुद[3] सुयशस्यम् ॥ ५६९ ॥

इति मालती २४७

इयमेव अस्माभि पूर्वखण्डे मालती सवया इत्युक्ता । [सा तत एवावलोकनीया.

किञ्च—

२४८ अथ मल्लिका

सप्तभगणावनन्तरमपि चेल्लघुगुरुनिवेशन भवति ।
जल्पति पिङ्गलनाग सुकविस्तन्मल्लिकावृत्तम् ॥ ५७० ॥

यथा–

घूर्णति मनो मम चम्पककाननकल्पितकेलिरय पवन
कथामपि नैव करोमि तथापि वृथा कदन कुरुते मदन ।
कलानिधिरेष वधादयि मुञ्चति वह्निकलापमलीकहिम
विधेहि तथा मतिमेति यथा सविधेन यथा व्रजभूमहिम[4] ॥ ५७१ ॥

इति मल्लिका २४८

---

१ ख उदाहरणम् । २–२ चिह्नगतोऽयमंशो नास्ति क प्रतौ । ३ ख भरापनुदं । ४ ख हिता । ५ ख व्रजभूमहितः ।

इयमेवास्माभि पूर्वखण्डे मल्लिका सवया इत्युक्ता। सा तत एवावधारणीया।

२४९. अथ मत्ताक्रीडम्

यस्मिन्नष्टौ पूर्वं हारास्तदनु च मनुमित लघुमिह रचयेत्[1],
पादप्रान्ते चैक हार विकचकमलमुखि ! विरचय नियतम्।
मत्ताक्रीड वृत्त बाले ! वसुतिथियतिकृतरतिसुखनिवह,
कुन्तीपुत्र वेदैरुक्त निगमनगणमपि विरचय सगणम् ॥ ५७२ ॥

यथा–

नव्ये कालिन्दीये कुञ्जे सुरभिसमयमधुमधुरसुखरस,
रासोल्लासक्रीडारङ्गे युवतिसुभगभुजरचितवरवशम्[2]।
सान्द्रानन्द[3] मेघश्याम मुरलिमधुर[4]रवविमुषितहरिण,
वृन्दारण्ये दीव्यत्पुण्ये स्मरत परममिह हरिमनवरतम् ॥ ५७३ ॥

इति मत्ताक्रीडम् २४९

२५० अथ कनकवलयम्

सुतनु ! सुदति ! मुनिमितमिह सुनगणमिति ह विरचय,
तदनु विकचकमलमुखि ! सखि ! खलु लघुयुगमुपनय।
दहननयनमितलघुमिह पदगतमपि परिकलय,
कनकवलयमिति कथयति भुजगपतिरिति तदवय[5] ॥ ५७४ ॥

यथा–

कनकवलयरचितमुकुट ! *विधृतलकुट ! निकटबल !,
शमितशकट ! कनकसुपट ! दलितदितिजसुभटदल !।
कमलनयन* ! विजितमदन ! युवतिवलयरचितलय !,
तरलवसन ! विहितभजन ! धरणिधरण ! जय ! विजय ! ॥ ५७५ ॥

इति कनकवलयम् २५०

[6] अत्रापि प्रस्तारगत्या त्रयोविंशत्यक्षरस्य त्र्यशीतिलक्षाणि अष्टाशीतिसहस्राणि अष्टोत्तराणि षट्शतानि च ८३८८६०८ भेदा भवन्ति, तेषु अष्टौ भेदा प्रोक्ता, शेषभेदा प्रस्तार्य गणयतिवर्णनामसहितास्समुदाहरणीया इति दिगुपदिश्यते[6]*।

इति त्रयोविंशाक्षरम्।

---

१ ख रचये। २ ख परवशम्। ३ क सान्द्रावक्ष। ४ ख ललितमधुर। ५ ख च तदय। ६ पङ्क्तित्रयं नास्ति क प्रतौ। *–*चिह्नगतोऽयं पाठ क प्रतौ नास्ति।

*टिप्पणी—१ त्रयोविंशत्यक्षरवृत्तस्य ग्रन्थान्तरेषु लब्धशेषभेदा पञ्चमपरिशिष्टे पर्यालोच्याः।

अथ चतुर्विंशाक्षरम्

तत्र प्रथमम्–   २५१ रामानन्द

मादित्यः सस्याता यस्मिन् वृत्ते दिव्ये श्रीनागाख्याते चोमन्तेऽप्यन्त वर्णा
पश्चमि कर्णेद्वि स्त प्राप्तर्याद्विश्राम स्यात् सत्तरवरसाम्ये स्यातास्तद्वद्वर्णा
कामक्रीडाकूतस्फीत प्राप्तानन्दे मध्याकारे चन्द्रागम्ये नम्ये कान्ते !
वेदर्नेत्रैर्यस्मिन् पादे हारा सपत्कान्त रामानन्द वृत्त चेहि स्वान्ते ॥ ५७६ ॥

यथा–

रासोल्लासे गोपस्त्रीभिर्वृन्दारण्ये कालिन्दीय कुञ्जे कुञ्जे गुञ्जद्भृङ्गे
दिव्यामोदे पुष्पाकीर्णे धृत्वा वंशी मन्द मन्द दिव्यैस्तानैः सङ्गायन्तम् ।
कामक्रीडाकूतस्फीत तासामङ्गेऽनङ्गं साङ्गं कुर्वन्तं त काम कान्त
सर्वानन्दं तेजोरूपं विश्वाध्यक्ष वन्दे देवं भास्वन्तं प्रातःसायान्तम् ॥५७७॥

इति रामानन्दः २५१

२५२ अथ दुर्मिलका

विनिधाय करं सखि ! पाणितल कुरु रत्नमनोहरबाहुयुगं
सगणं च ततः कुरु पाणितलं सखि ! रत्नविराजितपादयुतम् ।
यदि भोगरसैरपि पङ्क्तिविराजित-लस्वविभासितवर्णभरा
भवतीह तदा किल दुर्मिलका सखि ! नेत्रविभावसुभासिकला ॥५७८॥

यथा–

गिरिराजसुताकमनीयमनङ्गविभङ्गकर नृकपालधरं
परिभूतमजाजिनवाससमुद्धतमृत्युकरं शशिखण्डधरम् ।
धरमानसभूषित-दीनदयासमवभ्रमवोढतनीभगम
प्रणमामि विलोलजटाछटगुम्फितशेषकलानिधिभालतलम् ॥ ५७९ ॥

यथा वा भूषणे[१] –

कति सन्ति न गोपकुले वनिता स्मरतापहृतास्च विहाय च ता
रतिकेलिकलारसलालसमानसमागतमुज्झितमानरसम् ।
वनमालिनमालि ममस्य नमस्य नमस्य मुखस्य चिरस्य मुधा
भणिता परितापवती भवती मुखतो ममसस्विदि हासकथा ॥ ५८० ॥

इति दुर्मिलका २५२

टिप्पणी—१ वाणीभूषणम्, द्वि॰ प्र॰ प॰ ११०

२५३ अथ किरीटम्

पादयुग कुरु नूपुरराजितमत्र कर वररत्नमनोहर-
वज्रयुग कुसुमद्वयसङ्गतकुण्डलगन्धयुग समुपाहर ।
पण्डितमण्डलिकाहृतमानसकल्पितमज्जनमौलिरसालय,
पिङ्गलपन्नगराजनिवेदितवृत्तकिरीटमिद परिभावय । ५८१ ॥

यथा–

मल्लिलते मलिनासि किमित्यलिना रहिता भवती वत यद्यपि,
सा पुनरेति शरद्रजनी तव या तनुते धवलानि जगन्त्यपि ।
षट्पदकोटिविघट्टितकुण्डल[1]कोटिविनिर्गतसौरभसम्पदि,
न त्वयि कोऽपि विभास्यति सादरमन्तरमुत्तरनागरससदि ॥ ५८२ ॥

इति किरीटम् २५३

२५४ अथ तन्वी

कारय भ त सुचरितभरिते न कुरु स सखि ! सुमहितवृत्ते,
धेहि भयुग्म नगणसुसहित कारय सुन्दरि ! यगणमिहान्ते ।
भूतमुनीनैर्यतिरिह कथिता द्वादशभिश्च सुकविजनवित्ता,
तत्त्वविरामा भुजगविरचिता राजति चेतसि परमिति तन्वी ॥ ५८३ ॥

यथा–

मा कुरु मान कुरु मम वचन कुञ्जगत भज सहचरि ! कृष्ण,
कारितरास वलयितवनित गोपवधूजनयुवतिसतृष्णम् ।
कोकिलरावैर्मधुकरविरुतै[2] स्फोटितकर्णयुगलपरिखिन्ना,
दाहमुपेता मलयजसलिलैस्सम्प्रतिदेहजशरभरभिन्ना ॥ ५८४ ॥

यथा वा, छन्दोवृत्तौ[1]*द्वादशाक्षरविरति —

चन्द्रमुखी सुन्दरघनजघना कुन्दसमानशिखरदशनाग्रा,
निष्कलवीणा श्रुतिसुखवचना त्रस्तकुरङ्गतरलनयनान्ता ।
निर्मुखपीनोन्नतकुचकलशा मत्तगजेन्द्रललितगतिभावा,
निर्भरलीला निधुवनविधये मुञ्जनरेन्द्र ! भवतु तव तन्वी ॥ ५८५ ॥
इति प्रत्युदाहरणम् ।

इति तन्वी २५४

---

१ ख कुड्मल । २ क मधुकरविरति ।

*टिप्पणी—१ छन्द शास्त्र-हलायुधीयटीका अ० ७, कारिकाया २९ उदाहरणम् ।

२२१ अथ माधवी

उरवाक्षरकृतवृत्त यदि वसुभिर्नायकर्घटितम् ।
तरसखि ! पिङ्गलभणितं कथितं त्विह माधवीवृत्तम् ॥ ५८६ ॥

यथा–

विलोलविलोचनकोणविलोकितमोहितगोपवधूजनचित्त
मयूरकलापविकल्पितमौलिरपारकलानिधिधामचरित्र ।
करोति मनो मम विह्वलमिन्दुनिभस्मितसुन्दरकुन्दसुदन्त
सखीमिति कापि जगाद हरेरनुरागवशेन विभावितमन्त ॥ ५८७ ॥

इति माधवी २२५

इदमेवास्माभिः पूर्वखण्डे माधवी सवया इत्युक्ता ।

२२६ अथ तरलनयनम्

वसुमितलघुमिह सहचरि ! विरचय कमलमुखि ! विरचय
तदनु घटय सखि ! रसवलघुमपि तरलनयन इह ।
सकलचरणमिति वसुमितसुगणमनु कुरु सुरमणि
फणिमणिरिह विबुधजनवदति सुरुचिरमिति परिकलय ॥ ५८८ ॥

यथा–

कुसुमनिकरपरिकलितममुरवनविहरणसुनिपुण
सरभसविदलितकरिवरतरवरदलितविविधगण ।
करधृतगिरिवर विलसितमणिगण मुनिमतमुरहर,
फणिपतिविगणितगुणगण जय जय जय सदवनपर ॥ ५८९ ॥

इति तरलनयनम् २२६

अत्रापि प्रस्तारगत्या चतुर्विंशत्यक्षरस्य एकाकोटिः सप्तषष्टिलक्षाणि सप्तसप्ततिसहस्राणि षोडशोत्तरं शतद्वयं च १६७७७२१६ भेदास्तेषु भेदषट्कमुक्त्वा शेषभेदा प्रस्तार्य सुधीभिरुदाहरणीया इति दिक् ।

इति चतुर्विंशत्यक्षरम् ।

अथ पञ्चविंशाक्षरम्

तत्र प्रथमम्—

२२७ कामानन्दः

यस्मिन् वृत्ते सार्विंशाः कौन्तेयाः कान्ताः मत्तादप्रान्ते कान्ते ! चैको मुक्ताहार
विश्राम स्यात् पञ्चमि कर्णैर्मध्याकारैः सार्धैस्तैरेव स्यात् सोऽयं वृत्तानां सारः ।

---

१ पंक्तिद्वयं नास्ति क प्रती

*टिप्पणी—१ चतुर्विंशत्यक्षरवृत्तस्य सम्पूर्णभेदाः पञ्चमपरिशिष्टे पर्यवेक्षणीयाः ।

तत्त्वैरात्मा यस्मिन् वृत्ते वर्णै स्याता[1] छन्दोविद्भि सद्भि ससेव्य सर्वानन्द',
सोऽय नागाधीशेनोक्तो वृत्ताध्यक्ष ससाध्य पुम्भिश्चित्ते काम कामानन्दः।५६०।

यथा–

वन्यै पीतै पुष्पैर्माला सङ्ग्रथ्नत[2] श्रीमद्वृन्दारण्ये गोपीवृन्दे[3] खेलन्तं,
मायूरै पत्रैर्दिव्य छत्र कुर्वन्त वृक्षाणा शाखा धृत्वा हिन्दोले दोलन्तम् ।
वशीमोष्ठप्रान्ते कृत्वा सगायन्त तासा तन्नाम्नान्युक्त्वा गोपीराह्वायन्त,
दक्ष पाद वामे कृत्वा सतिष्ठन्त कात्पेवार्क्षे[4] मूले वन्दे कृष्ण[5]भासन्तम्।।५६१।।

इति कामानन्द' २५७

२५८ अथ क्रौञ्चपदा

कारय भ म धारय स भ निगमनगणमिह विरचय रुचिर,
सञ्चितहारा पञ्चविरामा शरवसुमुनियुतमुरचितविरति ।
क्रौञ्चपदा स्यात् काञ्चनवर्णे गतिवशसुविजितमदगजगमने,
तत्त्वविभेदैर्वर्णविरामा वहुविधगतिरपि भवति च गणने ।। ५६२ ।।

यथा

या तरलाक्षी कुञ्चितकेशी मदकलकरिवरगमनविलसिता,
फुल्लसरोजश्रेणिकटाक्षा मधुमदसुमुदितसरभसगमना ।
स्थूलनितम्बा पीनकुचाढ्या वहुविधसुखयुतसुरतसुनिपुणा,
सा परिणेया सौख्यकरा स्त्री वहुविधनिधुवनसुखमभिलषता ।। ५६३ ।।

यथा वा, हलायुधे[1]*

या कपिलाक्षी पिङ्गलकेशी कलिरुचिरनुदिनमनुनयकठिना,
दीर्घतराभि स्थूलशिराभि परिवृतवपुरतिशयकुटिलगति ।
आयतजङ्घा निम्नकपोला लघुतरकुचयुगपरिचितहृदया,
सा परिहार्या क्रौञ्चपदा स्त्री ध्रुवमिह निरवधिसुखमभिलषता ।। ५६४ ।।
इति प्रत्युदाहरणम् ।

इति क्रौञ्चपदा २५८

२५९ अथ मल्ली

सगणाष्टकगुरुघटिता शरपक्षकवर्णविलसिता या स्यात् ।
तामिह पिङ्गलनाग कथयति मल्लीमिति स्फुटत ।। ५६५ ।।

---

१ ख स्यात । २ क सङ्ग्रीष्मन्त । ३ ख गोपीवृन्दै । ४ ख त तिष्ठन्त सत्कादम्बे । ५ क कृष्णे ।

*टिप्पणी—१ छन्द शास्त्र-हलायुधीयटीकायां अ० ७, कारिकाया ३० उदाहरणम् ।

यथा–

गिरिराजसुताकमनीयमनङ्गविमङ्गकर गलमस्तकमाल
परिभूतगजाजिनवाससमुद्धतनृत्यकर विगृहीतकपालम् ।
गरलाशनमूषित-दीनदयासमदप्रमदोद्धतदानवकाल
प्रणमामि विमोसजटातटगुम्फितशेषकलाभिविलासितभालम् ॥ ५२६ ॥

इति मल्ली २२१

इयमेव मालावृत्ते मल्लीसवया इत्युक्ता ।

२१ अथ मणिगणम्

सुतनु ! सुदति ! वसुमितनगणमिह विधुमुखि ! सुविरचय
तदनु विकचकमलसदृशमुखि ! सुरभिकुसुममपि कलय ।
गतिवशविदलितमदकलकरिवरगमन इह सुरमणि
मणिगणमिति फणिपतिरपि कथयति विमलमविरतविरमि¹ ॥ ५२७ ॥

यथा–

निगमविदित सततमुदित परमपुरुषसुकृतसुललित
सकलमनुजकलुषदहन तरलयुवतिवचनविचलित ।
विकटगहनदहनकदन पिहितमयम निखिलसखिवस !
कलितविविधविबुधसुखचय जय जय वसितदितिजवध ॥ ५२८ ॥

इति मणिगणम् २१

अत्रापि प्रस्तारगत्या पञ्चविंशत्यक्षरस्य कोटित्रय पञ्चत्रिंशल्लक्षाणि चतु पञ्चसहस्राणि द्वात्रिंशदुत्तराणि चतुश्चत्वानि च ३३५५४४३२ भेदास्तेषु दिग्प्रदर्शनार्थं भेदचतुष्टयमुक्त शेषाम्यपराणि च प्रस्तार्य सुधीभिरूह्यानीति शिवम्* ।

इति पञ्चविंशत्यक्षरम् ।

अथ षड्विंशाक्षरम्

तत्र प्रथम सर्वगुरुम्–

२२१ श्रीगोविन्दानन्द

यस्मिन् वृत्ते दिक्संख्याता कर्णा रामै सपद्मा गोमन्तोऽप्यन्ते चार्मैमम्याकारा
विश्राम स्यात् षड्भि कर्णे पश्चाद्रस्ते पुष्पैर्नागैर्भार्मैतैस्तैषां लोके ख्याताहारा ।
सर्वेषां नागानामीशेनाथ प्रोक्त सर्वास्य प्रस्तारे षड्विंशत्याहारैरवारे
सोऽयं श्रीगोविन्दानन्दश्छन्दस्सार सर्वाधार कार्यंश्चित्ते पारैश्छन्दस्कारैः
॥५२९॥

---

१ क विमलमविरतविरमि । २ ख गुम्फित । ३ पद्यमिदं चतुर्थपद्यं नास्ति क प्रतौ ।

*टिप्पणी—१ पञ्चविंशत्यक्षरवृत्तस्यान्येऽपि भेदा छन्दस्तरतिश्ये गोत्रमीया ।

यथा–

श्रीगोविन्द सर्वानन्दश्चित्ते ध्येयः वित्त मित्र स्वाराज्य स्त्रीवर्ग सर्वो हेय,
वृन्दारण्ये गुञ्जद्भृङ्गे पुष्पैः कीर्णे श्रीलक्ष्मीनाथ श्रीगोपीकान्तः शश्वद्गेय ।
द्वारे द्वारे व्यर्थं ससारे रे रे रे भ्राम भ्राम काम किं कुर्यास्त्व क्षाम चेत,
मायाजाल सर्वं चैतत् पश्यच्छ्रावन्भ्राम्यन्नानायोनौ पूर्व खिन्नोऽसि त्व भ्रात
॥ ६०० ॥

इति श्रीगोविन्दानन्द २६१

२६२ अथ भुजङ्गविजृम्भितम्

आदौ यस्मिन् वृत्ते काले[1] मगणयुग-तननगणा रसौ च लगौ ततो-[2]
वस्वीशाश्वच्छेदोपेत चपलतरहरिणनयने विधेहि सुखेन वै ।
पादप्रान्त यस्मिन् वृत्ते रसनरनयनविलसित मनोहरण प्रिये!,
नागाधीशेनोक्त प्रोक्त[3] विबुधहृदयसुखजनक भुजङ्गविजृम्भितम् ॥ ६०१ ॥

यथा–

ध्यानैकाग्रालम्बादृष्टिष्कमलमुखि! लुलितमलकैः करे स्थितमानन,
चिन्तासक्ता शून्या बुद्धिस्त्वरितगतिपतितरशनातनुस्तनुता गता ।
पाण्डुच्छायक्षाम वक्त्र मदजनति रहसि सरसा[4] करोषि न सकथा,
को नामाय रम्यो व्याधिस्तव सुमुखि! कथय किमिद न खल्वसि नातुरा[5]
॥ ६०२ ॥

यथा वा, हलायुधे[1]*—

ये सन्नद्धानेकानीकैर्नरतुरगकरिपरिवृतैः सम तव शत्रव,
युद्धश्रद्धालुब्धात्मान[6]स्त्वदभिमुखमथ गतभिय पतन्ति धृतायुधा ।
तेऽद्य त्वा दृष्ट्वा सग्रामे तुडिगनृपकृपणमनस पतन्ति दिगन्तर,
किं वा सोढुं शक्य तैस्तैर्बहुभिरपि सविषविषम भुजङ्गविजृम्भितम् ॥ ६०३ ॥

इति प्रत्युदाहरणम् ।

इति भुजङ्गविजृम्भितम् २६२

२६३ अथ अपवाह

आदौ म तदनु च कुरु सहचरि! रसपरिमितमिह नगण गण्य,
हस्त सविरचय सखि! विकचकमलमुखि! तदनु च रुचिर कर्णम् ।
विश्राम. सुतनु! सुदति! नवरसरसशरपरिमित इह बोभूयात्,
नागो जल्पति फणिपतिरतिशयमिति रतिकृतिधृतिरपवाह स्यात् ॥ ६०४ ॥

---

१ ख. बाले । २ ख तनो । ३ ख वृत्तं । ४ ख सारसा । ५ ख चातुरा । ६ ख लब्धात्मान' ।

*टिप्पणी—१ छन्द शास्त्रहलायुधटीकाया अ० ७, कारिकाया ३१ उदाहरणम् ।

यथा–

श्रीकृष्णं भवभयहरमभिमतफलकरणनिपुणतरमाराध्य
सकमीशं दमितदितिजमवजितपरमवनतमुनिवरससाध्यम् ।
सवज्ञं गरुडगमनमहिपतिकृतरुचिरशयनममघं नव्यं
तं वन्दे कनकवसनतनुरुचिजितजलदपटममितं विभ्यम् ॥ १ ५ ॥

यथा वा वृत्तायुधे[१]*—

श्रीकण्ठं त्रिपुरदहनममृतकिरणशकलकलितशिरसं छद्र
भूतेशं हुतमुनिमयमखिलभुवनमितचरणयुगमीशानम् ।
सर्वज्ञं वृषभगमनमहिपतिकृतवलयरुचिरकरमाराध्य
तं वन्दे भवभयनुदमभिमतफलवितरणगुरुमुमया युक्तम् ॥ १०६ ॥

इति प्रत्युदाहरणम् ।

इति भपवाहः २६३

२६४ अथ मागधी

अत्रव वसुभगणानन्तरं गुरुद्वयदानेन मागधीवृत्तं भवति । तल्लक्षणं यथा —

भगणाष्टकगुरुयुगला रसयुगवर्णा रसाग्निराशिकला ।
पन्नगपिङ्गलभणिता विज्ञ या मागधी सुधिया ॥ १०७ ॥

यथा –

माधव विद्युदिव गगने तव सतनुते नवकाञ्चनरञ्जितवस्त्र
नीरदवृत्तमिद गगनेऽपि च भावयति प्रसभं तव देहमहास्त्रम् ।
इन्द्रशरासनभासमिदं तव वक्षसि भावयत[१] वनमालतिमालां
मानय मे वचनं कुरु सम्प्रति सुन्दर चेतसि भावयतामिह बालाम् ॥१०८॥

इति मागधी २६४

इयमेव च द्वात्रिंशत्कलका मागधी समया इत्युक्ता पूर्वखण्डे । अत्र तु गुरुद्वयमधिकमिति षट्त्रिंशत्कलति ततो भेदः । वर्णप्रस्तारत्वाच्च षड्विंशस्य द्वारमियम् । *अतएव च जातिवृत्तसांकर्येण छन्दःतत्त्वमेवैचित्रीमावहतोति सर्वत्र रहस्यं चाकलीति छन्दःशास्त्रेषु ।*

---

१ ख भावयते । * चिह्नगतोऽयं पाठः क प्रतौ नास्ति ।

*टिप्पणी—१ छन्दःशास्त्रवृत्तायुधटीकायां च ७ कारिकायां १२ उदाहरणम् ।

अथान्त्य सर्वलघु—

२६५ अथ कमलदलम्

सहचरि ! विकचकमलमुखि ! वसुमितसुनगणमिह विरचय,
तदनु सकलपदविशदसुरभिकुसुमयुगमपि परिकलय ।
रसयुगपरिमितपदगतलघुमनुकलय कमलदलमिति,
तदिह मनसि कुरु सुरुचिरगुणवति ! कथयति फणिपतिरपि ॥ ६०९ ॥

यथा–

कलुषशमन ! गरुडगमन ! कनकवसन ! कुसुमहसन ! [जय,
ललितमुकुट ! दलितशकट ! कलितलकुट ! रचितकपट ! जय ।
कमलनयन !][1] जलधिशयन ! धरणिधरण ! मरणहरण ! जय,
सदयहृदय ! पठितसुनय ! विदितविनय ! रचितसमय ! जय ॥ ६१० ॥

इति कमलदलम् २६५.

[2]अत्रापि प्रस्तारगत्या रसलोचनवर्णस्य कोटिषट्कं एकसप्ततिलक्षाणि वसुसहस्राणि चतुःषष्ट्युत्तराणि अष्टौ शतानि च भेदाः ६७१०८८६४ तेषु भेदपञ्चकमभिहित, शेषभेदा प्रस्तार्य गुरूपदेशत स्वेच्छया नामानि आरचय्य सूचनीया इति सर्वमवदातमिति ।[1]*

इति षड्विंशत्यक्षरम् ।

उक्तग्रन्थमुपसंहरति[2]—

लक्ष्यलक्षणसयुक्त मया छन्दोऽत्र कीर्तितम् ।
प्रत्युदाहरणत्वेन क्वचित् प्राचामुदाहृतम् ॥ ६११ ॥
सुजातिप्रतिभायुक्त सालङ्कार स्फुरद्गुणम् ।
कुर्वन्तु सुधिय कण्ठे वृत्तमौक्तिकमुत्तमम् ॥ ६१२ ॥
सर्वगुर्वादिलघ्वन्तप्रस्तारस्त्वतिदुष्कर ।
इति विज्ञाय वाद्यन्तभेदकल्पनमीरितम् ॥ ६१३ ॥
पञ्चषष्ट्यधिक नेत्रशतक समुदीरितम् ।
त्यक्त्वा लक्षणमित्राणि[3] वर्णवृत्तमिति स्फुटम् ॥ ६१४ ॥
यथामति यथाप्रज्ञमवधार्य मनीषिभि ।
शोधनीय प्रयत्नेन बद्ध सन्तोऽयमञ्जलि ॥ ६१५ ॥

---

१ [-] कोष्ठगतोंऽश क प्रतौ नास्ति ।

२ पंक्तिचतुष्टयं नास्ति क प्रतौ । ३ ख नास्ति पाठ । ४ ख वृत्तानि ।

*टिप्पणी—१ अन्यशेषभेदा. पञ्चमपरिशिष्टे पर्यालोच्या ।

अथ चैकाक्षरादिषड्विंशत्यक्षरावधिप्रस्तारपिण्डसंख्या—

रसशैलघनस्वाग्निचन्द्रदृग्वेदवह्निभिः ।
आत्मना योजितर्वामगत्या ज्ञेया मनीषिभिः ॥ ६१६ ॥

इत्यस्मत्पितृचरणप्रदीपित पिङ्गलप्रदीपभाष्ये* निर्दिष्टदिशा 'त्रयोदश कोटयो द्विचत्वारिंशल्लक्षाणि सप्तदशसहस्राणि षड्विंशत्युत्तराणि सप्तशतानि' १३४२१७७२६ समस्तप्रस्तारस्य ।

षड्विंशति सप्तशतानि चैव तथा सहस्राण्यपि सप्तपंक्तिः ।
लक्षाणि दृग्वेदसुलक्षितानि कोटयस्तथा रामनिशाकरैः स्युः ॥६१७॥

इति मदुपदिष्टपूर्वसम्बोधितपिण्डसंख्या च सिंहावलोकनशालिभिरनुसन्धातव्या इति सर्वमनवद्यम् ।

इति श्रीलक्ष्मीनाथभट्टात्मज-कविशेखरचन्द्रशेखरभट्टविरचिते
श्रीवृत्तमौक्तिके एकाक्षरादिषड्विंशत्यक्षर
प्रस्तारेष्वाद्यन्तभेदसहितवृत्तनिरूपणं
प्रकरणं प्रथमम् ।

---

१ न. वृत्तमौक्तिके पिङ्गलवार्तिके एकाक्षरादिषड्विंशत्यक्षरान्तप्रस्तारे ।

टिप्पणी—१ लक्ष्मीनाथस्य इत्यस्य प्राकृतपैङ्गलवृत्तौ १११ पद्यस्य टीकायाम् ।

द्वितीयं प्रकीर्णक-प्रकरणम्

अथ प्रस्तारोत्तीर्णानि कतिचिद् वृत्तानि वर्णनियमरहितान्यभिधीयन्ते । तत्र प्राचीनाना सग्रहकारिका—

१–४ अथ भुजङ्गविजृम्भितस्य चत्वारो भेदाः

वेदै: पिपीडिका स्यान्नवभि करभश्चतुर्दशभि ।
पणवमिद तु शरैश्चेन्माला इह मध्यगैर्लघुभिरधिकै ॥ १ ॥

इति भुजङ्गविजृम्भितभेवनिरूपणम् १–४*[1]

---

*टिप्पणी—१ ग्रन्थकारेण द्वितीयखण्डस्य द्वादशप्रकरणे विज्ञापितमिद यदस्य द्वितीयखण्डस्य द्वितीयप्रकरणे पिपीलिका-पिपीलिकाकरभ - पिपीलिकापणव-पिपीलिकामालाच्छन्दांसि लक्षणोदाहरणसहितानि निरूपितानि'। परमत्र चतुर्वृत्ताना लक्षणोदाहरणानि क्वचिदपि नैव दृश्यन्ते, केवल त्वत्र प्राचीन-सग्रहकारिकैव समुपलभ्यते। कारिकाया पूर्वापरप्रसङ्गरहितत्वात् लक्षणान्यपि न प्रस्फुटीभवन्ति। अत कलिकालसर्वज्ञ-हेमचन्द्राचार्यप्रणीताच्छन्दोनुशासनादेषा चतुर्वृत्तानां लक्षणोदाहरणान्यध प्रस्तूयन्ते। वृत्तान्येतानि सन्ति षड्विंशत्यक्षरात्मक-भुजङ्गविजृम्भितस्यैव भेदरूपाणि।

"मातनौजभ्रा पिपीलिका जणे ।३८५।

[व्या०] मद्वय तगणो नगणचतुष्टय जभरा । जगौरिति अष्टभि पञ्चदशभिश्च यति । यथा–

निष्प्रत्यूह पुण्या लक्ष्मीमविरतमभिलषसि यदि रमयितु सुख च यदीच्छसि,
स्यातु न्यायोन्मीलद्बुद्धे लघुभिरपि सह बहुभिरिह कुरु मा विरोधपद तदा ।
विस्फूर्जत्पूत्कार क्रीडाकवलितसकलमृगकुलमजगरं भुजङ्गममुन्मद,
सङ्घात कृत्वा पश्यैता ग्लपितवपुषमनवधिरचितरुजा अदन्ति पिपीलिका ॥३८५॥

एषैव नीपरत पञ्च-दश-पञ्चदशलवृद्धाक्रमेण करभ ॥३५॥ पणव ॥४०॥ माला ॥४५॥—॥३८६॥

[व्या०] एषैव पिपीलिका चतुर्भ्यो नगणेभ्य परत पञ्चभि, दशभि, पञ्चदशभिश्च लघुभिर्वृद्धा शेषगणेषु तथैव स्थितेषु क्रमेण करभादयो भवन्ति। तेऽत्र पञ्चभिर्वृद्धा-पिपीलिकाकरभ । यथा—

नित्य लक्ष्मच्छायाछन्न कलयतु कथमिव तव
वदनरुचिममृतरुचिश्चिर क्षयसयुत,
तुल्य नाब्ज स्फूर्जद्धूलीविधुरितजननयन-
युगमतिमृदुकरचरणस्य निर्मलचारुण ।

द्विकलघुदशकस्यान्ते भगण-गयुग-सगण-गुरुयुगलम् ।
लघुयुगल गुरुयुगल यदि घटित स्यात् त्रिभङ्गिकावृत्तम् ॥ ३ ॥

यथा

स जयति हर इह वलयितविषधर तिलकितसुन्दरचन्द्र
परमानन्द सुखकन्द ।
वृषभगमन डमरुधरण नयनदहन जनितातनुभङ्ग
कृतरङ्ग सज्जनसङ्ग ।
जयति च हरिरिह करधृतगिरिवर विनिहतकसनरेश
परमेश कुञ्चितकेशः ।
गरुडगमन कलुषशमनचरणशरणजनमानसहस
सुवतस पालितवश. ॥ ४ ॥

इति द्वितीयत्रिभङ्गी ५.

६ अथ शालूरम्

कर्णद्विजवरगणमिह रसपरिमितमतिसुरुचिरमनुकलय कर,
शालूरममलमिति विकचकमलमुखि ! सखि ! सहचरि ! परिकलय वरम् ।
नेत्रानलकलमिदमतिशयसहृदय विशदहृदय सुखरसजनकम् ।
नागाधिपकथितमखिलविबुधजनमथितमगणितगुणगणकनकम् ॥ ५ ॥

यथा–

गोपीजनवलयित - मुनिगणसुमहितमुपचितदितिसुतमदहरणं,
व्यर्थीकृतजलधर-करधृतगिरिवर-गतभय-निजजनसुखकरणम् ।
वृन्दावनविहरण - परपदवितरण - विहितविविधरसरभसपर ,
पीताम्बरधरमरुणचरणकरमनुसर सखि ! सरसिजनयनवरम् ॥ ६ ॥

इति शालूरम् ६.

इति प्रकीर्णक वृत्तमुक्त सद्वृत्तमौक्तिके ।
प्रस्तारगत्या वृत्तानि शेषाण्यूह्यानि पण्डितै ॥ ७ ॥

इति प्रकीर्णक–प्रकरणं द्वितीयम् ।

———

तृतीयं दण्डक-प्रकरणम्

अथ दण्डकाः

तत्र यत्र पादे द्वौ नगणौ रगणाश्च सप्त भवन्ति स दण्डको नाम षड्विंशत्यक्षरपादस्य वृत्तस्यानन्तरं 'दण्डको नौ र' [॥७।३३॥]'* इति सूत्रकारपाठात् सप्तविंशत्यक्षरत्वमेव युक्तं दण्डकस्य । प्रथमं तावदेकाक्षरप्रथमावृत्तानामेकैकाक्षरवृद्ध्या प्रस्तारप्रवृत्तिरस्ति ऊर्ध्वं पुनरेकैकरेफवृद्ध्या प्रस्तारः । तल्लक्षणं यथा—

१ अथ चण्डवृष्टिप्रपातः

नगणयुगलादनन्तरमपि यदि रगणा भवन्ति सप्तैव ।
दण्डक एष निगदितश्चण्डवृष्टिप्रपात इति ॥ १ ॥

यथा—

इह हि भवति दण्डकारण्यदेशे स्थितिः पुण्यभाजां मुनीनां मनोहारिणी
त्रिदशविजयिवीर्यदृप्यद्दशग्रीवलक्ष्मीविरामेण रामेण संसेविते ।
जनकयजनभूमिसम्भूतसीमन्तिनीसीमसीतापदस्पर्शपूताश्रमे
भुवननमितविन्ध्यपथाभिधानाम्बिकातीर्थयात्रागतानेकसिद्धाकुले ॥ २ ॥

इति चण्डवृष्टिप्रपातः १

२ अथ प्रचितकः

'शेषः प्रचितकः' [७।३६] * इति सूत्रकारोक्तदिशा [चण्डवृष्टिप्रपातात्पूर्वं]¹ प्रमितैकैकरेफस्थानेन प्रस्तारे कृते दण्डकः प्रचितक इति संज्ञां लभते । लक्षणं यथा—

यदि ह न-द्वयानन्तरमपि रेफाः स्युर्वसुप्रमिताः ।
प्रचितक इति तत्संज्ञा कथिता श्रीनागराजेन ॥ ३ ॥

यथा—

प्रथमकथितदण्डकः [चण्डवृष्टिप्रपाताभिधानो मुने पिङ्गलाचार्यनाम्नो मतः
प्रचितक इतिततरं दण्डकानामियं जातिरेकैकरेफाभिवृद्ध्या यथेष्टं भवेत् ।
स्वरुचिरचितसंज्ञया तद्विशेषप्रभेदैः पुनः काव्यमध्येऽपि कुर्वन्तु वागीश्वराः
भवति यदि समानसंख्याक्षरैस्तत्र पादव्यवस्था ततो दण्डकः पूज्यतेऽसौ जनैः ॥ ४ ॥

इति प्रचितकः २

---

१ [–] कोष्ठकान्तर्गतोंऽशो नास्ति क प्रतौ । २ प्रचित इति ततः परं इति हलायुधे ।
*टिप्पणी—१ दण्ड पाठः ।
२ एतत्पाठस्य हलायुधटीका ।

३ अथ अर्णादयः

पितृचरणैरिह कथिता प्रतिचरणविवृद्धिरेफा ये ।
दण्डकभेदा पिङ्गलदीपे[1] *ऽप्यर्णादय स्फुटत. ॥ ५ ॥
तत एव हि ते विबुधैः विज्ञेया रेफवृद्धित प्राज्ञैः ।
प्रस्तार्य ते विधेया इत्युपदेश कृतोऽस्माभिः ॥ ६ ॥

अत्रापि समानसख्याक्षर एव पादो भवतीति ध्येयम् । तत्रार्णो यथा—

जय जय जगदीश विष्णो हरे राम दामोदर श्रीनिवासाच्युतानन्त नारायण,
त्रिदशगणगुरो मुरारे [मुकुन्दासुरारे][1] हृषीकेश पीताम्वर श्रीपते माधव ।
गरुडगमन कृष्ण वैकुण्ठ गोविन्द विश्वम्भरोपेन्द्र चक्रायुधाधोक्षज श्रीनिधे,
वलिदमन नृसिंह शौरे भवाम्भोधिघोरार्णसि त्व निमज्जन्त[2]मभ्युद्धरोपेत्य माम् ७

इत्युदाहरणम्[3]

इत्यर्णादयो दण्डकाः ३.

४ अथ सर्वतोभद्र.

रसपरिमितलघुकान्ते यदि यगणा स्युर्मुनिप्रमिताः ।
दण्डक एष निगदितः पिङ्गलनागेन सर्वतोभद्र. ॥ ८ ॥

यथा–

जय जय यदुकुलाम्भोधिचन्द्र प्रभो वासुदेवाच्युतानन्तविष्णो मुरारे,
प्रबलदितिजकुलोद्दामदन्तावलस्तोमविद्रावणे केसरीन्द्रासुरारे ।
प्रणतजनपरितापोग्रदावानलच्छेदमेघौघनारायण श्रीनिवास,
चरणनख[ज]सुधांशुच्छटोन्मेषनि शेषिताशेषविश्वान्धकारप्रकाश ॥९॥

एतस्यैव अन्यत्र **प्रचितक** इति नामान्तरम् ।

इति सर्वतोभद्र ४.

---

१ [–] कोष्ठगतोंऽशो नास्ति क प्रतौ । २ ध्वस्तमज्जन्त । ३ क. इति प्रत्युदाहरणम् ।

*टिप्पणी–१. "अथार्णादय"–प्रतिचरणविवृद्धिरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादय ।

यदि नगणद्वयान्तरमेव प्रतिचरण विवृद्धिरेफा क्रमात् समधिकरगणास्तदा अर्ण-अर्णव-व्याल-जीमूत-लीलाकर-उद्दाम-शङ्खादयो दण्डका स्युरिति । एतेन नगणयुगल-वसुरेफेण अर्ण । तत परे क्रमाद् रगणवृद्धया ज्ञेया । आदिशब्दादन्येऽपि रगणवृद्धया स्वबुद्धया नामसमेता दण्डका विधेया इत्युपदिश्यते ।
(प्राकृतपैंगलम् पृ० ५०८)

५ अथ अशोककुसुममञ्जरी

रगण-जगण क्रमेण हि रन्ध्रगणा यत्र सम्भवन्ता ।
पिङ्गलनागनिगदिता ज्ञेया साऽशोककुसुममञ्जरिका ॥ १० ॥

यथा–

राधिके विलोकयाद्य केलिकाननं पिकावलीविरावराजितं मनोरमं च
सुन्दराङ्गि चारुचम्पकस्रगावली विराजितं विलोलहाररम्भितेश्वरं च ।[1]
मद्वचः शृणुष्व ते हितं च वच्मि हे सखि प्रमोदकारणं मनोविनोदनं च
फुल्लनागकेसरादिपुष्परेणुभूषितं भजाद्य नन्दनन्दनं मनोहरं च ॥ ११ ॥

इति अशोककुसुममञ्जरी ५.

६ अथ कुसुमस्तबकः

सखि ! यत्र रन्ध्र-सगणा श्रुतिपदघटिता विराजन्ते ।
कुसुमस्तबकं दण्डकमाह तदा तं तु पिङ्गलो नागः ॥ १२ ॥

यथा–

सखि ! नन्दसुतं कमनीयकलाकलितं करुणावरुणालयमीशहरिं
रजनीशमुखं भवभीतिहरं नवनीतकरं भवसागरपारतरिम् ।
चपलारुचिरांशुकवल्लिधरं कमलावनिमालितमालि तमालरुचिं
भवमोचन-पङ्कजलोचनरोचनरोचितमालमहं शरणं कलये ॥ १३ ॥

इति कुसुमस्तबकः ६.

७ अथ मत्तमातङ्गः

यत्र स्वेच्छया घटिता भवन्ति विहगा[2] सरोजाक्षि ! ।
पिङ्गलभुजगाधिपतिः कथयति तं मत्तमातङ्गम् ॥ १४ ॥

यथा–

यामुने सैकते रासकेलामतं गोपिकामण्डलीमध्यगं वेणुवाद्ये रतं,
मञ्जुगुञ्जावतंसं जगन्मोहनं चारुहासश्रिया संश्रितं कुन्तलैरञ्चितम् ।
विभ्रकेलीकलोल्लाससम्भावितं वासवृन्दापदं मूलकं काममापूरकं
कल्पवृक्षस्य मूले स्थितं भक्तिकोलाहलाराञ्चितं चेतसा कृष्णचन्द्रं भजे ॥१५॥

इति मत्तमातङ्गः ७.

---

१ क. विलोलचरणं च प्रती नास्ति । २ क. मे वच । ३ ख. विहगा ।

८. अ अनङ्गशेखर.

जगण-रगण-क्रमेण च रन्ध्रगणा यत्र लघ्वन्ता (गुर्वन्ता) ।
फणिपतिपिङ्गलभणिता[1] स ज्ञेयोऽनङ्गशेखर कविभि ॥ १६ ॥

यथा–

विलोलचारुकुण्डल स्फुरत्सुगण्डमण्डल सुलोलमौलिकुन्तल स्मरोल्लसत्,
नवीनमेघमण्डलीवपुर्विभासिताम्बरप्रभातडित्समाश्रित स्मित दधत् ।
मयूरचारुचन्द्रिकाचयप्रपञ्चचुम्बितोल्लसत्किरीटमण्डित समुच्छ्वसन्,
विलासिनीभुजावलीनिरुद्धबाहुमण्डल. करोतु व कृतार्थता जनानवन्[2] ॥१७॥

इति अनङ्गशेखर ८

इति दण्डका.

एवमन्येपि नकारद्वयानन्तरमनियतैस्तकारैः दण्डका प्रबन्धेषु दृश्यन्ते । तेऽस्माभिरपि यतत्वादेवोपेक्षिता ग्रन्थविस्तरभयाच्चेह न लक्षिता, इत्युपरम्यते[1*] ।

इति श्रीवृत्तमौक्तिके [तृतीय] दण्डकप्रकरणम् ।

---

१. ख भणित । २ ख जनानंनवन् ।

*टिप्पणी—दण्डकवृत्तस्य ग्रन्थान्तरेषु प्राप्तभेदा पञ्चमपरिशिष्टे द्रष्टव्याः ।

चतुर्थं अर्द्धसम-प्रकरणम्

अथ अर्द्धसमवृत्तानि लक्ष्यन्ते—

चतुष्पद भवेत् पद्य द्विधा तच्च प्रकीर्तितम् ।
जातिवृत्तप्रभेदेन छन्द [शास्त्रविशारदै ॥ १ ॥
मात्राकृता भवेज्जातिर्वृत्तं वर्णकृतं मतम् ।
तच्चापि त्रिविध प्रोक्त समार्द्ध]¹ समक तथा ॥ २ ॥
विषमं चेति तस्यापि लक्ष्यते लक्षणं त्विह ।
चतुष्पदी समा यस्य तत्समं परिकीर्तितम् ॥ ३ ॥
यस्य स्यात प्रथम पादस्तृतीयेन समस्तथा ।
द्वितीयस्तु चतुर्थेन भवत्यर्द्ध सम हि तत् ॥ ४ ॥
यस्य पादचतुष्कं स्याद् भिन्नं लक्षणमेवत ।
तदाहुर्विषम वृत्तं छन्दशास्त्रविशारदा ॥ ५ ॥
समं तत्र मया प्रोक्तमथार्द्धसममुच्यते ।
यथा श्रीनागराजेन भाषित सूत्रवृत्तिभि ॥ ६ ॥

तत्र प्रथम—

१ पुष्पिताग्रा

यदि रसलघुरेफतो यकारो विषमपदे परिभाति पन्नगोक्ता² ।
सम इह चरणे च नौ जजौ रो गुरुरपि चेज्जयतीह पुष्पिताग्रा ॥ ७ ॥

यथा–

सहचरि ! कथयामि ते रहस्यं न लघु कदाचन तद्गृहं प्रवेश्या³ ।
इह विषमविषमा गिरः सखीनां सकपटचाटुतरा पुरस्सरन्ति ॥ ८ ॥

यथा वा–

प्रसरति पुरत सरोजमाला तदनु मदान्धमधुव्रतस्य पङ्क्ति ।
तदनु भृतशरासनो मनोभू–स्तव हरिणाक्षि विलोकनं तु पश्चात् ॥ ९ ॥

इति वा–

दिवि दिवि परिहासगूढगर्भा पिशुनगिरो गुरुसम्भ्रमं च तावृक ।
सहचरि ! हृदये निवेदनीयं भवदनुरोधवशादयं विपाक ॥ १० ॥

---

१ कोष्ठगतोंऽश क प्रतौ नास्ति । २ ख पन्नगोक्ता । ३ ख, प्रवेशात् । ४ क मनोहर ।

अथ च–

इह खलु विषम पुरा कृताना, विलसति जन्तुषु कर्मणा विपाक ।
क्व जनकतनया क्व रामजाया, क्व च रजनीचरसङ्गमापवाद ॥ ११ ॥
इत्यादि महाकविप्रबन्धेषु शतश. प्रत्युदाहरणानि[1] ।

इति पुष्पिताग्रा १.

२. अथ उपचित्रम्

विषमे यदि सौ सलगा. प्रिये ! भौ च समे भगगा सरसाश्चेत् ।
फणिना भणित गणित गणै-र्वृत्तमिद कथित ह्युपचित्रम् ॥ १२ ॥

यथा–

नवनीतकर करुणाकर, कालियगञ्जनमञ्जनवर्णम् ।
भवमोचन-पङ्कजलोचन, चिन्तय चेतसि हे सखि ! कृष्णम् ॥ १३ ॥

इति उपचित्रम् २.

३. अथ वेगवती

विषमे यदि सादशनिर्गो, भत्रितय समके गुरुयुग्मम् ।
कविना फणिना भणितैव, वेदय चेतसि वेगवतीयम् ॥ १४ ॥

यथा–

सखि ! नन्दसुत कमनीय, यादववशधुरन्धरमीशम् ।
सनकादिमुनीन्द्रविचिन्त्य, कुञ्जगत परिशीलय कृष्णम् ॥ १५ ॥

इति वेगवती ३

४. अथ हरिणप्लुता

विषमे यदि सौ सगणो लगौ, सखि ! समे नगणे भभरा कृताः ।
कविना फणिना परिजल्पिता, सुमुखि ! सा गदिता हरिणप्लुता ॥ १६ ॥

यथा–

नवनीरदवृत्तमनोहर[2], कनकपीतपटद्युतिसुन्दर ।
अलिके तिलकीकृतचन्दन-स्तव तनोतु मुद मधुसूदन ॥ १७ ॥

इति हरिणप्लुता ४

५. अथ अपरवक्त्रम्

विषम इह पदे तु नौ रलौ, गुरुरपि चेद् घटित सुमध्यमे ।
सम इह चरणे नजौ जरौ, तदपरवक्त्रमिद भवेन्न किम् ॥ १८ ॥

---

१ ख समुदाहरणानि ।　२ ख वृन्दमनोहर ।

यथा—

स्फुटमधुरपद प्रपञ्चने, कलितमिव हृदयं तवैव ते ।
प्रममसममुना छवामनं, न खलु कदापि विलोकयाम्यहम् ।। १९ ।।

यथा वा, हर्षचरिते [प्रथमोच्छ्वासे]—

तरलयसि दृशं किमुत्सुका-मविरलवालविलासलालसे[1] ।
मवतर कलहंसि वापिकां पुनरपि यास्यसि पङ्कजालयम् ।। २० ।।

इति प्रत्युदाहरणम ।

इति अपरवक्त्रम् ५

६ अथ सुन्दरी

विषमे यदि सो भगो सगौ समके स्भौ रलगा भवन्ति चेत् ।
घनपीनपयोधरे ! तदा कथिता नागनृपेण सुन्दरी ।। २१ ।।

यथा–

अयि मानिनि ! मानकारणं ननु तस्मिन्न विलोकयाम्यहम् ।
कुरु सम्प्रति मे वचोऽमृतं प्रियगेहं व्रज किं विडम्बनं ।। २२ ।।

यथा वा–

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ।
वसुधामपि हस्तगामिनी-मकरोदिन्दुमतीमिवापराम् ।। २३ ।।*[1]

इति रघुवंशादिमहाकाव्येषु यत्तत्र प्रत्युदाहरणानि[2] ।

इति सुन्दरी ६

७ अथ भद्रविराट्

अस्मिन् विषमे तभौ रगौ चेद्, म सौ ज' समके गुरू भवेताम् ।
तर्द्धं कथित कवीन्द्रवर्यैः—स्तज्ज्ञं भद्रविराडिति प्रसिद्धम् ।। २४ ।।

यथा-

मद्वेणुविरावमोहितास्ता, गोप्यः स्वं वसनं च न स्मरेयुः[3] ।
प्रायेण[4] निवारिता जनौघै-र्गातव्ये कृतनिश्चया बभूवुः ।। २५ ।।

इति भद्रविराट् ७

---

१ मधुकरनागतवालतानिवे हर्षचरिते । २ ख समुदाहरणानि । ३ ख. स्मरन्ति ४ ख ह्यात्मैव ।

* टिप्पणी—१ रघुवंश स ८ पद्य १

८ अथ केतुमती

विषमे सजौ सखि ! सगौ चेद्, भ. रामके रनौ गुरयुगाभ्याम् ।
मिलितौ यदैव भवतस्तौ, केतुमतीति सा भवति वृत्तम् ।। २६ ।।

यथा–

यमुनाविहारकलनाभि, कालियमौलिरत्ननटनाभि ।
विदितो जनेन परमेश, केवलभक्तितस्तु भुवनेश. ।। २७ ।।

इति केतुमती ८

६ अथ वाङ्मती

यद्ययुग्मयोः रजौ रजौ क्रतौ च, जरौ जरौ च युग्मयोर्गसगतौ वा ।
हारशङ्कक्रमैरयुग्मतश्च, समानयोर्विपर्ययेण वाङ्मतीयम् ।। २८ ।।

यथा–

काञ्चनाभ-वाससोपलक्षितश्च, मयूरचन्द्रिकाचयैर्विराजितश्च ।
नन्दनन्दन पुनातु सन्तत च, मनोविनोदन प्रकामभासुरश्च ।। २९ ।।
अत्र समयो पादयो पादान्तगुरुत्वमवधेयम् ।

इति वाङ्मती ६

१० अथ षट्पदावली

वाङ्मत्येव हि सुकले, विपरीता भवति चेद् वाले ! ।
कथयति पिङ्गलनागस्तामेता षट्पदावली रुचिराम् ।। ३० ।।
ऊह्यमुदाहरणम् ।

इति षट्पदावली १०.

इत्यर्द्धसमवृत्तानि कथितान्यत्र कानिचित् ।
सुधीभिरूह्यान्यान्यानि प्रस्तार्य स्वमनीषया ।। ३१ ।।

इति श्रीवृत्तमौक्तिके [चतुर्थं] अर्द्धसमप्रकरणम् ।

यथा—

स्फुटमधुरवचनप्रपञ्चने कलितमिदं हृदय सदैव ते ।
मननमसमधुना तवाननं न खलु कदापि विलोकयाम्यहम् ॥ १९ ॥

यथा वा हर्षचरिते [प्रथमोच्छ्वासे]—

तरलयसि दृशं किमुत्सुका-मविरतवासविलासलालसे[1] ।
अवतर कलहंसि वापिकां, पुनरपि यास्यसि पङ्कजालयम् ॥ २० ॥

इति प्रत्युदाहरणम् ।

इति अपरवक्त्रम् ५

६ अथ सुन्दरी

विषमे यदि सौ लगौ लगौ समके स्भौ रभगा भवन्ति चेत् ।
घनपीनपयोधरे ! तदा कथिता नागनृपेण सुन्दरी ॥ २१ ॥

यथा–

अयि मानिनि ! मानकारणं ननु तस्मिन्न विलोकयाम्यहम् ।
कुरु सम्प्रति मे वचोऽमृतं प्रियगेहं व्रज किं विडम्बने ॥ २२ ॥

यथा वा–

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ।
वसुधामपि हस्तगामिनी-मकरोदिन्दुमतीमिवापराम् ॥ २३ ॥*[1]

इति रघुवंशादिमहाकाव्येषु धवश्च प्रत्युदाहरणानि[2] ।

इति सुन्दरी ६

७ अथ भद्रविराट्

अस्मिन् विषमे तजौ रगौ चेद् भः सौ गः समके गुरू भवेताम् ।
तद् कथितं कवीन्द्रवर्यै—स्तज्ज्ञं भद्रविराडिति प्रसिद्धम् ॥ २४ ॥

यथा–

यद्वेणुविरावमोहितास्ता गोप्यः स्वं वसनं च न स्मरेयुः[3] ।
आर्येव[4] निवारिता मनोभैरर्पितरूपे कृतनिश्चया बभूवुः ॥ २५ ॥

इति भद्रविराट् ७

---

१ मकलुषमानसवासलालिते हर्षचरिते । २ ख प्रत्युदाहरणानि । ३ ख स्मरेत ४ ख हार्येव ।

*टिप्पणी—१ रघुवंश ८ अ पद्य १

यथा-

यमुनातटे विहरतीह, सरसविपिने मनोहरे।
रासकेलिरभसेन सदा, व्रजसुन्दरीजनमनोहरो हरि ॥ ८॥

इति सौरभम् २

३ अथ ललितम्

न-युग च हस्तयुगल च, सुमुखि ! चरणे तृतीयके।
भवति सुकविविदित ललित, कथित तदेव भुवने मनोहरम् ॥ ९॥

यथा-

व्रजसुन्दरीसहचरेण[1], मुदितहृदयेन गीयते।
सुललितमधुरतर हरिणा, करुणाकरेण सतत मुरारिणा ॥ १०॥

इति ललितम् ३.

४ अथ भाव

षट्सख्याता हारा, पादेषु त्रिष्वेवम्।
अन्ते कान्त यस्मिन्, भ-त्रय-ग-द्वितय[2] वद भावम् ॥ ११॥

यथा-

राधामाधायैना, चित्ते बाधा त्यक्त्वा।
कल्पान्ते य क्रीडेत्, त किल चेतसि भावय नित्यम् ॥ १२॥

इति भाव ४

५ अथ वक्त्रम्

कदाचिदर्द्धसमक, वक्त्र च विषम भवेत्।
द्वयोस्तयोरुपान्तेषु, वृत्त तदधुनोच्यते ॥ १३॥

तत्र वक्त्रम्-

युग्भ्या वक्त्र मगौ स्याता, सागराद् य[3]स्त्वनुष्टुभि।
ख्यात सर्वगणैरेतत्, प्रसिद्ध तद्धलायुधे ॥ १४॥

यथा-

मुखाम्भोज सदा स्मेर, नेत्र नीलोत्पल फुल्लम्।
गोपिकाना मुरारातेश्चेतोभृङ्ग जहारोच्चै ॥ १५॥

इति वक्त्रम् ५

---

१. ख समुदयेन। २ क यत्रयगद्वितयम। ३ चतुर्थाक्षरादनन्तर यगणो वेय इत्यर्थ।

पञ्चमं विषमवृत्त-प्रकरणम्

अथ विषमवृत्तानि

मिश्रचिह्नचतुष्पादमुद्दिष्टं विषमं मया ।
प्रयेदानीं तदेवात्र सोदाहरणमुच्यते ॥ १ ॥

तत्र प्रथमम्—

१ उद्गता

सजसा लघुः प्रथमतस्तु नसजगुरुकाणि युग्मतः ।
स्युस्तदनु भनभा गयुता सजसा जगौ चरमतरपदोद्गता ॥ २ ॥

यथा—

विलसास गोपरमणीषु, तरणितनयातटे हरिः ।
वंशममरतले कलयन् वनिताजनेन विमुखं निरीक्षितः ॥ ३ ॥

इति उद्गता १

अथोद्गताभेदः

सजसा लघुः प्रथमतस्तु नसजगुरुकाणि युग्मतः ।
स्युस्तदनु भनसजा गयुता, सजसा जगौ च समु तुर्यतो भवेत् ॥ ४ ॥

तृतीयचरणे वा स्याद् भेदः समुपलभ्यते । ततो भारवि-माघाभ्यां उद्गते यमुदीरिता । यथा—

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः ॥ ५ ॥*[१]

यथा वा माघे*

तव धर्मराज इति नाम कथमिह यथार्थमुच्यते ।
भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः ॥ ६ ॥

इति उद्गताभेदः १

२ अथ सौरभम्

प्रथमं द्वितीयमथ तुर्य-मिह समगुणास्ति पङ्क्तिः ।
सौरभं यदि तृतीयपदे विहगो नगौ गुरुरपीह दृश्यते ॥ ७ ॥

---

*टिप्पणी—१ किरातार्जुनीयम्, स० १२ पद्य १ ।
„ २ शिशुपालवधम् स० १५, पद्य १७ ।

पदचतुरूर्ध्वम्—प्रथमचरणे अष्टौ वर्णा, द्वितीयचरणे द्वादशाक्षरवर्णा, तृतीयचरणे षोडश वर्णा., चतुर्थचरणे च विंशतिवर्णा भवन्ति। अस्मिन् वृत्ते गुरुलघुनियमो नास्ति।

आपीड — [प्र.च] लघु ६, गुरु २। [द्वि च] लघु १०, गुरु २।
[तृ च] लघु १४, गुरु २। [च च.] लघु १८, गुरु २।

प्रत्यापीड — [प्र च] गुरु २, लघु ६। [द्वि च] गुरु २, लघु १०।
[तृ च] गुरु २, लघु १४। [च च] गुरु २, लघु १८।

प्रत्यापीड़— [प्र च] ग २, ल ४, ग २। [द्वि.च] ग २ ल ८, ग २।
[तृ च] ग २. ल १२, ग २। [च च] ग २, ल १६, ग २।

मञ्जरी— [प्र च] १२ वर्णा। [द्वि च] ८ वर्णा।
[तृ च] १६ वर्णा। [च च] २० वर्णा।

लवली— [प्र च] १६ वर्णा। [द्वि च] १२ वर्णा.।
[तृ च] ८ वर्णा। [च च] २० वर्णा।

अमृतधारा—[प्र च] २० वर्णाः। [द्वि च] १६ वर्णा।
[तृ.च] १२ वर्णा.। [च च] ८ वर्णा।

उपस्थितप्रचुपितम्— [प्र च] म स ज.भ ग ग। [द्वि.च] स न.ज.र ग
[तृ च] न न स [च च] न न न ज य

वर्द्धमानम्— [प्र च.] म स ज भ ग ग [द्वि.च] स.न.ज र ग
[तृ च.] न न स.न न स. [च च] न न न ज य

शुद्धविराट्वृषभ – [प्र च] म स ज भ ग ग [द्वि च.] स न ज र ग
[तृ च] त ज र [च च.] न न न ज य

६. अथ पथ्यावक्त्रम्

अपि च –

युजोश्चतुर्थतो येन (जेन) पथ्यावक्त्रं प्रकीर्तितम् ।
[एवमन्येऽपि भेदास्तु विज्ञेया गणभेदतः ॥ १६ ॥]

यथा –

रासकेलिसतृष्णस्य कृष्णस्य मधुवासरे ।
आसीद् गोपमृगाक्षीणां पथ्यावक्त्र मधुश्रुतिः ॥ १७ ॥

इति पथ्यावक्त्रम् ६

एवमन्यान्यपि गणविभेदात् शतानि वक्त्रवृत्तानि ।

यदुक्तम् –

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरुषष्ठं तु पादानां शेषेष्वनियमो मतः ॥ १८ ॥
अतः श्रीकालिदासश्च स्वप्रबन्धे समुज्जगौ ।
तथान्येऽपि कवीन्द्राश्च स्वनिबन्धे बबन्धिरे ॥ १९ ॥

यथा –

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ २० ॥*[1]

किञ्च –

प्रयोगे प्रायिकं प्राहुः केप्येतद् वक्त्रलक्षणम् ।
लोकेऽनुष्टुबिति ख्यातिस्तस्याष्टाक्षरता कृता ॥ २१ ॥
तथा नानापुराणेषु नानागणविभेदतः ।
वृत्तमष्टाक्षरं वक्त्रं विषमाख्यां प्रयाति हि ॥ २२ ॥
एवं तु विषमं वृत्तं दिङ्मात्रमिह कीर्तितम् ।
शेषमाकरतो ज्ञेयं सुधीभिर्भावनापरैः ॥ २३ ॥
पदचतुरूर्ध्वं च वृत्तं मात्रासमकमेव च ।
उपस्थितप्रचुपित-मथान्यदपि वृत्तकम् ॥ २४ ॥
हलायुधे प्रसिद्धत्वादत्र [नास्त्युप]योगिता ।
तद्ग्रन्थगौरवभीत्या च मयका न प्रपञ्चितम्** ॥ २५ ॥

इति श्रीवृत्तमौक्तिके वार्तिके द्वितीये वृत्तपरिच्छेदे
विषमवृत्तप्रकरणं पञ्चमम् ।

[-] कोष्ठगतोंऽशो नास्ति क प्रतौ ।
टिप्पणी – १ रघुवंश स० १ प० १
**टिप्पणी – २ पदचतुरूर्ध्वादिवृत्तानां लक्षणानि श्रीहलायुधरचित-छन्दःसूत्रटीकानुसारेण
संक्षेपेणोद्धियन्ते –

पदचतुरूर्ध्वम्—प्रथमचरणे अष्टौ वर्णा, द्वितीयचरणे द्वादशाक्षरवर्णा, तृतीयचरणे षोडश वर्णा, चतुर्थचरणे च विंशतिवर्णा भवन्ति। अस्मिन् वृत्ते गुरुलघुनियमो नास्ति।

आपीड — [प्र.च] लघु ६, गुरु २। [द्वि च] लघु १०, गुरु २।
[तृ च.] लघु १४, गुरु २। [च च.] लघु १८, गुरु २।

प्रत्यापीड.— [प्र च] गुरु २, लघु ६। [द्वि च] गुरु २, लघु १०।
[तृ च] गुरु २, लघु १४। [च च] गुरु २, लघु १८।

प्रत्यापीडः— [प्र च] ग २, ल ४, ग २। [द्वि.च] ग २ ल ८, ग २।
[तृ च] ग २ ल १२, ग २। [च च] ग २, ल. १६, ग २।

मञ्जरी— [प्र च] १२ वर्णा। [द्वि च] ८ वर्णा।
[तृ च] १६ वर्णा। [च च] २० वर्णा।

लवली— [प्र च] १६ वर्णा। [द्वि च] १२ वर्णा।
[तृ च] ८ वर्णा। [च च] २० वर्णा।

अमृतधारा— [प्र च.] २० वर्णा.। [द्वि च] १६ वर्णा.।
[तृ.च] १२ वर्णा.। [च च] ८ वर्णा।

उपस्थितप्रचुपितम्— [प्र च] म स ज भ ग ग। [द्वि च] स न.ज र ग
[तृ च] न न स [च च] न न न ज य

वर्द्धमानम्— [प्र च.] म स ज भ ग ग [द्वि.च] स.न.ज र ग
[तृ च.] न न स.न न स. [च च] न न न ज य

शुद्धविराट्वृषभ – [प्र च] म.स ज भ ग ग [द्वि च.] स न ज र ग
[तृ च] त ज र [च च] न न न ज य

षष्ठं वैतालीय प्रकरणम्

---

१ अथ वैतालीयम्

विषमे रससङ्ख्यका कला समकेऽष्टौ न समा पृथक्कृता ।
न समात्र पराश्रया कला वैतालीयेऽस्य र-लग-गाः ॥ १ ॥

विषमे रसमात्राः स्युः समे चाष्टौ कलास्तथा ।
वैतालीयं भवेद् वृत्तं तयोरन्ते रलौ गुरुः ॥ २ ॥

यथा—

तव तन्वि ! कटाक्षवीक्षितैः प्रचरद्भिः श्रवणान्तगोचरैः ।
विशिखैरिव तीक्ष्णकोटिभिः प्रहृतः प्राणिति दुष्करं नरः ॥ ३ ॥

अस्य च भूयांसि सप्रपञ्चमुदाहरणप्रत्युदाहरणानि पिङ्गलवृत्तौ सन्ति तानि तत एवावधेयानि । [मंदपन्नाख्ये च द्वितीये सर्गे सन्ति तानि तत एवावधेयानि]

इति वैतालीयम् १

२ अथ औपच्छन्दसकम्

तदेवान्तेऽधिके गुरौ स्यादौपच्छन्दसकं कवीन्द्रहृद्यम् ।
फणिभाषितमुत्तमं रसालं पठनीयं कविपण्डितैरुदारैः ॥ ४ ॥

यथा—

परममनिरीक्षणानुरक्तं स्वयमत्यन्तनिगूढचित्तवृत्तिम् ।
अनवस्थितमर्थलुब्धमाराद् विपरीतं विजहीहि मित्रमेवम् ॥ ५ ॥

इति औपच्छन्दसकं वैतालीयम् २

३ अथ आपातलिका

आपातलिका कथितेयं भाद् गुरुकावथ पूर्ववदन्यत् ॥ ६ ॥

यथा—

पिङ्गलकेशी कपिलाक्षी वाचाला या विकटोन्नतदन्ती ।
आपातलिका पुनरेषा नृपतिकुलेऽपि न मान्यमुपैति ॥ ७ ॥

इति आपातलिका ३

४ अथ नलिनम्

विषमपदः स्यान्नलिनाख्यम् ॥ ८ ॥

---

१ क गुरौ । २ कोष्ठकान्तर्गतः पाठो नास्ति क प्रतौ ।

[व्या०] विषमैरेव चतुर्भिरापातलिकापदैर्नलिनाख्य वैतालीयमित्यर्थः ।
यथा–

कुञ्चितकेशी नलिनाक्षी, स्थूलनितम्बा रुचिकान्ता ।
पद्मसुहस्ता रुचिरौष्ठी, गोष्ठीरसिका परिणेया ॥ ६ ॥

इति नलिनाख्य वैतालीयम्

५. अथापर नलिनम्

समचरणैरपि चान्यदुदीते ॥ १० ॥

[व्या०] समैरेव चतुर्भिरापातलिकापादैरपर नलिन भवतीत्यर्थ ।
यथा–

पङ्कजलोचनमम्वुददेह, वालविनोद-सुनन्दितगेहम् ।
पद्मजशम्भुकृतस्तुतिमीश, चिन्तय कृष्णमपारमनीषम् ॥ ११ ॥

इति अपर नलिनाख्य वैतालीयम् ५

६ अथ दक्षिणान्तिका वैतालीयम्

द्वितीयलस्यान्त्ययोगतः, पदेषु सा स्याद् दक्षिणान्तिका ॥ १२ ॥

[व्या०] द्वितीयलघोरन्त्येन–तृतीयेन योगतश्चतुर्षु पादेषु यत्र सा दक्षिणान्तिका इत्यर्थः। अतएव शुद्धवैतालीयस्य विषमपदैर्दक्षिणान्तिका, समपदैरुत्तरान्तिका इति शम्भुरप्याह ।
यथा–

ववौ मरुद्दक्षिणान्तिको, वियोगिनीप्राणहारक ।
प्रकम्पिताशोकचम्पको, वसन्तजोऽनङ्गबोधक ॥ १३ ॥

यथा वा, ममप्रत्युदाहरणम्[1]—

नमोऽस्तु ते रुक्मिणीपते, जगत्पते श्रीपते हरे ।
भवाम्बुधेस्तारयाशु मा, विधेहि सन्मतिं शुभाम् ॥ १४ ॥

इति दक्षिणान्तिका वैतालीयम् ६

७ अथ उत्तरान्तिका वैतालीयम्

शुद्धवैतालीयस्य समपदैरुत्तरान्तिका ॥ १५ ।
यथा–

सहसा सादितकसभूपतिं, धृतगोवर्द्धनशैलमुद्धरम् ।
यमुनाकुञ्जविहारिण हरिं, यदुवीर कलयाम्यहर्निशम् ॥ १६ ॥

इति उत्तरान्तिका वैतालीयम् ७.

८ अथ प्राच्यवृत्ति

तुर्यस्य तु शेषयोगत, प्राच्यवृत्तिरिह युग्मपादयो ॥ १७ ॥

---

१. ख. ममै(वो)दाहरणम् ।

[व्या०] [चतुर्वकलारस्य स्थाने पञ्चकलेन योगतः प्राच्यवृत्तिर्नाम वैतालीयं युग्मपादयोः-समपादयोरित्यर्थः ।][1]

यथा- वृत्तमुक्ते—*[1]

विपुलार्थसुबोधकाक्षरा कस्य मनो न हरन्ति मानसम् ।
रसभावविशेषपेशला प्राच्यवृत्ति कविकाव्यसम्पदः ॥ १८ ॥

यथा वा वृत्तमुक्ते—

स्वगुणैरनुरञ्जितप्रजः प्राच्यवृत्तिपरिपालने रतः ।
रणभूमिषु भीमविक्रमो विन्ध्यवत्ननृपतिर्जयत्यसौ ॥ १९ ॥

यथा वा मम[1] प्रत्युदाहरणम्—

कति सन्ति न गोपबालका कामकेलिकलनासुकोविदाः ।
मयि माधव ! एव केवलं चेतनां मनु[2] परिक्षिणोति मे ॥ २० ॥

इति प्राच्यवृत्तिर्नाम वैतालीयम् ८

९ अथ उदीच्यवृत्तिर्वैतालीयम्

उदीच्यवृत्तिस्त्वयुग्मयोः भवति धृतीयस्यायोगतः ॥ २१ ॥

[व्या०] अयुग्मयोः-प्रथमतृतीययोः पादयोः तृतीयस्य लघोरादान-द्वितीयेन योगात् उदीच्यवृत्तिर्नाम वैतालीयम् । यथा–

यथा- वृत्तमुक्ते[2]

अवाचकमनुचिताक्षरं, श्रुतिदुष्टं श्रुतिकष्टमक्रमम् ।
प्रसादरहितं च नेष्यते कविभिः काव्यमुदीच्यवृत्तिभिः ॥ २२ ॥

यथा वा ममापि उदाहरणम्—

अबन्धकमतिनिबिड परं परमेशं परमार्थपेशलम् ।
अनाकलितवैभवं विभु जगतां वन्दमनारतं भजे ॥ २३ ॥

इति उदीच्यवृत्तिर्वैतालीयम् ९.

१० अथ प्रवृत्तकं वैतालीयम्

प्रवृत्तक पदैर्भिरेखयोः ॥ २४ ॥

[व्या०] उदीच्यवृत्ति-प्राच्यवृत्त्योर्युगपत्प्रवृत्तत्वे, पदैः ... युग्मपादे पञ्चकलेन पूर्व संपूज्यते अयुग्मपादे तृतीयेन पूर्वमित्यर्थः ।

---

१ [-]कोष्ठकान्तर्गतांशस्य स्थाने तस्मिन्नेवार्थे वृत्तांश एवास्ति क. प्रतौ ।

२ क. मत्प्रत्युदाहरणम् । २ क. ख. मनुः ।

*टिप्पणी—१ अन्य-भास्त-वृत्तमुक्तावलीका प ४ का १७ उदाहरणम्
२ " " ४ १८

यथा ,हलायुधे*[1]—

जयो भरतवशस्य[1], श्रूयता श्रुतमनोरसायनम् ।
पवित्रमधिक शुभोदय, व्यासवक्त्रकथित प्रवृत्तकम् ।। २५ ।।

प्रत्युदाहरणम्—

हरिं भजत रे जना परं, श्रूयता परमधर्म्ममुत्तमम् ।
न काल इह कालयत्यसौ, सर्वघस्मरघनाघनद्युति[2] ।। २६ ।।

इति प्रवृत्तक वैतालीयम् १०

११ अथ अपरान्तिका

अस्य युग्मरचिताऽपरान्तिका ।। २७ ।।

[व्या] अस्य–प्रवृत्तकस्य समपदकृता–समपादलक्षणयुक्तैश्चतुर्भि पादै रचिताऽपरान्तिका ।

यथा, हलायुधे*[2]—

स्थिरविलासनतमौक्तिपेशला[3], [कमलकोमला][4]ङ्गी मृगेक्षणा ।
हरति कस्य हृदय न कामिन , सुरतकेलिकुशलाऽपरान्तिका ।। २८ ।।

यथा वा, सुल्हणे—

तुङ्गपीवरघनस्तनालसा, चारुकुण्डलवती मृगेक्षणा ।
पूर्णचन्द्रवदनाऽपरान्तिका, चित्तमुन्मदयतीयमङ्गना ।। २९ ।।

यथा वा, मम प्रत्युदाहरणम्—

चारुकुण्डलयुगेन मण्डितो, बर्हिबर्हकृतमौलिशेखर· ।
ब्रूत भो पनसपिप्पलादयो, नन्दसूनुरिह नावलोकित. ।। ३० ।।

इति अपरान्तिका ११.

१२ अथ चारुहासिनी

अयुक्कृता चारुहासिनी ।। ३१ ।।

[व्या०] प्रवृतकस्यैव विषमपादलक्षणयुक्तैश्चतुर्भि पादैर्विरचिता चारुहासिनी नाम वैतालीयम् । किं तल्लक्षणम् ? चतुर्दशमात्रत्व तृतीयेन च द्वितीययोग. ।

---

१. इव भरतभूभृताम् । २. ख युति । ३ कावली 'हलायुधे' । ४. कोष्ठगतोंऽशो नास्ति क प्रतौ ।

*टिप्पणी—१ छन्द शास्त्रहलायुधटीका अ० ४, का ३९ उदाहरणम् ।
२ ,, ,, ,, ,, ,, ४१ उदाहरणम् ।

यथा, हलायुध प्राह[1]—

ममाङ्गप्रसूतवल्लवीथिभिः, स्मरोल्लसितगण्डमण्डला ।
कटाक्षललिता च कामिनी, मनो हरति चारुहासिनी ॥ ३२ ॥

यथा वा वृत्तरत्नाकरटीकायां सुल्हण प्रोवाच—

न कस्य चेत क्षम-मयं करोति सा सुन्दराकृति ।
विचित्रवाक्योक्तिमण्डिता विलासिनी चारुहासिनी ॥ ३३ ॥

यथा वा, मम प्रत्युदाहरणम्—

सुवृत्तमुक्तावलीधरं प्रतप्तचामीकराम्बरम् ।
मयूरपिच्छैर्विराजितं, नमाम्यहं नन्दनन्दनम् ॥ ३४ ॥

इति चारुहासिनी वैतालीयकम् १२

इति श्रीवृत्तमौक्तिके वैतालीयप्रकरणं षष्ठम् ।

---

*टिप्पणी—१ छन्दशास्त्रहलायुधटीकायां अ० ४ कारिकायां ४० उदाहरणम्

सप्तमं यतिनिरूपण—प्रकरणम्

अथाभिधीयते चात्र यतिर्विच्छेदसंज्ञिता ।
विरामधृतिविश्रामावसानपदरूपिणी ॥ १ ॥
समुद्रेन्द्रियभूतेन्द्ररसपक्षदिगादय ।
साकाङ्क्षत्वादिमे शब्दा यत्या सम्बन्धमाश्रिता ॥ २ ॥
तस्यास्तु लक्षण सम्यगुच्यते वृत्तमौक्तिके ।
आलोच्य मूलशास्त्राणि सोदाहरणमञ्जसा ॥ ३ ॥
यति सर्वत्र पादान्ते श्लोकस्यार्द्धे विशेषत ।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके ॥ ४ ॥
क्वचित्तु पदमध्येऽपि समुद्रादौ तथैव च ।
अत्र पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥ ५ ॥
पूर्वान्तवत् स्वर सन्धौ क्वचिदेव परादिवत् ।
द्रष्टव्यो यतिचिन्तायां यणादेश परादिवत् ॥ ६ ॥
नित्य प्राक्पदसम्बन्धाश्चादय प्राक्पदान्तवत् ।
परेण नित्यसम्बन्धा प्रादयश्च परादिवत् ॥ ७ ॥

'यतिः सर्वत्रपादान्ते' इत्यादि कारिकाचतुष्टय यथास्थान व्याकरिष्याम । तत्र–यति सर्वत्र सर्ववृत्तेषु इत्यर्थ, पादान्त एव भवति । यथा–

[विशुद्धज्ञानदेहाय शिवाय गुरवे नम । इत्यादि ।
तस्यैव प्रत्युदाहरण यथा][1]—

नमस्तस्मै महादेवाय शशाङ्कार्द्धमौलये । इति ।

'श्लोकस्यार्द्धे विशेषत.' इत्यत्र सन्धिकार्याभाव, स्पष्टविभक्तिकत्व च विशेषतो यत्र भवति । तद्यथा—

नमस्यामि सदोद्भूतमिन्धनीभूतमन्मथम् ।
ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम् ॥

अत्रेश्वरमित्यस्य मकारेण सयोगो न कर्त्तव्य । समासे तस्यैव प्रत्युदाहरण । यथा–

सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी–
पिञ्जरीकृतपादाब्जद्वन्द्व वन्दामहे शिवम् ॥ इति ।

'समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके' तत्र स्वतन्त्रव्यक्तविभक्तिक समासान्तर्भूतमव्यक्तविभक्तिकम् । यथा–

---

१ [-] क प्रतौ नास्ति कोष्ठगोंऽशः ।

यथा हलायुधः प्राह*१—

समाकम्रसूतदन्तदीधितिः स्मरोल्लसितगण्डमण्डला ।
कुरङ्गसमसिता च कामिनी मनो हरति चारुहासिनी ॥ ३२ ॥

यथा वा वृत्तरत्नाकरटीकायां सुल्हणः प्रोवाच—

न कस्य चेतः समन्मथं करोति सा सुन्दराकृतिः ।
विभिन्नवाक्योक्तिसम्मिता विलासिनी चारुहासिनी ॥ ३३ ॥

यथा वा मम प्रत्युदाहरणम्—

सुवृत्तमुक्तावलीधरं प्रतप्तचामीकराम्बरम् ।
मयूरपिच्छैर्विराजितं, नमाम्यहं नन्दनन्दनम् ॥ ३४ ॥

इति चारुहासिनी वैतालीयकम् १२

इति श्रीवृत्तमौक्तिके वैतालीयप्रकरणं षष्ठम् ।

---

*टिप्पणी—१ छन्दःशास्त्रहलायुधटीकायां अ ४ कारिकायां ४० उदाहरणम्

पूर्वान्तवत् स्वर सन्धौ क्वचिदेव परादिवत्। अस्यायमर्थ —योऽयं पूर्वपरयोरेकादेशः स्वरः सन्धौ विधीयते। स क्वचित् पूर्वस्यान्तवद् भवति, क्वचित् परस्यादिवद् भवति। तथा च पाणिनि स्मरति–'अन्तादिवच्च' [पा०सू० ६।१।८५] इति। तत्र पूर्वान्तवद्भावे यथा स्यात्। यथा–

स्यादस्थानोपगतयमुनासङ्गमे चाभिरामा[1]।

इत्यादि। तथा–

जम्भारातीभकुम्भोद्भवमिव दधत सान्द्रसिन्दूररेणुम्।

इत्यादि। तथा-

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये।
स्वानुभूत्येकमानाय नम शान्ताय तेजसे॥

इत्यादि।

परादिवद्भावे यथा–

स्कन्ध विन्ध्याद्रिमूर्द्धा निकषति [महिषस्याहितोऽसूनहार्षीत्।

इत्यादि। तथा–

शूल शूल तु गाढ प्रहर हर हृषीकेश][2] केशोऽपि वक्त्र—
श्चक्रेणाऽकारि किं ते।

इत्यादि।

अत्र हि स्वरूपस्य परादिवद्भावे व्यञ्जनमपि तदभक्तत्वात् तदादिवद् भवति।
'यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ' इत्यन्तादिवद्भावे विधावपि सम्बध्यते। तेन–

अस्या वक्त्राब्जमवजितपूर्णेन्दुशोभ विभाति।

इत्येवंविधा यति[र्न]भवति। यथा वा स्वर सन्धौ–

राकाचन्द्रादधिकमबलावक्त्रचन्द्र विभाति।

तथा शेषेऽपि, यथा–

रामातरुणिमोद्दामानङ्गरङ्गप्रसङ्गिनी।

इत्यादि[3] उन्नेयम्। 'यणादेश परादिवत्' भवतीति शेष। यथा—

विततजलतुषारास्वादुशुभ्राशुपूर्णा-
स्वविरलपदमाला श्यामलामुल्लिखन्त.।

इत्यादि।

'नित्यं प्राक्पदसम्बन्धाश्चादय' प्राक्पदान्तवत्।' तेभ्य पूर्वा यतिर्न कर्त्तव्या इत्यर्थ।

---

१ ख. नाभिरामा। २ कोष्ठगतोंऽश ख. प्रतौ नास्ति। ३ ख इत्याद्यन्त्यवद्।

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु । इत्यादि

व्यक्ताव्यक्तविभक्तिक इति । यतिः सर्वत्र पादान्ते इत्यनेन सम्बध्यते ।

यथा–

वशीकृतजगत्कालं कण्ठेकालं नमाम्यहम् ।
महाकालं कलाशेषशशिलेखाशिखामणिम् ॥

अपि च–

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥ ५ ॥

इति । चतुरक्षरा यतिर्भवति । यथा–

पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टशीतेतरांशौ ।

इत्यादि । यथा वा–

उन्मीलन्नीलपङ्केरुहरुचिरदृशो देवदेवस्य विष्णोः ।

इत्यादि । तथा–

कूजत्कोयष्टिकोलाहलमुखरभुवः प्रान्तकूलान्तदेशाः ।

इत्यादि । तथा–

वैरिञ्चानां[1] सहोच्चारितरुचिरमृचां चाननानां चतुर्णाम् ।

इत्यादि ।

समुद्रादौ इति किम् ? पादमध्येऽपि यतिः । पदान्ते तु माऽभूत् । तद्यथा–

प्रणमत भवबन्धक्लेशनाशाय नारा
यणचरणसरोजद्वन्द्वमानन्दहेतुम् ।

इत्यादि ।

पूर्वोत्तरभागयोरेकाक्षरत्वे तु पदमध्ये यतिर्दुष्यति ।

यथा–

एतस्या गण्डमण्डल-ममलं गाहते चन्द्रकक्षाम् ।

इत्यादि । यथा–

एतस्या राजति मुखमिदं पूर्णचन्द्रप्रकाशम् ।

इत्यादि । तथा–

सुरासुरशिरोनिघृष्टचरणारविन्दः शिवः ।

इत्यादि

---

१ क वैरञ्चिना । २ ख गाहतेऽभ्रकक्षाम् ।

पूर्वान्तवत् स्वरः सन्धौ क्वचिदेव परादिवत् । अस्यायमर्थः—योऽयं पूर्वपरयोरेकादेशः स्वरः सन्धौ विधीयते । स क्वचित् पूर्वस्यान्तवद् भवति, क्वचित् परस्यादिवद् भवति । तथा च पाणिनि स्मरति–'अन्तादिवच्च' [पा०सू० ६।१।८५] इति । तत्र पूर्वान्तवद्भावे यथा स्यात् । यथा–

स्यादस्थानोपगतयमुनासङ्गमे चाभिरामा[1] ।

इत्यादि । तथा–

जम्भारातीभकुम्भोद्भवमिव दधत सान्द्रसिन्दूररेणुम् ।

इत्यादि । तथा -

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्येकमानाय नम शान्ताय तेजसे ।।

इत्यादि ।

परादिवद्भावे यथा–

स्कन्ध विन्ध्याद्रिमूर्द्धा निकषति [महिषस्याहितोऽसूनहार्षीत् ।

इत्यादि । तथा–

शूल शूल तु गाढ प्रहर हर हृषीकेश][2] केशोऽपि वक्त्र—
श्चक्रेणाऽकारि किं ते ।

इत्यादि ।

अत्र हि स्वरूपस्य परादिवद्भावे व्यञ्जनमपि तदभक्तत्वात् तदादिवद् भवति ।
'यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ' इत्यन्तादिवद्भावे विधावपि सम्बध्यते । तेन–

अस्या वक्त्राब्जमवजितपूर्णेन्दुशोभ विभाति ।

इत्येवंविधा यति[र्न]भवति । यथा वा स्वर सन्धौ–

राकाचन्द्रादधिकमबलावक्त्रचन्द्र विभाति ।

तथा शेषेऽपि, यथा–

रामातरुणिमोद्दामानङ्गरङ्गप्रसङ्गिनी ।

इत्यादि[3] उन्नेयम् । 'यणादेश परादिवत्' भवतीति शेष । यथा—

विततजलतुषारास्वादशुभ्राशुपूर्णा-
स्वविरलपदमाला श्यामलामुल्लिखन्त. ।

इत्यादि ।

'नित्यं प्राक्पदसम्बन्धाश्चादय प्राक्पदान्तवत् ।' तेभ्य पूर्वा यतिर्न कर्त्तव्या इत्यर्थं ।

---

१ ख नाभिरामा । २ कोष्ठगतोंऽश ख प्रतौ नास्ति । ३ ख इत्याद्यन्त्यवद् ।

तेन सत्कृते यतिरक्षायां गुण । यतिभङ्गेन दोषोऽपीति तेषामाशय ।

अतएव मुरारिः*[1]—

याच्ञादैत्यपराचि यस्य कलहायन्ते मिथस्त्व वृणु,
त्व वृणित्यभितो मुखानि स दशग्रीव. कथ वर्ण्यताम् ।।

इत्यादि ।

जयदेवोऽपि[2]*—

भाव शृङ्गारसारस्वतमयजयदेवस्य विष्वग् वचासि ।

इति । एवमन्येऽपि—

कोष्ठीकृत्य जगद्धन कति वराटीभिर्मुद यास्यति ।

इत्यादि, महाकवीनां स्वरसादिति दिक् । अपि च—

[3]यतिभङ्गो नामधातुभागभेदे भवेद् यथा ।
पुनातु नरकारिश्चक्रभूषितकराम्बुज' ।। १२ ।।

दिविषद्वृन्दवन्द्य वन्दे गोविन्दपदद्वयम् ।
स्वरसन्धौ तु न श्रीशोऽस्तु भूत्यै भवतो यथा ।। १३ ।।

न स्याद्विभक्तिभेदे भात्येष राजेति कुत्रचित् ।
क्वचित्तु स्याद् यथा देवाय नमश्चन्द्रमौलये ।। १४ ।।

चादयो न प्रयोक्तव्या विच्छेदात् परतो यथा ।
नम कृष्णाय देवाय च दानवविनाशिने ।। १५ ।।

---

*टिप्पणी—१ 'सतुष्टे तिसृणा पुरामपि रिपौ कण्डूलदोर्मण्डली-
क्रीडाकृत्तपुन प्ररूढशिरसो वीरस्य लिप्सोर्वरम् ।
याच्ञादैत्यपराञ्चि यस्य कलहायन्ते मिथस्त्व वृणु,
त्वां वृणित्यभितो मुखानि स दशग्रीव' कथ वर्ण्यताम् ।।
[मुरारिकृत-मनर्घराघवम् अक-३, प० ४१]

२ 'साध्वी माध्वीकचिन्ता न भवति भवत शर्करे कर्कशासि,
द्राक्षे द्रक्ष्यन्ति के त्वाममृतमृतमसि क्षीरनीर रसस्ते ।
माकन्द क्रन्द कान्ताधर धर न तुलां गच्छ यच्छन्ति भाव,
यावच्छृङ्गारसार शुभमिव जयदेवस्य वैदग्ध्यवाच ।।
[जयदेवकृत-गीतगोविन्द –स० १२, प० १२]

३ देवेश्वरकृत-कविकल्पलताया शब्दस्तबकच्छन्दोऽभ्यासप्रकरणे ।

यथा

स्वादु स्वच्छं सलिलमपि च प्रीतये कस्य न स्यात् ।

इत्यादि ।

नित्यं प्राक्पदसम्बन्धा इति किम् ? अन्येषां पूर्वपदान्तवद्भावो माऽभूत् । तद्यथा–

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ।

इत्यादि ।

'परेण नित्यसम्बन्धा' प्रादयश्च परादिवत् । तेभ्यः परा यतिर्न भवतीत्यर्थः । तद्यथा–

दुःखं मे प्रक्षिपति हृदये दुस्सहस्त्वद्वियोगः ।

इत्यादि ।

परेण नित्यसम्बन्धा' इत्यादि किम् ? कर्मप्रवचनीयसंज्ञकेभ्यः प्रादिभ्यः परापि यतिर्यथा स्यादिति । तत्र यथा–

प्रिय प्रति स्फुरत्पादे मन्दायन्ते न खल्विति ।

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।

इत्यादि ।

यत्रं तु चादीनां प्रादीनां चैकाक्षराणामनेकाक्षराणां वा पादान्ते पदान्तादिवद्भाव इष्यते, न तु अनेकाक्षराणां पादमध्ये यतौ । तत्र हि पदमध्येऽपि च चामीकरादिरिव यतेरप्यनुमानत्वात् । तत्र चादीनां यथा–

प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।

इत्यादि ।

प्रादीनामपि यथा–

दूरारूढः प्रमोदं हसितमिव तथा वृष्टमारात् सखीभिः ।

इत्यादि ।

एवं माधुर्यसंपत्तिनिमित्तं यतिवर्णनम् ।
न विना यतिसौन्दर्यं काव्यं भव्यतरं भवेत् ॥ ८ ॥

भरतादिमुनीन्द्रैरप्येवमेवाभिधीयते ।
तथाऽन्येऽपि कवीन्द्रास्तु यतिं मन्वन्त्ययमुत्तमाम् ॥ ९ ॥

यत्पिङ्गलसूत्रम्—

एवं यथा पयोदानः सुधियां मापशायत ।
तथा यथा मधुरतानिमित्तं यतिरिष्यत ॥ १० ॥

इति । किञ्च—

पिङ्गले नागदेवस्य संमते यतिमिच्छत ।
श्वेतमाण्डव्य[1]मुख्यैस्तु मुनिभिर्नानुमन्यते ॥ ११ ॥

---

१ ख यतिवर्णनम् । २ ख श्वेतमाण्डव्य

अष्टमं गद्यनिरूपण—प्रकरणम्

अथ गद्यानि

वाङ्मय द्विविध प्रोक्त पद्य गद्यमिति क्रमात् ।
तत्र पद्य पुरा प्रोक्त गद्य सम्प्रति गद्यते ॥ १ ॥
असवर्णं सवर्णं च गद्य तत्रासवर्णकम् ।
त्रिविध कथित तच्च कवीन्द्रैर्गद्यवेदिभि ॥ २ ॥
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदत ।

तत्र–

अकठोराक्षर स्वल्पसमास चूर्णक विदु ॥ ३ ॥
तद्धि वैदर्भरीतिस्थ गद्य हृद्यतर भवेत् ।
आविद्ध ललित मुग्धमिति तच्चूर्णक त्रिधा ॥ ४ ॥

तत्र–

दीर्घवृत्ति-कठोरार्णमाविद्ध परिकीर्तितम् ।
स्वल्पवृत्त कठोरार्णं ललित कीर्त्यते बुधै ॥ ५ ॥
मुग्ध मृद्वक्षर प्रोक्तमवृत्त्यत्यल्पवृत्ति वा ।
भवेदुत्कलिकाप्राय दीर्घवृत्त्युत्कटाक्षरम् ॥ ६ ॥
वृत्त्येक[1]देशसम्बद्ध वृत्तगन्धि पुन स्मृतम् ।
अथात्र क्रमतश्चैषामुदाहृरणमुच्यते ॥ ७ ॥

तत्र प्रथम यथा–

१ शुद्धचूर्णकम्

स हि खलु त्रयाणामेव जगता गति परमपुरुष पुरुषोत्तमो दृप्तसमस्तदैत्य-दानवभरेण भङ्गुराङ्गीमिमामवनिमवलोक्य करुणरसामृतपरिपूर्णार्द्रहृदयस्तथा भुवो भार अवतारयितु रामकृष्णस्वरूपेण यदुकुलेऽवततार । य प्रसङ्गेनापि स्मृतो-ऽभ्यर्चित प्रणतो वा गृहीतनामा पु स ससारसागरपारमवलोकयति ।

इति शुद्धचूर्णकम् १

१[१] अथ आविद्ध चूर्णकम्

यथा–

दलदलि[2]सहकारमञ्जरीविगलन्मकरन्दबिन्दुसन्दोहसन्दानितमन्दानिलवीज्य-मानदशदिगाभोगसुरभिसमय समुपाजगाम । इत्यादि ।

इति आविद्ध चूर्णकम् १[१]

---

१ ख वृत्तैकदेश । २ ख दरदलित ।

एकस्वरोपसर्गेण विच्छेदः श्रुतिसौख्यकृत्¹ ।
यथा पिनाकपाणिं प्रणमामि स्मरशासनम् ॥ १६ ॥

इत्यादि कविकल्पलतायां वाग्भटनन्दनेन देवेश्वरेणाभ्यधायि ।
छन्दोमञ्जर्यां तु[1]-

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥ १७ ॥

इति सामान्यलक्षणमुक्तम् । किञ्च—

क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकविभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्यात्वतुलमहिमा मां करुणया ॥ १८ ॥

इति छन्दोगोविन्दे[2] पल्लवासेमाप्युक्तमित्युपरम्यते । इति सर्वमङ्गलम् ।

इति श्रीवृत्तमौक्तिके वार्त्तिके द्वितीयपरिच्छेदे
यतिनिरूपण-प्रकरणं सप्तमम् ।

---

१ क ख सौख्यकृत् ।

*टिप्पणी—१ छन्दोमञ्जरी प्रथमस्तबक प० १२ ११ ।

२ 'गोविन्दे' इत्यस्य स्थाने 'मञ्जर्याम्' इति पाठ एव समीचीनोऽस्ति मङ्गलाय कृतं स्यात् ।

अष्टमं गद्यनिरूपण—प्रकरणम्

अथ गद्यानि

वाङ्मय द्विविध प्रोक्त पद्य गद्यमिति क्रमात् ।
तत्र पद्य पुरा प्रोक्त गद्य सम्प्रति गद्यते ॥ १ ॥
असवर्णं सवर्णं च गद्य तत्रासवर्णकम् ।
त्रिविध कथित तच्च कवीन्द्रैर्गद्यवेदिभि ॥ २ ॥
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदत ।

तत्र–

अकठोराक्षर स्वल्पसमास चूर्णक विदु ॥ ३ ॥
तद्धि वैदर्भरीतिस्थ गद्य हृद्यतर भवेत् ।
आविद्ध ललित मुग्धमिति तच्चूर्णक त्रिधा ॥ ४ ॥

तत्र–

दीर्घवृत्ति-कठोरार्णमाविद्ध परिकीर्तितम् ।
स्वल्पवृत्त कठोरार्णं ललित कीर्त्यते बुधै ॥ ५ ॥
मुग्ध मृद्वक्षर प्रोक्तमवृत्त्यत्यल्पवृत्ति वा ।
भवेदुत्कलिकाप्राय दीर्घवृत्त्युत्कटाक्षरम् ॥ ६ ॥
वृत्त्येक[1]देशसम्बद्ध वृत्तगन्धि पुन स्मृतम् ।
अथात्र क्रमतश्चैषामुदाहरणमुच्यते ॥ ७ ॥

तत्र प्रथम यथा–

१ शुद्धचूर्णकम्

स हि खलु त्रयाणामेव जगता गति परमपुरुष पुरुषोत्तमो दृप्तसमस्तदैत्य-दानवभरेण भङ्गुराङ्गीमिमामवनिमवलोक्य करुणरसामृतपरिपूर्णार्द्रहृदयस्तथा भुवो भार अवतारयितु रामकृष्णस्वरूपेण यदुकुलेऽवततार । य प्रसङ्गेनापि स्मृतो-ऽभ्यर्चित प्रणतो वा गृहीतनामा पु स ससारसागरपारमवलोकयति ।

इति शुद्धचूर्णकम् १

१[१] अथ आविद्ध चूर्णकम्

यथा–

दलदलि[2]सहकारमञ्जरीविगलन्मकरन्दविन्दुसन्दोहसन्दानितमन्दानिलवीज्य-मानदशदिगाभोगसुरभिसमय समुपाजगाम । इत्यादि ।

इति आविद्ध चूर्णकम् १[१]

---

१ ख वृत्तैकदेश । २ ख दरदलित ।

निधानदानपथातीतसुरद्रुमकथासमारम्भरम्भादिविबुधनारीगणोद्गीयमानकमनीय-कीर्त्तिभरभरणीयजनप्रवृद्धकृपापारावारवारणेन्द्रसमानसारसादितारातियुवतिवचो-वर्णदत्तकर्णकर्णवलिदीयमानोपमानमानवतीमानापमानोदनविशारदशारदेन्दुकुला-वदातकीर्त्तिप्रीणिताशेषजनहृदयानुरूपसमरसीमव्यापादितारातिवर्गचक्रवर्त्तिमहा-महोग्रप्रतापमार्त्तण्डमरविजयी महाराजाधिराज समाज्ञापयत्यशेषसामन्तगणान्। इत्यादि।

यथा वा –

प्रणिपातप्रवणप्रधानाशेषसुरासुरादिवृन्दसौन्दर्यप्रकटकिरीटकोटिनिविष्टस्पष्ट-मणिमयूखच्छटाच्छुरितचरणनखचक्रविक्रमोद्दामवामपादाङ्गुष्ठनखरशिखरखण्डित-ब्रह्माण्डभाण्डविवरनिस्सरत्क्षरदमृतकरप्रकरभास्वरसुरवाहिनीप्रवाहपवित्रीकृत-विष्टपत्रयकैटभारे क्रूरतरससारापारसागरनानाप्रकारावर्त्तविवर्त्तमानविग्रह मामनु-गृहाण। इत्यादि।

इत्युत्कलिकाप्राय गद्यम् २.

३ अथ वृत्तगन्धि गद्यम्।

यथा–

समरकण्डूलनिविडभुजदण्डमण्डलीकृतकोदण्डसिञ्जिनीटङ्कारोज्जागरितवैरि-नागरजनसंस्तुतानेकविरुदावलीविराजमानमानोन्नतमहाराजाधिराज जय जय। इत्यादि।

यथा वा, मालतीमाधवे[1]*—

गतोऽहमवलोकितालललितकौतुक[1] कामदेवायतनम्। इत्यादि।

यथा वा, कादम्बर्याम्—

पातालतालुतलवासिषु दानवेषु। इत्यादि।

हरद्रवजितमन्मथो गुह इवाप्रतिहतशक्ति। इत्यादि।

यथा वा–

जय जय जनार्दन सुकृतिजनमनस्तडागविकस्वरचरणपद्म पद्मनयन पद्मिनी-विनोदराजहंसभास्वरयशःपटलपूरितभुवनकुहर हरकमलासनादिवृन्दारकवृन्दवन्द-नीयपादारविन्द द्वन्द्वनिर्मुक्त[2] योगीन्द्रहृदयमन्दिराविष्कृतनिरञ्जनज्योति स्वरूप नीरूप विश्वरूप स्वर्नाथनाथ जगन्नाथ मामनवधिदुःखव्याकुल रक्ष रक्ष।

इति वृत्तगन्धिगद्यम् ३

---

१ ख जनितकौतुक। २ ख द्वन्द्व द्वन्द्वनिर्मुक्त।

*टिप्पणी—१ मालतीमाधवम्, प्रथमाङ्के विंशतिपद्यानन्तर गद्यभाग।

ग्रन्थान्तरे तु प्रकारान्तरेण चतुर्विधमेव गद्यं तल्लक्षणमुपलक्षितं विचक्षणैः।
यथा–

वृत्तकं चोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं कुलकं च चतुर्विधम् ॥ ८ ॥

तत्र–

आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यं दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ॥ ९ ॥

तत्र मुक्तकं यथा—

गुरुर्वचसि पृथुरुरसि। इत्यादि।

वृत्तगन्धि—'समरकण्डूल' इत्यादिनैवोदाहृतम्।

उत्कलिकाप्रायं तु—व्यपगतघनपटसममलजलनिधिसवृशमम्बरतलं विलोक्यते भञ्जन चूर्णपुञ्जश्यामलं शार्वरं समरमायत। इत्यादि।

यथा वा प्राकृते चापि—

अणिसविसुमरणि[1] सिवसरविदलिदसमरपरिगदपवरपरबलहणिदमअगलहल हलिवसमलजलणिहिसरिससमत्तुसमूहसमुहिमवैरिणमरणाअरीणिवह जअ महाराअ चक्कवट्टि करुणाअरा। इत्यादि।

कुलकम् यथा–

गुणरत्नसागर जगदेकनागर कामिनीमदनजनविसरञ्जन करुणापरायणनारा यणचरणस्मरणसमासादितपुरुषार्थचतुष्टयप्रार्थनीयगुणगण शरणागतरक्षणविच क्षण जय जय। इत्यादि।

इति श्रीकविशेखरचन्द्रशेखरविरचिते श्रीवृत्तमौक्तिके वार्त्तिके
गद्यनिरूपणनवमं प्रकरणम् ॥८॥

---

१ ख गुरुवज्वति। २ ख गुमर्जिव।

नवमं विरुदावली-प्रकरणम्

[प्रथम कलिकाप्रकरणम्]

अथ विरुदावली

अथाऽत्र विरुदावल्या सोदाहरणमुच्यते ।
लक्षण लक्षिताशेष-विशेषपरिकल्पनम् ।। १ ।।

तत्र–

गद्य-पद्यमयी राजस्तुतिर्विरुदमुच्यते ।
तदावली समाख्याता कविभिर्विरुदावली ।। २ ।।

किञ्च–

कलिकाभिस्तु कलिता विरुदावलिका मता ।
सवर्णा कलिका प्रोक्ता विरुदाढ्या मनोहरा ।। ३ ।।

तत्र च

द्वादशार्द्धकला कार्या. चतु षष्टिकलावधि ।
तद्भेदाश्चात्र कथ्यन्ते लक्ष्यलक्षणसयुता ।। ४ ।।
द्विगा रादिश्च मादिश्च नादिर्गलादिरेव च ।
मिश्रा मध्या द्विभङ्गी च त्रिभङ्गी कलिका नव ।। ५ ।।

तत्र–

१ द्विगाकलिका

चतुर्भिस्तुरगै निजैर्द्विगा मैत्री हयद्वये ।

यथा–

जय जय वीर ! क्षितिपति हीर !

इत्यादि । एव चरणचतुष्टय बोद्धव्यमत्र । ग्रन्थविस्तरभयादस्मिन् प्रकरणे सर्वत्र पादमात्र-मुदाह्रियते ।

इति द्विगाकलिका १

२ अथ रादिकलिका

वेदै पञ्चकलै कार्या मैत्र्यर्द्धे रादिका कला ।। ६ ।।

यथा –

कामिनीकलितसुख यामिनीरमणमुख ।

इत्यादि ।

इति रादिकलिका २

३ अथ मालिकलिका

मध्याभि पट्कलैर्मादिमैर्व्यन्ते विरतिर्मता ।

यथा–

भूमीमानो प्रभवसि भुवने भट्टलारम्भ
सततसदा नोम्रता भट्टमानोज्ज्वलतरदम्भ ।

इत्यादि ।

इति मालिकलिका ३

४ अथ मालिकलिका

सामुप्रासस्तु नो मादि—

यथा–

दमितशकट कमितसकुट
भमितमुकुट रचितकपट ।

इत्यादि ।

इति मालिकलिका ४

५ अथ गलादिकलिका

—गाद्या गलादिरुच्यते ॥ ७ ॥

यथा–

बीरवर हीररव
चीरहर तीरचर ।

इत्यादि

इति गलादिकलिका ५

६ अथ मिश्राकलिका

तिलकम्मुखकमिश्रा—

कलयोस्तिलकमुखयोर्मिश्रणात् मिश्रा । यथा–

क्षीरनीरविवेकधीर सङ्गरवीर
गोपिकाचीरहर हरे जय जय ।

इति मिश्राकलिका ६

७. अथ मध्याकलिका

—मध्या कलिकयोर्यदि ।

मध्ये गद्य कलावापि गद्ययो रसपद्ययो.' ॥ ८ ॥

[व्या०] अस्यार्थः—मध्याकलिका तावत् द्विभेदा, तथा चादावन्ते च कलिका तयोः कलिकयोर्मध्ये यदि गद्य भवतीत्येको भेद ।१। तथा असवर्णयोर्मैत्रीरहितयोर्गद्ययोर्मध्ये वा कला-कलिका भवतीत्यपरो भेद· ।२। इत्येव द्विभेदा मध्याकलिका भवति । ऊह्यमुदाहरणम् ।

इति मध्याकलिका ७

८ अथ द्विभङ्गी कलिका

द्वितुर्यो मधुरश्लिष्टौ षड्गा लान्ताश्चतुर्गुरु. ।
अत्र भङ्गात्तयोर्मैत्री षड्भङ्गा स्यात् द्विभङ्गिका ॥ ९ ॥

यथा—

रङ्गरक्त सङ्गसक्त
चण्डचक्र दण्डशक्र
चन्द्रमुद्र सान्द्रभद्र
विष्णो जिष्णो ।

इत्यादि ।

इति द्विभङ्गी कलिका ८

९, अथ त्रिभङ्गी कलिका

तत्र—

त्रिभिर्भङ्गैस्त्रिभङ्गी स्यान्नवधा सा तु कथ्यते ।
विदग्ध-तुरगौ पद्य-हरिणप्लुत-नर्त्तका ॥ १० ॥
भुजग-त्रिगते सार्द्धं वरतन्वा द्विपादिका ।
युग्मार्णभङ्गौ व्यावृत्तौ तनौ भौ मिश्रितौ तत ॥ ११ ॥

तत्र—

९[१] विदग्ध-त्रिभङ्गी कलिका

विदग्धे—

यथा—

सदीपितशर-मन्दीकृतपर-नन्दीश्वरपद-भावन-पावन ।

इत्यादि ।

इति विदग्धत्रिभङ्गी कलिका ९ [१]

९[२] अथ तुरगत्रिभङ्गी कलिका

—तुरगे तद्वत् तभला शेषगो गुरु ।

---

१ क ख. रसवर्णयो ।

यथा–

चण्डीपतिप्रवण-चण्डीकृतप्रबल-खण्डीकृताहितमिमो ।

इत्यादि ।

इति तुरगत्रिभङ्गी कलिका १[२]

१[३] अथ पद्मत्रिभङ्गी कलिका

त्रिभङ्गीमि' पदे पद्मत्रिभङ्गी—

यथा–यथावतीत्रिभङ्गीस्वरूपकलायोऽत्र स्पष्टा' पूर्वखण्डे समुदाहृतास्तास्तत एव द्रष्टव्या' ।*

इति पद्मत्रिभङ्गी कलिका [१]३

१[४] अथ हरिणप्लुतत्रिभङ्गी कलिका

—हरिणप्लुते ॥ १२ ॥

षष्ठभङ्गा त्रिरावृत्ता मयमा[१]मिलितौ च भौ ।

यथा–

प्रतिनत-देवाराधित बहुविधसेवासाधित
सुरतरुरेखासि प्रिय-दायक यक !

इत्यादि ।

इति हरिणप्लुतत्रिभङ्गी कलिका १[४]

१[५] अथ मत्तालित्रिभङ्गी कलिका

हरिणो नजसान्तरश्चेन्मत्तालि —

[स्या] हरिणप्लुत एव नयमानन्तरं यदि नगण-जगण-सगणास्तो भवेत् तदा मत्तालि भवतीति ज्ञेय' । यथा–

मनसिजरूपाराधित बहुरसभूपाबाधित
बहुतरयूपासङ्गक निजकुलरङ्गक ।

इत्यादि ।

इति मत्तालित्रिभङ्गी कलिका १[५]

१[६] अथ भुजङ्गत्रिभङ्गी कलिका

—भुजगे पुन' ।। १३ ॥

स्यावृत्ता ममसा सान्ता युग्मे तुर्ये च भङ्गिन' ।
क्वचित्तुर्ये न भङ्ग स्यात् मिलितौ मगणौ तत' ॥ १४ ॥

---

१ क मयसा ।

*टिप्पणी—११ १७ ४२ पृष्ठे द्रष्टव्या ।

यथा–

दम्भारम्भामितवल जम्भालम्भाधिकवल
जम्भासम्भावितरण-मण्डित पण्डित ।

क्वचित्तुर्ये न भङ्ग, इति समुदाह्रियते । यथा–

जम्भारातिप्रतिवल-दम्भावाधानतदल
सम्भारासादनचण-दारणकारण ।

इति भुजगत्रिभङ्गी कलिका ६[६]

६[७]. अथ त्रिगता त्रिभङ्गी कलिका

तृतीये कृतभङ्गा त्रिर्मनना भौ च वलिगता ।
त्र्यावृत्तास्तनभा भोऽन्ते ललितात्रिगता द्वये ॥ १५ ॥

[उ १०] अस्यार्थं — त्रिगता त्रिभङ्गी कलिका तावद् द्विविधा, यत्र मनना –मगण-नगण-नगणास्त्रयो गणास्त्रिर्वारत्रय भवन्ति, अन्ते भौ–भगणद्वय, तृतीये च वर्णे भङ्ग. सा वलिगता-भिधाना त्रिगता त्रिभङ्गी कलिका । यस्या च त्र्यावृत्तास्तनभा –तगण-नगण-भगणास्त्रयो गणा भवन्ति, एतस्यान्ते भो–भगण एक एव भवति । परन्तु द्वये–द्वितीये वर्णे भङ्ग सा ललिता-भिधाना त्रिगता त्रिभङ्गी कलिका इति द्वैविध्यम् । क्रमेण यथा–

६[७-१] अथ वलिगता त्रिगता त्रिभङ्गी कलिका

बाणाली-हतरिपुगण तालोली-तत-शरवण
मालाली वृततनुवर-दायक नायक !

इत्यादि ।

इति वलिगताभिधाना त्रिगता त्रिभङ्गी कलिका

[६[७-२]. अथ ललिताभिधाना त्रिगता त्रिभङ्गी कलिका

नाकाधिपसमनायक पाकाधिकसुखदायक
राकाधिपमुखसायक सुन्दर !

इति ललिताभिधाना त्रिगता त्रिभङ्गी कलिका
एव त्रिगता त्रिभङ्गी कलिका द्विविधोदाहृता ६[७] *]

६[८] अथ वरतनुत्रिभङ्गी कलिका

षष्ठभङ्गा वरतनुस्त्र्यावृत्ता नयना लघु ।
भौ च—

यथा–

अविकलताराधिपमुख अधिगतनारायणसुख
बहुविधपारायणपर पण्डित मण्डित !

---

*[-] कोष्ठगतोंश क प्रतौ नास्ति ।

इत्यादि । किञ्च–

—मङ्गान्तसमुक्ता धवीरैव कथ्यते ॥ १६ ॥

यथा–

चतुरिमचञ्चद्गुणगण विषमदुरन्तप्रणयम
मधुरिमचन्द्रस्तवकित कुङ्कुममूषित ।

इत्यादि ।

इति द्विविधा वरतनुत्रिभङ्गी कलिका ९[८]

९[९] अथ द्विपादिका नामभङ्गा कलिका

द्विपादिका च कलिका पञ्चविधा परिकीर्तिता ।
दृपावृत्ता सा तु विज्ञ या छन्दःशास्त्रविशारदैः ॥ १७ ॥

तत्र–

मुग्धा प्रगल्भा मध्या च शिथिला मधुरा तथा ।
तरुणी चेत्यमी भेदा द्विपदाया उदीरिताः ॥ १८ ॥

तत्र–

९[९-१] मुग्धा द्विपादिका द्विभङ्गी कलिका

मतला मतलाश्चैव युग्मभङ्गा मयुग्मकम् ।
मुग्धा स्यात्—

यथा–

बम्बादेशाकम्पित चण्डाघोशासम्भित
नन्दन नन्दन ।

इत्यादि ।

इति मुग्धा द्विपादिका द्विभङ्गी कलिका ९[९-१]

९[९-२] अथ प्रगल्भा द्विपादिका द्विभङ्गी कलिका

—मद्वये कर्णौ चेत् प्रगल्भा तदा मता ॥ १९ ॥

[व्या०] मद्वये–मगणद्वयस्थाने यादेवकर्णौ चेत् कर्णौ भवतस्तदा मुग्धैव प्रगल्भा मता इत्यर्थः । यथा–

देवाधीशाराधक सेवारोधासाधक
भूमीभानो

इत्यादि ।

इति प्रगल्भा-द्विपादिका-द्विभङ्गी कलिका ९[९ २]

८[६–२] अथ मध्या द्विगादिका द्विभङ्गी कलिका

उक्ता मभौ समौ मध्या भौ नलौ वा भनौ जलौ ।
ननसा लद्वय वापि शेषे वा नजना लघू ॥ २० ॥

[व्या०] अस्यार्थ —मध्यायास्तावत् चत्वारो भेदा लक्ष्यन्ते । यथा—मभौ–मगण-भगणौ, अथ च समौ–सगण-मगणौ, ततो भौ–भगणद्वय यत्र भवति, एतादृशी मध्या उक्ता–कथिता इत्यर्थ । इति प्रथमो भेद ।

यथा–

नित्य नृत्य कलयति काली केलीमञ्चति चञ्चति ।

इत्यादि ।

इति मध्याया. प्रथमो भेद ।१।

अथ मध्याया द्वितीयो भेद

[व्या०] 'नलौ वा भनौ जलौ' इति । यत्र नलौ–नगणलघू, अथ च भनौ–भगणनगणौ, ततश्च जलौ –जगणलघू भवत । इति द्वितीयो भेद ।

यथा–

रणभुवि अञ्चति रणभुवि चञ्चति ।

इत्यादि ।

इति मध्याया द्वितीयो भेद ।२।

अथ मध्याया तृतीयो भेद

[व्या०] 'ननसा लद्वय वापि' इति । ननसा –नगण-नगण-सगणा , अथ च लघुद्वय भवति यत्र स तृतीयो भेद । यथा—

अतिशयमधिरणमञ्चति ।

इत्यादि ।

इति मध्याया तृतीयो भेद ।३।

अथ मध्यायाश्चतुर्थो भेद

[व्या०] 'शेषे वा नजना लघू' इति । शेषे–चतुर्थे भेदे नजना –नगण-जगण-नगणा·, अथ च लघू–लघुद्वय यत्र भवति स चतुर्थो भेद । यथा–

अतिशयमञ्चति रणभुवि ।

इत्यादि ।

इति मध्यायाश्चतुर्थो भेद ।४।

एवं मध्याया प्रसकीर्णाश्चत्वारो भेदा सलक्षणा समुदाहृत्य प्रदर्शिता ।

इति मध्या द्विपादिका द्विभङ्गी कलिका ६[१-३]

६[१-४] अथ शिथिला द्विपादिका द्विभङ्गी कलिका

मुग्धाया भद्वय विप्रा यदि सा शिथिला मता ।

[व्या] मुग्धाया–प्रथमोक्ताया भद्वये–भगणद्वयस्थाने प्रावेशन्यायेन यदि विप्र–चतुर्लघ्वात्मको गणो भवति तदा सा शिथिला मता भवतीत्यर्थ ।

यथा–

केलीरङ्गारम्भित–नारीसङ्गासम्भित मनसिज ।

इत्यादि ।

इति शिथिला द्विपादिका द्विभङ्गी कलिका ६[१-४]

६[१-५] अथ मधुरा द्विपादिका द्विभङ्गी कलिका

द्रुपावृत्ता ममसा शान्ता भद्वयं मधुरा मता ॥ २१ ॥

[व्या] अत्रापि द्रुपावृत्तत्वं पूर्ववत् सदन्त सम्बद्धम् । तथा च ममसा–मगण मगणसगणघटित द्रुपावृत्ता, शान्ता–सम्मता भवन्ति । अथ च भद्वय–भगणद्वयं भवति तदा मधुरा मता–सम्मता भवतीत्यर्थः । यथा–

तारापाराधिकमुख–पारावाराक्षयसुख–दायक नायक ।

इत्यादि ।

इति मधुरा द्विपादिका द्विभङ्गी कलिका ६[१-५]

६[१-६] अथ तरुणी द्विपादिका द्विभङ्गी कलिका

मधुरा भद्वये कर्णो तरुणी समनन्तरम् ।

[व्या] एतस्याः–मधुराया मगणमगणसगणान्तायाः भद्वये–भगणद्वयस्थाने पूर्वोक्तन्यायेन यदि कर्णौ भवतस्तदा तरुणी भवति ।

ताराहारागतमुख पारावारागतसुख–पाता–दाता ।

इत्यादि ।

इति तरुणी द्विपादिका द्विभङ्गी कलिका ६[१-६]

इति द्विपादिका कलिका युग्मभङ्गिनो भेदा प्रोक्ता इति शेष ।

इति विरुदावल्यामवान्तर–द्विभङ्गी–त्रिभङ्गी–कलिकाप्रकरणं प्रथमम् ।

[विरुदावल्यां द्वितीय चण्डवृत्त-प्रकरणम्]

अथाभिधीयते चण्डवृत्त विरुदमुत्तमम् ।

शुद्धादिभेदसहित कलिका-कल्पनान्वितम् ।। १ ।।

[व्या०] आदिपदेन सकीर्णा गर्भितमिश्रिता गृह्यन्ते तांश्च यथास्थानमुदाहरिष्याम । अथ महाकलिकारूप चण्डवृत्तम्, तच्च द्विविध–सलक्षण-साधारणभेदेन ।

तत्र–

उक्तलक्षणसम्पूर्णं सलक्षणमुदीरितम् ।
अन्यत् साधारण प्रोक्त चण्डवृत्त द्विधा बुधै ।। २ ।।

अथ परिभाषा

तत्र–

मधुर-श्लिष्ट-सश्लिष्ट-शिथिल-ह्लादिभेदत ।
सयोगा पञ्चह्रस्वाच्च दीर्घाच्च दशधा मता ।। ३ ।।
अनुस्वारविसर्गौ तु न दीर्घव्यवधायकौ ।
स्वस्ववर्गान्त्यसयुक्ता मधुरा इतरे पुन ।। ४ ।।
श्लिष्टा सरेफशिरस सश्लिष्टास्त्वन्ययोगिन ।
यमात्रयुक्ता इत्युक्ता शिथिला ह्लादिनस्त्वमी ।। ५ ।।
हशेखरा साम्यमत्र नणयो खषयोस्तथा ।
जययोर्वध्वयोरह[1] सच्चयो[2] सशयोरपि ।। ६ ।।
ह्यप्ययो[3]र्म्वध्वयोश्चैव क्षच्छयोरित्सवर्णयो ।
शषयो त्सच्छयोश्चैव क्ष्ख्ययोरपि वर्णयो ।।७।।
श्लिष्टसश्लिष्टयोरुक्तौ सग्राह्या मधुरेतरा ।
इत्येपा परिभाषाऽत्र राजते वृत्तमौक्तिके ।। ८ ।।

इति परिभाषा

अथ चण्डवृत्तस्य महाकलिकारूपस्य व्यापकस्य व्याप्यव्यापकभावेन पुरुषोत्तमादि–कुसुमान्त चतुस्त्रिशति ३४ प्रभेदा भवन्ति । तेषा चोद्देशक्रमोऽनुक्रमणिकाप्रकरणे स्फुटतर वक्ष्यमाणत्वान्नेह प्रपञ्च्यते ।

---

१. ख. जययो वधयोरह । २ ख सच्चयो । ३ क त्यद्ययो ।

एव मध्याया असकीर्णादिश्चत्वारो भेदा' सलक्षणा' समुदाहृत्य प्रदर्शिता' ।

इति मध्या द्विपादिका द्विभङ्गी कलिका ६[१–३]

६[१–४] अथ शिथिला द्विपादिका द्विभङ्गी कलिका

मुग्धाया मद्वये विप्रो यदि सा शिथिला मता ।

[व्या] मुग्धायाः–प्रथमोक्तायाः मद्वये–मगणद्वयस्थाने पादैकन्यायेन यदि विप्र–चतुर्लघ्वात्मको गणो भवति तदा सा शिथिला मता भवतीत्यर्थ ।

यथा–

केसीरङ्गारम्भित–नारीसङ्गासम्भित मनसिज ।

इत्यादि ।

इति शिथिला द्विपादिका द्विभङ्गी कलिका ६[१–४]

६[१–५] अथ मधुरा द्विपादिका द्विभङ्गी कलिका

द्ग्घावृत्ता ममसा सान्ता मद्वयं मधुरा मता ॥ २१ ॥

[व्या] मद्वयं द्ग्घावृत्तत्वं पूर्वत्र सर्वत्र संबद्धम् । तथा च ममसा –मगण-मगणसगणास्तैत् द्ग्घावृत्ता सस्तो सान्ता–सगणान्ता भवन्ति । अथ च मद्वयं–मगणद्वयं भवति तदा मधुरा मता–सम्मता भवतीत्यर्थः । यथा–

तारादाराधिकमुख–पारावाराश्रमसुख–दायक मामक ।

इत्यादि ।

इति मधुरा द्विपादिका द्विभङ्गी कलिका ६[१–५]

६[१–६] अथ तरुणी द्विपादिका द्विभङ्गी कलिका

मधुरा मद्वये कर्णौ तरुणी सममन्तरम् ।

[व्या] अनन्तरोक्तायाः–मधुरायाः मगणमगणसगणान्तायाः मद्वये–मगणद्वयस्थाने पूर्वोक्तन्यायेन यदि कर्णौ भवतस्तदा तरुणी भवति ।

ताराहारागतमुख धारावारागतसुख-पाता-दाता ।

इत्यादि ।

इति तरुणी द्विपादिका द्विभङ्गी कलिका ६[१–६]

इति द्विपादिका कलिका युग्मभङ्गिनो भेदा' प्रोक्ता इति शेष' ।

इति विरुदावल्यामवान्तर–द्विभङ्गी-त्रिभङ्गी-कलिकाप्रकरण प्रथमम् ।

[विरुदावल्यां द्वितीय चण्डवृत्त-प्रकरणम्]

अथाभिधीयते चण्डवृत्त विरुदमुत्तमम् ।

शुद्धादिभेदसहित कलिका-कल्पनान्वितम् ॥ १ ॥

[व्या०] आदिपदेन सकीर्णा गर्भितमिश्रिता गृह्यन्ते तांश्च यथास्थानमुदाहरिष्याम.। अथ महाकलिकारूप चण्डवृत्तम्, तच्च द्विविध—सलक्षण-साधारणभेदेन ।

तत्र–

उक्तलक्षणसम्पूर्ण सलक्षणमुदीरितम् ।
अन्यत् साधारण प्रोक्त चण्डवृत्त द्विधा वुधै ॥ २ ॥

अथ परिभाषा

तत्र–

मधुर-श्लिष्ट-सश्लिष्ट-शिथिल-ह्लादिभेदत ।
सयोगा पञ्चह्लस्वाच्च दीर्घाच्च दशधा मता ॥ ३ ॥
अनुस्वारविसर्गौ तु न दीर्घव्यवधायकौ ।
स्वस्ववर्गान्त्यसयुक्ता मधुरा इतरे पुन ॥ ४ ॥
श्लिष्टा सरेफशिरस सश्लिष्टास्त्वन्ययोगिन ।
यमात्रयुक्ता इत्युक्ता शिथिला ह्लादिनस्त्वमी ॥ ५ ॥
हशेखरा साम्यमत्र नणयो खषयोस्तथा ।
जययोर्वध्वयोरह [1] सच्चयो [2] सगयोरपि ॥ ६ ॥
ह्यप्ययो [3] र्भ्वध्वयोश्चैव क्षच्छयोरित्सवर्णयो ।
शपयो त्सच्छयोश्चैव क्षख्ययोरपि वर्णयो ॥७॥
श्लिष्टसश्लिष्टयोरुक्तौ सग्राह्या मधुरेतरा ।
इत्येषा परिभाषाऽत्र राजते वृत्तमौक्तिके ॥ ८ ॥

इति परिभाषा

अथ चण्डवृत्तस्य महाकलिकारूपस्य व्यापकस्य व्याप्यव्यापकभावेन पुरुषोत्तमादि–कुसुमान्त चतुस्त्रिंशति ३४ प्रभेदा भवन्ति । तेषा चोद्देशक्रमोऽनुक्रमणिकाप्रकरणे स्फुटतर वक्ष्यमाणत्वान्नेह प्रपञ्च्यते ।

---

१ ख. जययो ववयोरह. । २ ख सच्चयो । ३ क त्यद्ययो ।

शरदुपमितशशिमण्डलवरमुख
कनकमकरमयकुण्डलकृतमुख
युवतिहृदयशुकपञ्जरनिभ(ज)भुज
परिहितविचकिलमञ्जर(ञ्जुल)शिरसिज
सुतनुवदनविधुचुम्बनपटुतर
दनुजनिविडमदडुम्बनरणखर
धीर !

रणति हरे[1] तव वेणी नार्यो दनुजाश्च कम्पिता खिन्ना. ।
वनमनपेक्षितदयिता करवालान्प्रोज्झ्य धावन्ति ।

कुङ्कुमपुण्ड्रक गुम्फितपुण्ड्रक-
सकुलकङ्कण कण्ठगरङ्गण
देव !

सारङ्गाक्षीलोचनभृङ्गावलिपानचारुभृङ्गार ।
त्वा मङ्गलशृङ्गार शृङ्गाराधीश्वर स्तौमि ।

विरुदमिद तिलकम् २.

३. अथ अच्युत चण्डवृत्तम्

——वाऽच्युत पुन ।

[व्या०] अत्राय शब्दार्थश्चकार । तेन अच्युताख्य चण्डवृत्तमुच्यत इत्युक्त भवति । लक्षण गणनियमपूर्वकमाह—

नयौ चेत् पञ्चमो दीर्घ षष्ठ श्लिष्टपरो नजौ ॥ १० ॥
सर्वशेषे—

[व्या०] अस्यार्थ —यत्र नयौ–नगणयगणौ चेद् भवत , किञ्च पञ्चमो वर्णो यत्र दीर्घो भवति, षष्ठो वर्ण श्लिष्टपर –श्लिष्ट पर स सप्तमो यस्य स तादृशो भवति । एव चत्वारोऽष्टौ वा पादा यथेष्ट भवन्ति । सवशेषे नजौ–नगण-जगणौ भवत सोऽच्युताख्यश्चण्डवृत्तस्यावान्तरो भेद इति । चतुर्विंशत्यक्षरमिद पदम् । यथा–

प्रसरदुदार-द्युतिभरतार-प्रगुणितहार-स्थिरपरिवार ।

इत्यादि । शेषेषु—

कृतरणरग । इत्यादि ।

यथा वा—

जय जय वीर स्मररसधीर द्विजजितहीर प्रतिभटवीर
स्फुरदुप(रु)हार-प्रियपरिवारच्छुरितविहार-स्थिरमणिहार

---

१. क. हते ।

तत्र प्रथमम्–

१ पुरुषोत्तमदण्डकवृत्तम्

एवं सर्वत्र–

श्लिष्टौ तुर्याष्टमौ दीर्घौ त्रि-षष्ठौ सगणौ च म ।
पुरुषोत्तमदण्डः स्यात्—

[व्या.] अस्यार्थः—यत्र चतुर्थाष्टमौ वर्णौ श्लिष्टौ-सरेफाक्षरकौ च तृतीय-षष्ठौ च दीर्घौ भवतः । तत्र गणनियममाह—'सगणौ' इति । सगणौ भवतः । ततश्च म-मगणो भवति तत् पुरुषोत्तमाख्यं महाकालिकाख्यं दण्डकवृत्तं भवति । नवाक्षरमिदं वृत्तम् । अस्मिन् प्रकरणे सर्वत्र विरामद्वयमेव भवतीत्युपदिश्यते । यथा–

विलिखार्हन घातप्रभ ।

इत्यादि ।

इति पुरुषोत्तमदण्डकवृत्तम् १

२ अथ तिलकं दण्डकवृत्तम्

—सादौ मौ शेषगौ च मौ ॥ ९ ॥

मधुरो दशमो वर्णस्तिलकम्—

[व्या.] अयमर्थः — यत्र सादौ-सगणस्यादिभूतौ मौ-मगणौ यत्र च सगणस्य शेषगौ-देशे च वर्तमानौ मगणावेव भवतः । मध्यभूतस्य सगणस्याद्यन्तयोर्मगणौ भवत इति फलितोऽर्थः । किञ्च—दशमो वर्णो मधुर-स्वरसंयुक्त परसवर्णो भवति । तत्तिलकं नाम दण्डकवृत्तस्यावान्तरो भेद इति । पञ्चदशाक्षरमिदं पदम् । यथा–

विषमविशिखगणगुम्फितपरवश ।

इत्यादि । यथा वा–

भ्रमरकमलरुचिसम्भ्रमपटुपद
नटनपटिमहृतकुण्डलिपतिमद
नवकुवलयकुसुमसुन्दररुचिभर
घनतडिदुपमितबन्धुरपटधर
तरणिदुहितृतटमञ्जुलनटवर
मदननटनविरचसज्जनपरिकर
भुजतटगतहरिचन्दनपरिमल
पशुपयुवतिगणनयन चरकम
मदमदमधुरदृगञ्चलविलसित
मुखपरिमलभरसञ्चलदलिवृत

तादृक्क्रीडाण्डकोटीवृतजलकुडवा यस्य वैकुण्ठकुल्या ,
कर्त्तव्या तस्य का ते स्तुतिरिह कृतिभि प्रोझ्य लीलायितानि ॥

अपि च–

निविडतरतुरापाङन्तरीणोष्मसपद्[1]-
विघटनपटुखेलाडम्बरोर्मिच्छटस्य ।
सगरिमगिरिराजच्छत्रदण्डायितश्री-
र्जगदिदमघशत्रोः सव्यबाहू[2]र्धिनोतु ॥

अभ्रमुपतिमदमर्द्दिपदक्रम
विभ्रमपरिमललुप्तसुहृच्छ्रम
दुष्टदनुजदलदर्पविमर्द्दन
तुष्टहृदयसुरपक्षविवर्द्धन
दर्प्पकविलसितसर्गनिरर्गल
सर्पतुलितभुजकर्णगकुण्डल[3]
निर्मलमलयजचर्चितविग्रह
नर्म्मलसितपरिवर्जितविग्रह[4]
दुष्करकृतिभरलक्षणविस्मित-
पुष्करभवभयमर्द्दनसुस्मित
वत्सलहलधरतर्क्कितलक्षण
वत्सरविरहितवत्ससुहृद्गण
गर्जितविजयिविशुद्धतरस्वर-
तर्जितखलगण दुर्जनमत्सर
धीर !

तव मुरलीध्वनिरमरीकामाम्बुधिवृद्धिशुभ्रांशु ।
अचटुलगोकुलकुलजाधैर्याम्बुधिपानकुम्भजो जयति ।

धृतगोवर्द्धन सुरभीवर्द्धन
पशुपालप्रिय रचितोपक्रिय
वीर !

भुजङ्गरिपुचन्द्रकस्फुरदखण्डचूटाङ्कुरे,
निरङ्कुशदृगञ्चलभ्रमिनिबद्धभृङ्गभ्रमे ।

---

१ गोवि सम्यग् । २. गोवि. सत्यबाहु । ३. गोवि. कुड्मल । ४ गोवि. नर्मल-
लितहृतसपविनिग्रह ।

प्रकटितरास स्तवकितहास स्फुटपटवास-स्फुरितविलास
व्यनवमिनाम-स्तुतयममास व्रजकुलपाल प्रणयविशाल
प्रविलसदंस भ्रमवतंस क्वणदुरुवंश-स्वनहृतहंस
प्रशमितदाव प्रणयिषु सावहितसितभाव स्तनितविराव
स्तनघनरागश्रितपरभाग क्षतहरियाग त्वरितमृगाग
कृतरससग'
धीर !

स्थितिनियमितभीते धीरताहारिगीते
प्रियजनपरिवीते कुङ्कुमालेपपीते ।
कलितनवकुटीरे काञ्च्युदञ्चत्कटीरे
स्फुरतु रसगभीरे गोष्ठवीरे रतिर्मे ॥
अम्बाविनिहुतचुम्बाप्रसतर
बिम्बाधरसुखलम्बानक जय !
देव !
दृष्ट्वा ते मदनशतकोटिकान्तिपूर
पूर्णामपि शशिनो शतदुरापम् ।
निर्विण्णो मुरहर मुक्तरूपदर्प
कन्दर्पः स्फुटमशरीरतामयासीत् ॥

इति अच्युतं चण्डवृत्तम् ३

४ अथ वञ्चितमचण्डवृत्तम्

—यदि शिलष्टा द्वि-नव-द्वादशा अपि ।
वञ्चितो भगणा धोम —

[व्या.] एतदुक्तं भवति यदि द्वि-नव द्वादश अपि वर्णाः शिलष्टा—तदेकीभिरस्कान्तवेत् स्युस्तदा वञ्चित इति नाम चण्डवृत्तं भवतीति । तत्र च पदनियममाह—भगणा-भगण नगणभगणा अत्र च धो-नगणः ततो म—लघुरित्यर्थः । यथोक्ताक्षरचित यदं स्वेच्छया यत्र विनिवेशित भवति तद् वञ्चिताख्यं चण्डवृत्तम् । यथा—

दुर्जयपरबलगर्वमपवर्जित ।

इत्यादि ।

यथा वा श्रीगोविन्दविरुदावल्याम्—

पद्म। महाण्डभाण्डे सरसिजनयन सप्तुमाक्रीडमानि
स्थाणुर्भस्तु च लेसाकुरसितमतिना तानि येन न्ययोजि ।

---

१ मोति इस्तवतन्त्र नास्ति ।

खलिनीडुम्बक मुरलीचुम्बक
जननीवन्दक-पशुपीनन्दक
वीर ।

अनुदिनमनुरक्त पद्मिनीचक्रवाले,
नवपरिमलमाद्यच्चञ्चरीकानुकर्षी ।
कलितमधुरपद्म कोऽपि गम्भीरवेदी,
जयति मिहिरकन्याकूलवन्याकरीन्द्र ।

इति सविरुद समग्रोदाहरणम् ।

इति रणश्चण्डवृत्तम् ५.

६. अथ वीरश्चण्डवृत्तम्

—मभौ नौ वीरश्चण्डके ।। १२ ।।

आद्यवर्णात्तु चत्वारो वर्णा स्युर्मधुरेतरा. ।

[व्या०] अस्यार्थः —यत्र मभौ—मगणभगणौ, अथ च नौ—नगणौ भवत । किञ्च, आद्यवर्णात्—प्रथमाक्षरात् चत्वारो वर्णाः मधुरेतरा – केवल श्लिष्टा एवेत्यर्थः । तत् वीरचण्डकाख्य चण्ड-वृत्त भवति । इदमपि द्वादशाक्षरमेव पदम् । अत्रापि पदविन्यास पूर्ववदेव । बाहुल्येन द्वादश-पदमिद भवति, तथा दृष्टत्वादिति । यथा–

युद्धक्रुद्धप्रतिभटजयपर ।

इत्यादि ।

एतस्यैव अन्यत्र वीरभद्र इति नामान्तरम् । यथा–

उद्यद्विद्युद्द्युतिपरिचितपट
सर्पत्सर्पस्फुरदुरुभुजतट
स्वस्थस्वस्थत्रिदशयुवतिनुत
रक्षद्दक्षप्रियसुहृदनुसृत
मुग्धस्निग्धव्रजजनकृतसुख
नव्यश्रव्यस्वरविलसितमुख
हस्तन्यस्तस्फुटसरसिजवर
सज्जद्गर्ज्जत्खलवृषमदहर
युद्धक्रुद्धप्रतिभटलयकर
वर्णस्वर्णप्रतिमतिलकधर
रुष्यत्तुष्यद्युवतिषु कृतरस
भक्तव्यक्तप्रणय मनसि वस
वीर !

पतङ्गदुहितुस्तटीवनकुटीरकेलिप्रिये
परिस्फुरतु मे मुहुस्त्वयि मुकुन्द गूढा रतिः ।

इति विवर्तमिदं वर्णितम् ४

५ अथ रणदण्डकवृत्तम्

—त्रि-पञ्च-नव-सप्तमा ॥ ११ ॥
प्रादिरेकादशाद्यपैव विसृष्टा जो रो जरौ भगु ।
सर्वशेपे रणाख्ये स्यात्—

[यथा] इदमत्राकूतम् । अत्र त्रि-पञ्च-नव-सप्तमा वर्णाः प्रादिरेकादशाद्येति च षड्वर्णाः विसृष्टा भवन्ति । तत्र गणनियममाह—'जो रो जरौ भगु' जो-जगण रो-रगण भवतीति ध्येयः । अथ च जरौ–जगणरगणौ एव भवतः ततः सर्वशेषे पदे गुरुको लघुर्भवति । तद् रणाख्यं सविरामं महाललितकाख्यदण्डकवृत्तं भवति । द्वादशाक्षरमिदं पदम् । चतुर्दशाक्षरं चान्त्यं पदं भवति । विरामार्थेऽपि एकैकस्याधिकस्य जगणरगणावित्याशयः । पदविन्यासस्तु स्वेच्छया भवतीत्युपदेशः । तथा चान्त्यपदे विरामादपि लघुगुरुक्रमतः–जगण रगणौ भवन्तीति वा । यथा—

प्रगल्भविक्रम प्रसर्प्पिसत्क्रम ।

इत्यादि ।

प्रपन्नवर्द्धनक प्रसन्नगर्द्धनक ।

इत्युत्तरम्[१] ।

एतस्य चाण्डवृत्तं समग्र इति नामान्तरम् । तथोदाहृतमपि श्रीरूपस्वामिभिः श्रीगोविन्दविरुदावल्याम् । यथा–

अनिष्टखण्डन[४] स्वमण्डलमण्डन
प्रयुक्तपन्नग प्रपन्ननन्दन
प्रसन्नचन्द्रज स्फुरद्द्युमण्डल
श्रुतिप्रलम्बक भ्रमत्कदम्बक
प्रविष्टकन्दरप्रकृष्टसुन्दर
स्थविष्ठसुन्दरक-प्रसर्पदम्बुरक[५]
देव !
वृन्दारकतरुवीते वृन्दावनमण्डले वीर ।
नन्दितया मयवृन्द सुन्दरवृन्दारिका रमय ।

---

१ क तयोर्वर्णावित्याशयः । २ ख. ग । ३ क इत्यन्तम् । ४ गोवि अरिष्ट खंडन । ५ गोवि स्थविष्ठसिन्धुरप्रसर्पदम्बुर ।

खलिनीडुम्बक मुरलीचुम्बक
जननीवन्दक - पशुपीनन्दक
वीर ।

अनुदिनमनुरक्त. पद्मिनीचक्रवाले,
नवपरिमलमाद्यच्चञ्चरीकानुकर्षी ।
कलितमधुरपद्म कोऽपि गम्भीरवेदी,
जयति मिहिरकन्याकूलवन्याकरीन्द्र ।

इति सविरुद समग्रोदाहरणम् ।

इति रणश्चण्डवृत्तम् ५.

६. अथ वीरश्चण्डवृत्तम्

—मभौ नौ वीरचण्डके ॥ १२ ॥

आद्यवर्णात्तु चत्वारो वर्णा स्युर्मधुरेतरा. ।

[व्या०] अस्यार्थ —यत्र मभौ—मगणभगणौ, अथ च नौ—नगणौ भवत । किञ्च, आद्यवर्णात्—प्रथमाक्षरात् चत्वारो वर्णा. मधुरेतरा – केवल श्लिष्टा एवेत्यर्थः । तत् वीरचण्डकाख्य चण्ड-वृत्त भवति । इदमपि द्वादशाक्षरमेव पदम् । अत्रापि पदविन्यास पूर्ववदेव । बाहुल्येन द्वादश-पदमिव भवति, तथा दृष्टत्वादिति । यथा–

युद्धक्रुद्धप्रतिभटजयपर ।

इत्यादि ।

एतस्यैव अन्यत्र वीरभद्र इति नामान्तरम् । यथा–

उद्यद्विद्युद्द्युतिपरिचितपट
सर्प्पत्सर्प्पस्फुरदुरुभुजतट
स्वस्थस्वस्थत्रिदशयुवतिनुत
रक्षद्दक्षप्रियसुहृदनुसृत
मुग्धस्निग्धव्रजजनकृतसुख
नव्यश्रव्यस्वरविलसितमुख
हस्तन्यस्तस्फुटसरसिजवर
सज्जद्गर्ज्जत्खलवृषमदहर
युद्धक्रुद्धप्रतिभटलयकर
वर्णस्वर्णप्रतिमतिलकधर
रुष्यत्तुष्यद्युवतिषु कृतरस
भक्तव्यक्तप्रणय मनसि वस
वीर !

प्रचुरपरमहर्षे काममाचम्यमाने
प्रणतमकरचन्द्रे पादपद्माक्रान्तकुक्षौ ।
भवहर जगदण्डाहिण्डिहिन्दोलहासे
स्फुरतु तव गभीरे केलिसिन्धौ रतिर्न ।
उद्गीर्णतारुण्य विस्तीर्णकारुण्य
गुञ्जालतापिञ्छपुञ्जावतंसापिञ्छ ।
धीर !

रचित पशुपस्त्रीसत्क्रियायै नितरां नन्दितरोहिणीयशोद ।
तव गोकुलकेलिसिन्धुजन्मा जगदुद्दीपयति स्म कीर्तिचन्द्र ।

सविस्तरं वीरभद्रोदाहरणमिदम् ।

इति वीरचण्डवृत्तम् ।६।

७ अथ शाकचण्डवृत्तम्

भौ रो ल पञ्चम श्लिष्टो दीर्घौ नवम-सप्तमौ ॥ १३ ॥
द्वितीयो मधुरः शाके—

[व्या०] अयमर्थः—शाके-शाकाख्ये चण्डवृत्ते प्रथमं भौ-भगणौ अथ च रो-रगणः ततो लो लघुः । विश्लिष्ट-पञ्चमो वर्णः श्लिष्ट-संयुक्तो भवति नवमसप्तमौ दीर्घौ भवतः द्वितीयो मधुरः-परसवर्णो वर्णो यत्र भवतीत्यर्थः । तत् शाकनामकं चण्डवृत्तं भवति । अपरं सर्वं विन्यासः पूर्ववत् । यथा—

सञ्चितचन्द्र-मुखाभिराम ।

इत्यादि ।

इति शाकचण्डवृत्तम् । ७ ।

८ अथ मातङ्गखेलितं चण्डवृत्तम्

—अथ मातङ्गखेलितम् ।
विश्लिष्टौ वा मधुरौ बाणवसमौ रौ यलौ यदि ॥ १४ ॥
बाणे मङ्गस्य[1] मैत्री च प्रथमाष्टमषष्ठका ।
तृतीयश्चात्र दीर्घाः स्युः—

[व्या०] इयमत्रानुसन्धेयम्—अथ मातङ्गखेलित-मातङ्गखेलिताभिधानं चण्डवृत्तं लक्ष्यत इति शेषः । अत्र चार्थे चकारः । तथा च यत्र आद्यवर्णौ बाण-पञ्चम वसमाविति द्वौ वर्णौ श्लिष्टौ मधुरौ-परसवर्णौ च भवतः । तथा रौ-रगणौ अथ च यलौ-यगणलघू यदि

---

१ ख आर्थमङ्गुरस्य ।

भवतस्तथा वाणे–पञ्चमे भङ्गश्च–संज्ञौ च यदि भवति, तथा प्रथमाष्टमषष्ठकाः वर्णास्तृतीयश्च वर्णश्चेच्चत्वारोऽत्र वर्णा दीर्घा स्युस्तदा मातङ्गखेलिताभिधान चण्डवृत्तं भवति। दशाक्षर पदमिदम्। अत्र पदविन्यास स्वेच्छया विधेय। यथा–

साधितानन्तसारसामन्त।

इत्यादि। यथा वा–

नाथ हे नन्द-गेहिनीशन्द
पूतनापिण्डपातने चण्ड
दानवे दण्डकारकाखण्ड-
सारपौगण्डलीलयोद्दण्ड
गोकुलालिन्दगूढ गोविन्द
पूरितामन्द-राधिकानन्द
वेतसीकुञ्ज-माधुरीपुञ्ज
लोकनारम्भजातसरम्भ-
दीपितानङ्गकेलिभागङ्ग-
गोपसारङ्ग-लोचनारङ्ग-
कारिमातङ्गखेलितासङ्ग-
सौहृदाशङ्कयोषितामङ्क-
पालिकालम्ब चारुरोलम्ब-
मालिकाकण्ठ कौतुकाकुण्ठ
पाटलीकुन्दमाधवीवृन्द-
सेवितोत्तुङ्गशेखरोत्सङ्ग
मा सदा हन्त पालयानन्त
वीर !

स्फुरदिन्दीवरसुन्दर सान्द्रतरानन्दकन्दलीकन्द।
मा तव पदारविन्दे नन्दय गन्धेन गोविन्द॥

कुन्ददशन मन्दहसन[1]
बद्धरसन रुक्मवसन[2]
देव !

प्रपन्नजनतातम क्षपणशारदेन्दुप्रभा-
व्रजाम्बुजविलोचना स्मरसमृद्धिसिद्धौषधि।

---

१ क. 'मन्दहसन' नास्ति। २ गोवि. रुक्मवसन रम्यहसन।

विडम्बितसुधाम्बुधिप्रबलमाधुरीडम्बरा
विभर्तु तव माधव स्मितकदम्बकान्तिर्मुदम् ।
इति श्रीगोविन्दविरुदावल्यां मातङ्गखेलितप्रयुदाहरणम् ।

कलिकमिदं मातङ्गखेलितम् ।८।

९. अथ उत्पलं चण्डवृत्तम्

—भद्वय भोत्पलं मतम् ॥ १५ ॥

शिलष्टौ द्विपञ्चमौ—

[व्या०] भगमयं—भगणं-नगणयोर्द्वयं भगणनगणचतुष्टयमित्यर्थः । तस्ये तथा सर्वलघ्वेव ज्ञातम् । किञ्च–तस्मिन्नेव भगणद्वये द्विपञ्चमौ–द्वितीयपञ्चमौ वर्णौ शिलष्टौ–परस्परमिलितौ च भवतो यत्र तद् उत्पलनामकं चण्डवृत्तं भवतीत्यर्थः । अष्टादशं भगणद्वयपक्षे, भगण-चतुष्टयपक्षे तु द्वादशाक्षरमेव पदम् । पदविन्यासस्तु पूर्ववदेव । यथा–

सर्वजनप्रिय
सर्वसमक्रिय

इत्यादि । यथा वा, श्रीगोविन्दविरुदावल्याम्—

नलितसमकर वक्रसकर्कर
मुग्धमरुद्भर-खर्हेम निर्भर
दुष्टविमर्दन शिष्टविवर्धन
सर्वविलक्षण निमज्जलक्षण
सद्भुजसक्षित-पवतरक्षित
निष्ठुरगर्जन-खिन्नसुहृज्जन
रुष्टदिवस्पति-गर्वसमुन्नति
तर्जनविभ्रम निर्गमितभ्रम
शङ्कुरसत्तम विस्फुरदुत्सव
वीर !

मुग्धीनां परिमोहनं किम ह्रियामुच्चाटनं स्तम्भनो
दर्पोदप्रधियो मन करटिनां वश्यत्वनिष्पादनम् ।
कामिन्यीकृतहृत हन्त वपुषामाकर्षणं भुभुवो
जीयाद् वैणवपञ्चमध्वनिमयो मन्त्राधिराजस्तव ।

---

१ गोवि. दर्पोदग्रधियाम् ।

काननारव्ध-काकलीशव्द-
पाटवाकृष्ट-गोपिकादृष्ट
चातुरीजुष्ट-राधिकातुष्ट
कामिनीलक्ष-मोदने दक्ष
भामिनीपक्ष[1] माममुं रक्ष,
देव !

अजर्जरपतिव्रताहृदयवज्रभेदोद्धुरा,
कठोरतरमानिनी[2]-निकरमानमर्मच्छिद[3] ।
अनङ्गधनुरुद्धतप्रचलचिल्लिचापच्युता,
क्रियासुरघविद्विषस्तव मुद कटाक्षेषव ।

सविरुदमिदमुत्पलम् ।९।

१०. अथ गुणरतिश्चण्डवृत्तम्

—सो नो, लश्च दीर्घं तृतीयकम् ।

गुणरत्याख्य—

[व्या०] अस्यार्थं —यत्र स –सगणः नो–नगण॰ ततो लश्च–लघुर्भवति । अत्र चतुर्दशाक्षर-पदविन्यासस्य अन्यत्रापि दृष्टत्वात् सनलानामावृत्तिरवगन्तव्या, तेन प्रकृतोद्दृवणिका सिद्धिर्भवति । किञ्च, तृतीयक–तार्तीयमक्षर दीर्घं भवति । तद् गुणरत्याख्य चण्डवृत्त भवति । चतुर्दशाक्षर पदम् । पदविन्यासः पूर्ववदेव । यथा–

विदिताखिलसुख
सुख(व)माधिकमुख ।

इत्यादि । यथा वा–

प्रकटीकृतगुण शकटीविघटन
निकटीकृतनवलकुटीवर वन-
पटलीतटचर नटलील मधुर
सुरभीकृतवन सुरभीहितकर
मुरलीविलसित-खुरलीहृतजग-
दरुणाधर नव-तरुणायतभुज[4]
वरुणालयसमकरुणापरिमल
कलभायितबल-शलभायितखल

---

१ गोवि भाविनीपक्ष । २ गोवि. कठोरघरवर्णिनी । ३. गोवि घर्मच्छिद । ४ गोवि करुणायतभुज ।

धवसाधृतिधर[1] गवसाश्रितकर
सरसीकृतमर सरसीरुहधर
कलधौतसितमुख कलधौतदमिहर
समितारतिकर समिताधमितपर
वीर !

हरिणीमयनावृत प्रभो करिणीवल्लभकेलिविभ्रम ।
तुलसीप्रिय वानराङ्गनाकुलसीमन्तहर प्रसीद मे ॥

चन्दनचर्चित गन्धसमर्चित
गण्डविवर्तन-कुण्डलनर्त्तन[2]
सन्दलदुज्ज्वल कुन्दलसद्गल
वञ्जुलकुन्तल[3] मञ्जुलकज्जल
सुन्दरविग्रह नन्दसदुग्रह
वीर !

रतिमनुबध्य गृहेभ्य कर्षति रामा वनाय या निपुणा ।
सा जयति निसृष्टार्था[4] वरवंशजकाकली दूती ।

इत्यिक्षा पुष्पतितिरियम् ॥१०॥

११ अथ कल्पद्रुमदण्डकवृत्तम्

तत्र–

—मन्त्यास्यो नयम स्लिष्टपूर्वग ॥ १९ ॥

कल्पद्रुमे तयौ यश्च स्लिष्टा षट् त्रि-नव-द्विका ।

[व्या०] कोऽर्थः ? उच्यते—यत्र कल्पद्रुमे दण्डकवृत्ते मन्त्यौ–मगणः तस्मात् नगणो वर्णः श्लिष्टपूर्वग–श्लिष्टो वर्णः पूर्वगो यस्य स तादृशो भवति । तत्र च संख्यानियममाह— तयौ–तगणयगणौ यत्र च नगण-यगणौपि भवति । एवं यत्रायं गण भवति तदेतत् कल्पद्रुमाख्यं दण्डवृत्तं भवति । नवाक्षरमिदं पदम् । पदविन्यासोऽपि पूर्ववत् । किञ्च–षड्भिरष्टादिका– षष्ठतृतीयनवमद्वितीयका वर्णा श्लिष्टा भवन्ति । यत्र च नवमस्तोपादेव द्वितीये पदे प्रथम वर्णस्य मुख्यं भवतीति भावः ।

यथा–

उद्रिक्तवरस्मितगर्व
प्रव्यक्तपरिस्मितसर्व ।[4]

---

१ भोजि हर । २ भोजि कुड्मल । ३ भोजि निसृष्टार्थी तव । ४ क प्रव्यक्तपरिस्मितसर्व ।

एव पदान्तरमपि बोद्धव्यम् ।

इति कल्पद्रुम ।११।

१२. अथ कन्दलश्चण्डवृत्तम्

कन्दले पञ्चम. श्लिष्टो द्वितीये मधुरोऽनु भौ ॥ १७ ॥

[व्या०] कन्दले–कन्दलाख्ये चण्डवृत्ते पञ्चमो वर्ण श्लिष्टो भवति। द्वितीयो वर्णो मधुर –परसवर्णो भवति। तत्र गणनैयत्यमाह—अत्रास्मिन् भौ–भगणौ एव स्त.। षडक्षरमेव पदम्। तत्कन्दलाभिधान चण्डवृत्त भवतीति। यथा–

पण्डितवर्द्धन ।

इत्यादि ।

इति कन्दलः ।१२।

१३. अथ अपराजितश्चण्डवृत्तम्

षडष्टदशमा दीर्घा द्वितीयो मधुरो यदि ।
अपराजितमेतत्तु भसजाश्च गुरुर्लघु ॥ १८ ॥

[व्या०] एतदुक्त भवति। यत्र षडष्टदशमा –षष्ठाष्टमदशमा वर्णा दीर्घा भवन्ति। द्वितीयो वर्णो यदि मधुर –परसवर्णो भवति। यदि च भसजा –भगणसगणजगणा भवन्ति। अथ च गुरुस्ततो लघुश्चेद् भवति। तदेतत् अपराजिताख्य चण्डवृत्त भवति। एकादशाक्षरं पदम्। यथा–

गञ्जितपरवीर धीर हीर ।

इत्यादि ।

इति अपराजितम् ।१३।

१४ अथ नर्त्तनश्चण्डवृत्तम्

चतु सप्तमकौ श्लिष्टौ सौ रो लौ यदि नर्त्तनम् ।
अष्टमो मधुर —

[व्या०] अस्यार्थ —यदि चतु सप्तमकौ वर्णौ श्लिष्टौ भवत, अष्टमो वर्णो मधुर –परसवर्णो भवति। किञ्च, यदि सौ–सगणौ स्याताम्। अथ च रो–रगण, ततो लौ–लघुद्वय स्यात् तदा नर्त्तन–नर्त्तनाख्य चण्डवृत्त भवति। इदमप्येकादशाक्षर पदम्। यथा–

भुवनत्रयशत्रुम्प्रमर्द्दय ।

इत्यादि ।

इति नर्त्तनम् ।१४।

१५. अथ तरलसमस्तश्चण्डवृत्तम्

—श्लिष्ट-सश्लिष्टमधुरा यदि ॥ १६ ॥

षड्त्रिपञ्चमका जो म सगणो लघुयुग्मकम् ।
तरलसमस्तमित्याहु—

[व्या॰] एवमुक्तं भवति । यदि षड्त्रिपञ्चमका-षष्ठतृतीयपञ्चमा वर्णाः श्लिष्ट संश्लिष्ट-मधुराः स्युः । तत्र गणनियममाह—जो-जगणः, मो-मगणः, सगणः पुनस्तदनन्तरं ततो लघुयुग्मकं—लघुयुगलं च यदि भवति तदा तरलसमस्तमिति नामकं खण्डवृत्तमाहुर्लाक्षणिकाः । एकादशाक्षरमेव पदम् । यथा—

निरस्तपण्डदुपिधराधर

इत्यादि ।

इति तरलसमस्तम् ।१५।

१६ अथ वेष्टनखण्डवृत्तम्

—दीर्घौ षट्पञ्चमौ यदि ॥ २० ॥
वेष्टने सप्तमः श्लिष्टो नयौ लघुचतुष्टयम् ।

[व्या॰] अयमर्थः—वेष्टने-वेष्टनाख्ये खण्डवृत्तप्रभेदे यदि षट्पञ्चमौ-षष्ठपञ्चमकौ वर्णौ दीर्घौ स्याताम् । सप्तमश्च वर्णः श्लिष्टो भवेत् । गणनियममाह—नयौ-नगणयगणौ स्तः, ततो लघुचतुष्टयं यत्र भवति । दशाक्षरं च पदं भवति । तत् वेष्टनाभिधानं खण्डवृत्तं भवतीति । यथा—

मलयजसाराञ्चितहर ।

इत्यादि ।

इति वेष्टनम् ।१६।

१७ अथ प्रस्खलितखण्डवृत्तम्

तरौ भगावस्खलिते ऽष्टपञ्चमसप्तमा ॥ २१ ॥
संश्लिष्टा दीर्घ आद्यः स्यात्—

[व्या॰] कोऽर्थः ? उच्यते—प्रस्खलिते-प्रस्खलिताभिधाने खण्डवृत्ते यदि तरौ-तगणरगणौ स्याताम् । यत्र च भगौ-भगणगुरू स्तः । किञ्च त्र्यष्टपञ्चमसप्तमा-तृतीयाष्टमपञ्चम सप्तमा वर्णाश्चेत् संश्लिष्टा संयोगिनः स्युः । आद्य-प्रथमो वर्णश्चेद् दीर्घः स्यात् तदा प्रस्खलिताभिधानं खण्डवृत्तं भवति । दशाक्षरमेव पदं भवति । यथा—

प्रावृड्गुरुयुग्मप्रणय ।

इत्यादि ।

इति प्रस्खलितम् ।१७।

१८ अथ पर्स्तलितखण्डवृत्तम्

—दीर्घौ चेत्तुर्यपञ्चमौ ।
शिथिलो मधुरो यत्र द्वितीयो भतमद्विजाः ॥ २२ ॥
एतत् पर्स्तलितम्—

[व्या०] इदमत्रानुसन्धेयम्। अत्र पल्लविताख्ये चण्डवृत्ते तुर्यपञ्चमौ वर्णौ चेद् दीर्घौ भवतः। द्वितीयो वर्ण शिथिलो मधुरो वा भवति। तत्र प्रायेण मधुर एव श्रुतिसौख्यकृत्। तत्र गणनैयत्यमाह—भतनद्विजा—भगण-तगण नगण-द्विजगणा क्रमेण यत्र भवन्ति। एतत पल्लविताभिधानमिद चण्डवृत्त भवति। त्रयोदशाक्षरमिद पद भवति। यथा—

रञ्जितनारीजननवमनसिज।

इत्यादि। मधुरद्वितीयवर्णोदाहरणमिदम्।

शिथिलद्वितीयवर्णोदाहरण, यथा—

वल्लवलीलासमुदयपरिचित
पल्लवरागाधरपुटविलसित
वल्लभगोपीप्रवणित मुनिगण-
दुर्लभकेलीभरमधुरिमकण
मल्लविहाराद्भुततरुणिमधर
फुल्लमृगाक्षीपरिवृतपरिसर
चिल्लिविलासार्पितमनसिजमद
मल्लिकलापामलपरिमलपद
रल्लकराजीहृग्सुमधुरकल
हल्लकमालापरिचितकचकुल
धीर!
जय चारुहास कमलानिवास
ललनाविलास परिवीतदास
वीर!

वल्लवललनावल्ली-करपल्लवशीलितस्कन्धम्।
उल्लसित परिफुल्ल भजाम्यह कृष्णकङ्केल्लिम्।

इति पल्लवितम्।१८।

१९ अथ समग्र चण्डवृत्तम्

—जो र समग्र श्लिष्टपञ्चमम्।
तृतीय मधुर सर्व-कलान्ते ल—

[व्या०] अस्यार्थ—जो—जगण रो—रगणश्चेति गणद्वय प्राक्र्वत्यमित्युपदेश। तथा च द्वादशाक्षरपदमिद समग्र—समग्राख्य चण्डवृत्तं भवति। किंविशिष्ट? श्लिष्टपञ्चम—श्लिष्ट:—सरेफशिरस्क पञ्चमो वर्णो यत्र। किञ्च, तृतीयमक्षर मधुर—परसवर्ण यत्र। सर्वकलान्ते—

कुन्तललुठदुरुरङ्ग
कुङ्कुमरुचिलसदम्बर
लङ्घिमपरिमलडम्बर
नन्दभवनवरमङ्गल-
[मञ्जुलघुसृणसुपिङ्गल
हिङ्गुलरुचिपदपङ्कज
सञ्चितयुवतिसदङ्गज] [1]
सन्ततमृगपदपङ्किल
सतनु मयि कुशलङ्किल
वीर ।

गिरितटीकुनटीकुलपिङ्गले खलतृणावलिसञ्ज्वलदिङ्गले ।
प्रखरसङ्गरसिन्धुतिमिङ्गिले मम रतिर्वलता व्रजमङ्गले ।

जय चारुदाम-ललनाभिराम
जगतीललाम रुचिहारिवाम [2]
वीर ।

उन्दितहृदयेन्दुमणि. पूर्णकल कुवलयोल्लासी ।
परित शार्वरमथनो विलसति वृन्दाटवीचन्द्र ।

इति तुरग ।२०।

एते महाकलिकारूपस्य चण्डवृत्तस्य विंशति. शुद्धा प्रभेदा ।

अथ सङ्कीर्णा

तत्र–

२१. पङ्केरुह चण्डवृत्तम्

पङ्केरुह नयौ षष्ठे भङ्गो मैत्री च दृश्यते ।। २४ ।।
सा चेत् कवर्गरचिता यथा लाभमनुक्रमात् ।
तथैव षष्ठो मधुर स्वरभेदेऽपि तद्भिदा ।। २५ ।।

[व्या०] एतस्यार्थं —यत्र नयौ–नगणयगणौ भवत । तथा षष्ठे वर्णे भगो मैत्री च दृश्यते । किञ्च, सा मैत्री चेत् कवर्गेण यथालाभमनुक्रमात् रचिता स्यात । तथा षष्ठो वर्णो मधुर–परसवर्णो यदि स्यात् तदा पङ्केरुह नाम चण्डवृत्त भवति । किञ्च, स्वरभेदेपि–इकारादिस्वर-भेदेपि सति तद्भिदा पङ्केरुहभेदो भवतीति बोद्धव्यम् । षडक्षरमेव पदम् । पदविन्यासोपि पूर्ववदिति बोद्धव्यम् ।

---

१ [-] कोष्ठगतोंश नास्ति क प्रतौ ।　२ गोवि रुचिहृतवाम ।

कुन्तललुठदुरुरङ्ग
कुङ्कुमरुचिलसदम्बर
लङ्गिमपरिमलडम्बर
नन्दभवनवरमङ्गल-
[मञ्जुलघुसृणसुपिङ्गल
हिङ्गुलरुचिपदपङ्कज
सञ्चितयुवतिसदङ्गज][1]
सन्ततमृगपदपङ्किल
सतनु मयि कुशलङ्किल
वीर !

गिरितटीकुनटीकुलपिङ्गले खलतृणावलिसञ्ज्वलदिङ्गले ।
प्रखरसङ्गरसिन्धुतिमिङ्गिले मम रतिर्वलता व्रजमङ्गले ।

जय चारुदाम-ललनाभिराम
जगतीललाम रुचिहारिवाम[2]
वीर !

उन्दितहृदयेन्दुमणिः पूर्णकल कुवलयोल्लासी ।
परित शार्वरमथनो विलसति वृन्दाटवीचन्द्र ।

इति तुरगः ।२०।

एते महाकलिकारूपस्य चण्डवृत्तस्य विंशति शुद्धा प्रभेदा ।

अथ सङ्कीर्णा

तत्र–

२१. पङ्करुह चण्डवृत्तम्

पङ्केरुह नयौ षष्ठे भङ्गो मैत्री च दृश्यते ।। २४ ।।

सा चेत् कवर्गरचिता यथा लाभमनुक्रमात् ।
तथैव षष्ठो मधुर स्वरभेदेऽपि तद्भिदा ।। २५ ।।

[व्या०] एतस्यार्थ —यत्र नयौ–नगणयगणौ भवत । तथा षष्ठे वर्णे भगो मैत्री च दृश्यते । किञ्च, सा मैत्री चेत् कवर्गेण यथालाभमनुक्रमात् रचिता स्यात । तथा षष्ठो वर्णो मधुर–परसवर्णो यदि स्यात् तदा पङ्केरुह नाम चण्डवृत्त भवति । किञ्च, स्वरभेदेपि–इकारादिस्वर-भेदेपि सति तद्भिदा पङ्केरुहभेदो भवतीति बोद्धव्यम् । षडक्षरमेव पदम् । पदविन्यासोपि पूर्व-वदिति बोद्धव्यम् ।

---

१ [-] कोष्ठगर्तोश नास्ति क प्रतौ ।　२ गोवि रुचिहृतवाम ।

यथा–

जय गतशङ्क
प्रणयविटङ्क
प्रियजनवङ्क
स्मितजितपाङ्ग
स्फुरतरशृङ्ग
स्वमिधृतरङ्ग
क्षणनटमङ्ग
प्रणयितुरङ्ग
प्रजङ्गसङ्ग
श्रुतिवटरिङ्ग
स्मधुरसपिङ्ग-
प्रथितसवङ्ग
स्वनटनमङ्ग
प्रणितभुजङ्ग
स्तवकिवतुङ्ग
क्षितिपदहृष्यङ्ग
स्मितमहुभृङ्ग
मणितमरङ्ग-
प्रवसदनङ्ग-
भ्रमपुरभृङ्गी
मुदितकुरङ्गी
दृगुदितभङ्गी-
भ्रदिमभिरङ्गी
कृतनवसङ्गी-
तक दरवङ्के-
क्षण नवसङ्के
तकसुदृगङ्के
भय सकसङ्के
तरपृथपङ्के
वितमुख पङ्के
सहपद रङ्के

कृपय सपङ्के
किल मयि धीर !

उत्तुङ्गोदयशृङ्गसङ्गमजुषा विभ्रत्पतङ्गत्विषा,
वासस्तुङ्ग¹मनङ्गसङ्गरकलाशौटीर्यपारङ्गत ।
स्वान्त रिङ्गदपाङ्गभङ्गिभिरल गोपाङ्गनाना किल²,
भूयास्त्व पशुपालपुङ्गव दृशोरव्यङ्ग रगाय मे ॥

विलसदलिकगतकुङ्कुमपरिमल
कटितटधृतमणिकिङ्किणिवरकल
नवजलधरकुललङ्घिमरुचिभर
मसृणमुरलिकलभङ्गिमधुरतर
धीर !

अवतसितमञ्जुमञ्जरे तरुणीनेत्रचकोरपञ्जरे ।
नवकुङ्कुमपुञ्जपिञ्जरे रतिरास्ता मम गोपकुञ्जरे ।

पङ्केरुह सविरुदमिदम् । २१ ।

अथ सितकञ्जादयश्चण्डवृत्तस्य चत्वारो भेदा लक्ष्यन्ते । तत्र—

एतावेव गणौ यत्र भङ्गो मैत्री च पूर्ववत् ।
क्रमेण चादिवर्गैस्तु रचिता साऽपि पूर्ववत् ॥ २६ ॥

[व्या०] अस्यार्थ —यत्र एतौ—नगणयगणौ एव—पूर्वोक्तौ गणौ भवत । किञ्च, भङ्गो मैत्री च पूर्ववत्, षष्ठाक्षर एव भवतीत्यर्थ । एतच्च षष्ठवर्णस्य मधुरत्वमपि लक्षयतीति बोद्धव्यम् । पूर्ववद् इत्यनेनैवोपस्थापितत्वात । किञ्च, साऽपि मैत्री चादि–चतुर्भिर्वर्गै पूर्ववत् यथालाभ रचिता चेद् भवति । अपि शब्दात् स्वरान्तरेणाभेदेपि सति तदा तत्तद्भेदो भवतीत्यपि बोद्धव्यम् । षडक्षरमेव पदम् । पदविन्यासोऽपि पूर्ववदेवेति च ॥२६॥

तद्भेदचतुष्टयमाह सार्द्धेन श्लोकेन—

सितकञ्ज तथा पाण्डूत्पलमिन्दीवर तथा ।
अरुणाम्भोरुहञ्चेति ज्ञेय भेदचतुष्टयम् ॥ २७ ॥
विरुदेन सम चापि चण्डवृत्तस्य पण्डितै ।

[व्या०] सितकञ्ज, पाण्डूत्पल, इन्दीवर, अरुणाम्भोरुह चेति सविरुदचण्डवृत्तस्य भेदचतुष्टय पण्डितै –अधीतछन्द शास्त्रनिपुणमतिभिर्ज्ञेयमित्युपदिश्यते ।

उदाहरणमेतेषा क्रमेणैवोच्यतेऽधुना ॥ २८ ॥

---

१. गोवि स्तुल्य । २. गोवि गिलन् ।

[व्या०] एतेषां सितकञ्जादिभेदानाम्, शेषं स्पष्टम् । तत्र—

२२ सितकञ्जकञ्जपदवृत्तम्

जय कथचञ्चद्
धृतिसमुदञ्च
न्मधुरिमपञ्च
स्तबकितपिञ्छ-
स्फुरित विरिञ्च-
स्तुत गिरिगञ्ज
व्रजपरिगुञ्ज
न्मधुकरपुञ्ज
धृतमृदुशिञ्ज
द्विपदहिगञ्ज
प्रततिपु सञ्ज
प्रवरयसञ्ज
न्मदवशिपिञ्ज
प्रमथित[1]मुञ्जा
नमहर गुञ्जा
प्रिय गिरिकुञ्जा
श्रित रतिसञ्जा
गर भयकञ्जा
भमकर मञ्जा
मिमहर मञ्जी
रथरमपञ्जा।
परिमलसञ्जी
वितनवपञ्चा
धृगधारसञ्चा
रणजितपञ्चा
मनमथ धीर।

---

१ गौवि. गिरिकुञ्ज । २ गौवि. रसमञ्ज- । ३ गौवि प्रमथित ।

कर्णिकारकृतकर्णिकाद्युति कर्णिकापदनियुक्तगैरिका ।
मेचका मनसि मे चकास्तु ते मेचकाभरण भारिणी[1] तनु ।

मदनरसङ्गत सङ्गतपरिमल
युवतिविलम्बित लम्बितकचभर
कुसुमविटङ्कित टङ्कितगिरिवर
मधुरससञ्चित सञ्चितनरवर[2]
वीर !

भ्रूमण्डलताण्डवितप्रसूनकोदण्डचित्रकोदण्ड ।
हृतपुण्डरीकगर्भं मण्डय मे[3] पुण्डरीकाक्ष ।

सविरुद सितकञ्जमिदम् ।२२।

२३. अथ पाण्डूत्पलञ्चण्डवृत्तम्

जय जय दण्ड-
प्रिय कचखण्ड-
ग्रथितशिखण्ड-
त्यज शशिखण्ड-
स्फुरणसपिण्ड-
स्मितवृतगण्ड
प्रणयकरण्ड
द्विजपतितुण्ड
स्मररसकुण्ड
क्षतफणिमुण्ड
प्रकटपिचण्ड-
स्थितजगदण्ड
क्वणदणुघण्ट
स्फुटरणघण्ट
स्फुरदुरुशुण्डा-
कृतिभुजदण्डा-
हतखलचण्डा-
सुरगण पण्डा-

१. गोवि. भाविनी । २ गोवि. पंक्तिरियं नास्ति । ३. गोवि. मम ।

वनितविसण्डा
जितयम मण्डी
रदयित गण्डी
कृतनवडिण्डो
।
गण कसमुण्डी[1]
दृलकसकण्ठी
कुस मणिकण्ठी
स्फुरितसुकण्ठी
प्रिय वरकण्ठी
रवरण वीर ।

वण्डी कुण्डलिभोगकाण्डमिमयोरुद्दण्डदोर्दण्डयो',
स्निग्धदम्भिमहम्बरेण निविडश्रीसम्पपुञ्जोज्ज्वल' ।
निर्धूतोचदचण्डरश्मिघटया तुण्डश्रिया मामक
कामं मण्डय पुण्डरीकनयन त्वं हृन्त हृन्मण्डलम् ।
कन्दर्पकोदण्ड-दर्पाद्रिमोद्दण्ड
दुर्मल्लिकाण्डीर संकुष्टमाण्डीर
वीर !
त्वमुपेन्द्र कलिन्दनन्दिनी-तटवृन्दावनगन्धसिन्धुर ।
जय सुन्दरकान्तिकन्दलै स्फुरदिन्दीवरवृन्दबन्धुभि ।
सवित्वर्द पाण्डुलतमिदम् ।२१।

२४ अथ इन्दीवरम्

जय जय हृन्त
प्रिय दभिहृन्त
मंकुरिमसन्त
पितमगदन्त
मं वुल वसन्त
प्रिय सितदन्त
[स्फुरितविसन्त
प्रसरदुदन्त]

---

१ चौथि कुण्डी । २ पंक्तिद्वयं नास्ति क. प्रतौ ।

प्रभवदनन्त-
प्रियसख सन्त-
स्त्वयि रतिमन्त.
स्वमुदहरन्त][1]
प्रभुवर नन्दा-
त्मज गुणकन्दा-
सितनवकन्दा-
कृतिधर[2] कुन्दा-
मलरद तुन्दा-
त्तभुवन वृन्दा-
वनभवगन्धा-
स्पदमकरन्दा-
न्वितनवमन्दा-
रकुसुमवृन्दा-
ञ्चितकच वन्दा-
रुनिखिलवृन्दा[3]-
रकवरबन्दी-
डित विधुसन्दी-
पितलसदिन्दी-
वरपरिनिन्दी-
क्षणयुग नन्दी-
श्वरपतिनन्दी-
हित जय वीर !

स्मितरुचिमकरन्दस्यन्दि वक्त्रारविन्द,
तव पुरुपरहसान्विष्ट गन्ध मुकुन्द ।
विरचित[4]पशुपालीनेत्रसारङ्गरङ्ग,
मम हृदयतडागे सङ्गमङ्गीकरोतु ।

अम्बरगतसुरविनतिविलम्बित
तुम्बरुपरिभविमुरलिकरम्बित

[–] १. पंक्तिचतुष्टय नास्ति क. प्रतौ । २. गोवि. धृतिधर । ३ ख. पंक्तिरियं नास्ति । ४. गोवि. परिचित ।

सम्वरमुसमृगनिकरकुटुम्बित
सभ्रमवसयितयुवतिविचुम्बित
घोर !

मम्बुजकुटुम्बदुहितु कदम्बसम्बाधद धुरे पुलिने ।
पीताम्बर कुरु केलिं त्वं वीर ! नितम्बिनीघटया ॥

सविरवमितमिन्दीवरम् ।२४।

२६ अथ अवमाम्भोरुहम्बकवृत्तम्

जय रससम्पद् विरचितकम्प
स्मरकृतकम्प प्रियजनशम्प
प्रवणितकम्प-स्फुरदनुकम्प
दृ सिंचितसम्प-स्फुरदवधम्प
श्रितकचगुम्फ श्रुतिपरिलम्ब
स्फुरितकदम्ब स्तुतमुख बिम्ब
प्रिय रविबिम्बो-दयपरिजृम्भो
म्मुखजसदम्भो रुहमुख सम्भो
दृमटमुख सम्बो-दरवरकुम्भो
पमकुचबिम्बो-ष्ट्युवतिचुम्बो-
त्रुट परिरम्भोत्सुक कुरु शं मो
स्तबितवसम्बो-जितमितदम्भो-
घरसुबिडम्बो-वृधुर नतशम्भो
रपिबिसदम्भो -निगरिमसम्भा
वितमुखजृम्भा हितमद सम्पा
कमनसि सम्पादय ममि त पा
किममनुकम्पामवमिह धीर !

विन्ध्ये वध्वधरस्वसुस्तटभवे फुल्लाटवीमण्डले
वल्लीमण्डपभाजि भक्वमविरस्तम्बेरमाडम्बर ।
कुर्वन्नम्बमपुञ्जगञ्जनमति श्यामाङ्गकान्तिश्रिया
लीलापाङ्गतरङ्गितेन तरसा मां कृष्ण सन्तर्पय ।

---

१ गोवि परिचितदम्भो । २ ख वृम्भा; गोवि. कम्भा ।

अम्बुजकिरणविडम्बक खञ्जनपरिचलदम्बक
चुम्बितयुवतिकदम्बक कुन्तलनुठितकदम्बक
वीर !

प्रेमोद्वेल्लितवल्गुभिर्वलयितस्त्वं वल्गनैर्गिरिविभो !
रागोल्लापितवल्लकीविततिभि. कल्याणवल्लीभुवि ।
सोल्लुण्ठ गुरलीकलापरिमल[1] मल्लारमुल्लासयन्,
बाल्येनोल्लसितं दृशौ मम तज्झिल्लीलाभिरुत्फुल्लय ।

सविरुदमिदमरुणाम्भोरुहम् ।२५।

एते कादिपञ्चवर्गोत्थापिता पञ्चचण्डवृत्तस्य महाकलिकारूपस्य सङ्कीर्णा प्रभेदा ।

अथ गर्भिताः

तत्र प्रभेदा —

२६ फुल्लाम्बुजश्चण्डवृत्तम्

षष्ठे भङ्गश्च मैत्री च नयावेव गणौ यदि ।
अन्तस्थस्य तृतीयेन यदि मैत्रीकृता भवेत् ।। २९ ।।

स्वरोपस्थापिता श्लिष्टा रमणीयतरा क्वचित् ।
फुल्लाम्बुज तदुद्दिष्ट चण्डवृत्त सुपण्डितै ।। ३० ।।

[व्या०] कोऽयं ? उच्यते—यदि नयावेव—नगणयगणावेव गणौ स्त । षष्ठे वर्णे भङ्गो मैत्री च यदि अन्तस्थस्य यवर्गस्य तृतीयेन लकारेण कृता भवेत् । सापि क्वचित् स्वरोपस्थापिता श्लिष्टा च स्यात् । तदा एतद्देशादृतमिव नामत फुल्लाम्बुज इति प्रसिद्ध सुपण्डितैश्चण्डवृत्तमुद्दिष्ट—कथितमित्यर्थ । यथा—

व्रजपृथुवल्ली[2]-परिसरवल्ली-
वनभुवि तल्लीगणभृति मल्ली-
मनसिजभल्ली-जितशिवमल्ली-
कुमुदमतल्लीजुषि गत झिल्ली-
परिषदि हल्ली-सकसुखझिल्ली[3]-
रत परिफुल्ली-कृतचलचिल्ली-

---

१ गोवि. कलाभिरमल । २. गोवि पल्ली । ३. गोवि. झल्ली ।

जितरतिमल्लीमद भर घल्ली
ललितक कल्या-तनुघततुल्या
हृदरसकुल्या-पटुतितलल्या
प्रमथन कल्याणचरित धीर ।

गोपी सम्भृतचापल चापलताविभया भ्रुवा भ्रमयन् ।
विलस यशोदावत्सल वत्सलसद्धेनुसवीत ।

¹*वल्लवसखनालीलावसथित
पल्लवरचना मल्लीविलसित
वल्लभकमनालेलासमुदित
तल्लवघटना मीमासकवृत ।

तव चरणाम्बुजमनिश विभावये नन्दगोपाल ।
गोपालनाय वृन्दावनभुवि यद् रेणुरञ्चिता धरणी ।*

सविवर्त फुल्लाम्बुजमिदम् ।२६।

---

१ * *टिप्पणी—अङ्कु तान्तर्गतांशस्य स्थाने निम्नांशो वर्तते मोधिन्यविरुद्धावस्थाम् । परञ्च वृत्तमौक्तिककृता चायमंश पल्लवितत्म्यमवृत्तस्य निबिडतीरघटोदा- हरणक्रमेण स्वीकृत स च २११ पृष्ठेऽवलोकनीयो विद्वद्भि ।

वल्लवलीलासमुदयसमुचित
पल्लवरागाधरपुटविलसित
वल्लभगोपीप्रवहित मुनिगण
दुर्लभकेलीभरमधुरिमकृत
मल्लविहाराद्भुततरणिमकर
फुल्लमृणालीपरिवृतपरिसर
चिल्लिविलासार्पितमणिधमव
मल्लिकलापामलपरिमलपव
रम्भकराजीहरतुममधुरकल
हरमवमालापरिवृतकचकुल
धीर ।

वल्लवललनावल्ली-करपल्लवधीनितस्कन्धम् ।
उल्लसित परिफुल्ल भजाम्यहं हृल्लकदुल्लिम् ॥

२७. अथ चम्पकाऽचण्डवृत्तम्

द्वितीयो मधुरो यत्र श्लिष्ट क्वापि भवेद् यदि ।
भनौ षडक्षर चैतत् स्वेच्छातः पदकल्पनम् ॥ ३१ ॥

चम्पक चण्डवृत्त स्यात्—

[व्या०] अस्यार्थ —'यत्र द्वितीयो वर्णो मधुर –परगवर्णो भवेत् । क्वापि–कुत्रचित् यदि श्लिष्टोपि स्यात् ।' तत्र गणनियममाह—भनौ–भगणनगणौ गणौ भवेताम् । षडक्षर चैतत् पदम् । किञ्च, पदकल्पन स्वेच्छातो यत्र भवति तदेतच्चम्पकं नाम चण्डवृत्त स्यात् । यथा—

सञ्चलदरुण[2]-सुन्दरनयन
कन्दरशयन वल्लवशरण
पल्लवचरण मङ्गलघुमृण-
पिङ्गलमसृण चन्दनरचन
नन्दनवचन खण्डितशकट
दण्डितविकट-गर्वितदनुज
पर्वितमनुज रक्षितधवल
लक्षितगवल पन्नगदलन
सन्नगकलन वन्धुरवलन
सिन्धुरचलन[3] कल्पितसदन[4]-
जल्पितमदन[5] मञ्जुलमुकुट
वञ्जुललकुट-रञ्जितकरभ
गञ्जितशरभ-मण्डलवलित
कुण्डलचलित-सन्दितलपन
नन्दिततपन-कन्यकसुषम
धन्यककुसुम[6]-गर्भक धरण[7]-
दर्भकशरण तर्णकवलित
वर्णकललित श वरवलय
डम्बर कलय
देव !

१-१. ख प्रतौ नास्ति पाठ । २. गोवि. सचलदरुणचञ्चलकरुणसुन्दरनयन । ३. क. वदन । ४. गोवि. मदन । ५ गोवि. सदन । ६. गोवि. वन्यककुसुम । ७ गोवि. विरण ।

दानवभटाशनिने धातृविधिमे जगच्चित्रे ।
हृदयानन्दचरित्रे रतिरास्तां वल्लवीमित्रे ।
रिङ्गत्तुरगभुजङ्ग-तुङ्गगिरिशृङ्ग
मृदङ्गरुतमङ्ग-सङ्गपुतरङ्ग
वीर !

त्वमत्र चण्डासुरमण्डलीनां रण्डावशिष्टानि गृहाणि कृत्वा ।
पूर्णान्यकार्षीर्व्रजसुन्दरीभिर्भ्रान्त्वाटवीपुण्डकमण्डपानि ॥

सविरुदं चण्डकमिदम् ।२७।

२८. अथ बन्धुरसम्बन्धवृत्तम्

—बन्धुर नभसा भवि ।
पञ्चमो मधुरस्तत्र पद मुनिमित मतम् ॥ ३२ ॥

[व्या०] प्रथमतः—यदि नभसा–नगणभगणसगणाः स्युः । किञ्च तत्र पदे पञ्चमो वर्णो मधुरः–सरसवर्णो भवति । पदमपि मुनिभिः–सप्तभिर्वर्णैर्मितं–परिमितं यत्र तत् बन्धुरं–बन्धुरास्यमतिमञ्जुलं बन्धवृत्तं मतं–सम्मतमित्यर्थः । पदकल्पनं तु पूर्ववत् । यथा–

जय जय सुन्दर विहसित मन्दर
विजितपुरन्दर निजगिरिकन्दर
रचिरसधन्धर मणिमुतकन्धर
गुणमणिमन्दिर हृदि वसदिन्दिर
गतिजितसिन्धुर परिजनबन्धु
पशुपतिन दन शिखिकितचन्दन
विविधकृतमन्दन पृथुहृरिचन्दन
परिवृतन दन[1]-मधुरिमनिन्दन
मधुवन वन्दित-कुसुमसुगन्धित
वनवररञ्जित रुचिरभसञ्जित[2]
दिशिशिवकुण्डल-महुदु तमण्डल
नवशितण्डुल-यविरदमण्डल
रतिरणपण्डित वरतनुमण्डित
मरगपमण्डित दरानविगण्डित
वीर !

---

१ पंक्तिरियं नास्ति स० प्रतौ । २ क० मधुरिमनन्दन- । ३ गोवि० रुचिभरसञ्जित ।

निनिन्द निजमिन्दिरा वपुरवेक्ष्य यासां श्रियं,
विचार्य गुणचातुरीमचलजा च लज्जां गता ।
लसत्पशुपनन्दिनीततिभिराभिरानन्दितं,
भवन्तमतिसुन्दरं व्रजकुलेन्द्र वन्दामहे ।

रसपरिपाटी स्फुटतरुवाटी
मनसिजघाटी प्रियनतशाटी[1]-
हर जय वीर !

सम्भ्रान्तैः सषडङ्गपातमभितो वेदैर्मुदा वन्दिता,
सीमन्तोपरि गौरवादुपनिषद्देवीभिरप्यर्पिता ।
आनम्र प्रणयेन च प्रणयतो तुष्टामना[2]विकृतो[3],
मूर्द्धी ते मुरलीरुतिर्मुररिपो शर्माणि निर्मातु नः ।

सविरुदं वञ्जुलमिदम् ।२८।

२९. अथ कुन्दञ्चण्डवृत्तम्

द्वितीयषष्ठौ मधुरौ श्लिष्टौ वा क्वापि तौ यदि ।
स्याताम् भजौ तदा कुन्दम्—

[व्या०] एतदुक्तं भवति । यदि द्वितीयषष्ठौ वर्णौ मधुरौ—परसवर्णौ क्वापि पदे श्लिष्टौ वा, तौ वर्णौ स्याताम् । अथ च भजौ—भगणजगणौ भवत, तदा कुन्दं इति नाम चण्डवृत्तं भवति । षडक्षरमिदं पदम् । पदविन्यासस्तु पूर्ववत् । यथा—

नन्दकुलचन्द्र लुप्तभवतन्द्र
कुन्दजयिदन्त दुष्टकुलहन्त
रिष्टसुवसन्त मिष्टसदुदन्त
सदलितमल्लि-कन्दलितवल्लि-
गुञ्जदलिपुञ्ज-मञ्जुतरकुञ्ज-
लब्धरतिरङ्ग हृद्यजनसङ्ग-
शर्मलसदङ्ग हर्षकृदनङ्ग
मत्तपरपुष्ट-रम्यकलघुष्ट
गन्धभरजुष्ट पुष्पवनतुष्ट
कृत्तखलक्ष[4] युद्धनयदक्ष

---

१. गोवि. प्रियनयशाटी- । २. गोवि हृष्टात्मना । ३. गोवि. भिष्टुता । ४. गोवि. यक्ष ।

धन्युकचपक्ष [यद्वधिक्षिपक्ष] [1]
पिष्टनष्टतृष्ण तिष्ठ हृदि कृष्ण
धीर !
तव कृष्ण केलिमुरली हितमहित च स्फुट विमोहयति ।
एवं सुधोर्मिसुहृदा विषविषमेणापर ध्वनिना ।

सभीसवसेयनिस्तार कल्याणकारुण्यविस्तार
पुष्पेषुकोदण्डटङ्कार विस्फारमञ्जरीभङ्कार
धीर !
रङ्गस्थले ताण्डवमण्डनेन [2] निरस्य मल्लोत्तमपुण्डरीकान ।
कंसद्विप चण्डमखण्डयद् यो हृत्पुण्डरीके स हरिस्तवास्तु ।

सविरुदं कुसुमितम् ।२१।

१० अथ बकुलभासुरचण्डवृत्तम्

—अथो [3] बकुलभासुरम् ॥ ३३ ॥
चतुर्भिस्तुरगै निर्जै पद यमातिसुन्दरम् ।
रसेन्दुमान सात्मान—

[व्या०] अस्यार्थः—अथ-कुसुमानन्तरं बकुलभासुरं इति नामकं चण्डवृत्तं कथ्यत इति शेषः। यत्र चतुर्भिः—चतुःसंख्याकैः निर्जैः—जगणविरहितैः चतुर्भिस्तुरगैः—चतुष्कलैः द्विजगण-कर्ण-गण-[4] समर्वैरेभातिसुन्दरं—अतिरमणीयं रसेन्दुमानं—षोडशमानं पदं भवति। तत्र पदं पदान्तर्गत-षोडश-विषमाक्षरविरामान्तिमं विधेयमित्युपदेशः। किञ्च सोल्लासं—उल्लासनमेव पादान्त परावर्तनं तेन सहितं शृङ्खलाबन्धन्यायेन ग्रथितमित्यर्थः। तदीदृशं बकुलभासुरं चण्डवृत्तं सविरुदं भवतीति वाक्यार्थः। यथा—

जय जय वंशीवादविशारद
शारदसरसीरुहपरिभावक
भावकभिततोषसम्पादन
चारणसिद्धवधूधृतिहारक
हारकलापरुचाभितकुण्डल [5]
कुण्डलसित [6] गोवर्द्धनभूषित
भूषितभूषणविभ्रम [7] विग्रह
विग्रहसम्भितसमवृषभासुर

---

१ [ ] ख. ग. नास्ति पाठः। २ गोधि मण्डनेन। ३ ख. अथ। ४ ख. तपनतनमै-। ५. गोधि रुचाभिनवकुण्डल। ६. गोधि. कुण्डलसत्। ७ गोधि विभूषण-।

भासुरकुटिलकचार्पितचन्द्रक
चन्द्रकदम्ब[1]रुचाभ्यधिकानन
काननकुञ्जगृहस्मरसङ्गर
सङ्गरसोद्‌घुरबाहुभुजङ्गम
जङ्गमनवतापिञ्छनगोपम
गोपमनीषितसिद्धिषु दक्षिण
दक्षिणपाणिगदण्डसभाजित
भाजितकोटिशशाङ्कविरोचन
रोचनया कृतचारुविशेषक
शेषकमलभवसनकसनन्दन-
नन्दनगुण मा नन्दय सुन्दर
[2]सुन्दर मामव भीतिविनाशन[2]
वीर !

भवत प्रतापतरणावुदेतुमिह लोहितायति स्फीते ।
दनुजान्धकारनिकरा. शरण भेजुर्गुहाकुहरम् ॥

पुलिनधृतरङ्ग-युवतिकृतसङ्ग
मदनरसभङ्ग-गरिमलसदङ्ग
धीर !

पशुषु कृपा तव दृष्ट्वा दुष्ट[3]महारिष्टवत्सकेशिमुखा ।
दर्पं विमुच्य भीता पशुभाव भेजिरे दनुजा ॥

सविरुद वकुलभासुरमिदम् ।३०।

३१. अथ वकुलमङ्गलञ्चण्डवृत्तम्

—अन्तो वकुलमङ्गलम् ॥ ३४ ॥

चतुर्भिर्भगणैरेव हयैर्यत्र पद भवेत् ।
रसेन्दुकलक तत्र तृतीये शृङ्खलास्थिता ॥ ३५ ॥

[व्या०] कोऽर्थं ? उच्यते । अन्त –वकुलभासुरानन्तर वकुलमङ्गल–वकुलमङ्गलाख्य चण्डवृत्तमुच्यत इति शेष ॥३४॥

यत्र चतुर्भि –चतु सख्याकै केवलैरादिगुरुकै –भगणैरेव हयै –चतुष्कलै रसेन्दुकलक–षोडशमात्र पद भवेत् । किञ्च, तत्र–तस्मिन्पदे तृतीये अर्थात् तृतीये भगणे शृङ्खलास्थिता चेद्–

---

१ गोवि चन्द्रकलाप- ।　२-२. गोवि. पक्तिरिय नास्ति ।　३ गोवि. नन ।

मल्लुकच्चपक्ष [वडशिखिपक्ष] [1]
पिष्टनततृष्ण तिष्ठ हृदि कृष्ण
धीर !
तव कृष्ण केशिमुरली हितमहित च स्फुटं विमोहयति ।
एवं सुधोर्मिमुदा विपविपमेणापरं ध्वनिना ।
सम्नीतदर्दतेयनिस्तार कल्याणकारुण्यविस्तार
पुष्पेपुकोदण्डटङ्कार-विस्फारमञ्जरीझङ्कार
धीर !
रङ्गस्थस ताण्डवमण्डनेन [2] निरस्य मल्लोत्तमपुण्डरीकान् ।
कंसद्विप चण्डमखण्डयद् यो हृत्पुण्डरीके स हरिस्तवास्तु ।

सवित्थं कुल्यमिदम् ।२१।

१　अथ वकुलभासुरण्डकवृत्तम्

—अथो [3] वकुलभासुरम् ॥ ३२ ॥
चतुर्भिस्तुरगैः मिथैः पद यत्रातिसुन्दरम् ।
रसेन्दुमात्र सोत्साहं—

[व्या०] अस्यार्थः—अथ—कुल्यानन्तरं वकुलभासुरं इति नामकं दण्डकवृत्तं कथ्यते इति शेषः ।
यत्र चतुर्भिः—चतुःसंख्याकैः मिथैः—अन्यव्यवहितैः चतुर्भिस्तुरगैः—चतुष्कलैः द्विजगण-कर्ण-भगण-जगणैरेवातिसुन्दरं—अतिरमणीयं रसेन्दुमात्रं—षोडशमात्रं पदं भवति । तच्च पदं यत्त्वर्नियमं
षोडश-[विसकाव]विमानाविकं विधेयमित्युपदेशः । किञ्च सोत्साहं—उल्लासनमेव उत्साहः
पदावर्तनं तेन सहितं भङ्गलायमाम्नायेन पठितमित्यर्थः । तदीदृशं वकुलभासुरं दण्डवृत्तं
सविस्तरं भवतीति वाक्यार्थः । यथा—

जय जय वंशीवाद्यविशारद
शारदसरसीरुहपरिमादक
मादकमिलितलोचनसञ्चारण
चारणसिद्धवधूधृतिहारक
हारकलापरमाञ्चितकुण्डल [5]
कुण्डलसित [6] गोवर्धनभूषित
भूषितभूषणविस्फुरण [7] विग्रह
विग्रहलम्बितरम्यवृषभासुर

१ [ ] ख. ग. नास्ति पाठः । २ मौक्ति मण्डनेन । ३ ख. अथ । ४ ख. तरलतरमणि- । ५ मौक्ति रमाञ्चितकुण्डल । ६ मौक्ति कुण्डलसत् । ७ मौक्ति विभूषण- ।

३२. अथ मञ्जर्या कोरकश्चण्डवृत्तम्

मञ्जरी चात्र पूर्वं श्लोको लेखस्तदनन्तरम् ।
कोरकाख्य चण्डवृत्त पदसख्यानखैर्यदि ।। ३६ ।।

[व्या०] अस्यार्थः—अभिधीयत इत्यर्थः । प्रथमतो मञ्जरी तत कलिका भवतीति लौकिकाना प्रसिद्धे । तत्र चतुर्भि भगणै. शुद्धैराद्यन्तयमकाङ्कितै कोरकाख्य चण्डवृत्त । यदि पदस्य आद्यन्तयोर्यमकाङ्कितै—यमकेन अङ्कितै सयमकैरिति यावत्, शुद्धैः—शृङ्खलारहितैश्चतुर्भि भगणै—आदिगुरुकैर्गणै पदम् । अथ च पदसख्या यदि नखै—विंशत्या भवति, तदा कोरकाख्य चण्डवृत्त भवति । शृङ्खलाराहित्यमेवात्र पूर्वस्माद् भेद गमयतीति ।।३६।।

तत्र प्रथम मञ्जरी, यथा–

नवशिखिशिखण्डशिखरा[1] प्रसूनकोदण्डचित्रशस्त्रीव ।
क्षोभयति कृष्ण वेणी श्रेणीरेणीदृशा भवत ।।

कोरकम्, यथा–

मानवतीमदहारिविलोचन
दानवसञ्चयघूकविरोचन
डिण्डिमवादिसुरालिसभाजित
चण्डिमशालिभुजार्गलराजित
दीक्षितयौवतचित्तविलोभन-
वीक्षित सुस्मितमार्दवशोभन
पर्वतसम्भृति[2] निर्धुतपीवर-
गर्वतम परिमुग्धशचीवर[3]
रञ्जितमञ्जुपरिस्फुरदम्बर
गञ्जितकेशिपराक्रमडम्बर
कोमलताङ्कितवागवतारक
सोमललाममहोत्सवकारक
हसरथस्तुतिशसितवशक
कसवधूश्रुतिनुन्नवतसक
रङ्गतरङ्गितचारुदृगञ्चल
सङ्गतपञ्चशरोदयचञ्चल
लुञ्चितगोपसुतागणशाटक
सञ्चितरङ्गमहोत्सवनाटक
तारय मामुरुससृतिशातन

१. क शिखण्डिशिखरा. । २. गोवि. पर्वतसघृति- । ३. ख. शशीवर ।

भवति तदा बकुलमङ्गलाभिधानं चण्डवृत्तं सविरुदं भवतीति वाक्यार्थः । सर्वविध्यालापोऽत्रापि पूर्ववदेव । षोडशमात्रमनुप्रयत्न समानं । परं तु चतुर्थभगणपञ्चमनगणस्थाने अन्यगणाभावमेव बकुलमाधुरात् भेदं बोधयतीत्यवधेयं सुधीभिरिति शिवम् ॥१५॥
यथा–

जय जय केशव केशवसंस्तुत
वीर्यविलक्षण लक्षणबोधित
केलिषु नागर नागरमोहन
गोकुलनन्दन नन्दनतिवत
सान्द्रमुवर्णक दर्पकमोहन
हे सुषमासमभामवतीगण
मानमिरासक रासकलाश्रित
सस्तनगौरवगौरवभूवत[1]
कुञ्जवधोचित तावितयौवत
रूपभराधिकराधिकयाचित
भीरुविलम्बित लम्बितशेखर
केलिकलालस[2]लालसलोचन
शोषमवारुणवारुणदामन
मुक्तिसलोकन लोकनमस्कृत
गोपसभाचक भावकधर्मद
हन्त कृपालय पालय मामपि
देव ![3]

पलायन फेनिमपनमतां च बन्धं च भीतिं च मृतिं च कृत्वा ।
पवर्गदातापि शिखण्डमौले त्वं धामभाजामपवर्गदोऽसि ॥
प्रणयभरित मधुरचरित
भजनसहित पशुपमहित
देव !

अनुभूय विक्रम ते युधि सत्वा कोविदीकरणम् ।
हित्वा[4] किम अगवन्द्र प्रपलायांचक्रिरे दनुजाः ।
सविरुदं बकुलमङ्गलमिदम् ।।११।

१ क इत । २ गोवि केलिकुलालस- । ३ गोवि वीर । ४ गोवि चरामर्द ।
५ गोवि विरचा ।

३२. अथ मञ्जर्या कोरकश्चण्डवृत्तम्

मञ्जरी चात्र पूर्वं श्लोको लेखस्तदनन्तरम् ।
कोरकाख्य चण्डवृत्त पदसस्यानखैर्यदि ।। ३६ ।।

[व्या०] अस्यार्थः—अभिधीयत इत्यर्थ. । प्रथमतो मञ्जरी तत कलिका भवतीति लौकिकाना प्रसिद्धे । तत्र चतुर्भि भगणै शुद्धैराद्यन्तयमकाङ्कितै. कोरकाख्य चण्डवृत्त । यदि पदस्य आद्यन्तयोर्यमकाङ्कितैः–यमकेन अङ्कितै. सयमकैरिति यावत्, शुद्धै –शृङ्खलारहितैश्चतुर्भि भगणै –आदिगुरुकैर्गणै पदम् । अथ च पदसंख्या यदि नखै –विंशत्या भवति, तदा कोरकाख्यं चण्डवृत्त भवति । शृङ्खलाराहित्यमेवात्र पूर्वस्माद् भेदं गमयतीति ।।३६।।

तत्र प्रथम मञ्जरी, यथा–

नवशिखिशिखण्डशिखरा[1] प्रसूनकोदण्डचित्रशस्त्रीव ।
क्षोभयति कृष्ण वेणी श्रेणीरेणीदृशा भवत' ।।

कोरकम्, यथा–

मानवतीमदहारिविलोचन
दानवसञ्चयघूकविरोचन
डिण्डिमवादिसुरालिसभाजित
चण्डिमशालिभुजार्गलराजित
दीक्षितयौवतचित्तविलोभन-
वीक्षित सुस्मितमार्दवशोभन
पर्वतसम्भृति[2] निर्धुतपीवर-
गर्वतम परिमुग्धशचीवर[3]
रञ्जितमञ्जुपरिस्फुरदम्बर
गञ्जितकेशिपराक्रमडम्बर
कोमलताङ्कितवागवतारक
सोमललाममहोत्सवकारक
हसरथस्तुतिशसितवशक
कसवधूश्रुतिनुन्नवतसक
रङ्गतरङ्गितचारुदृगञ्चल
सङ्गतपञ्चशरोदयचञ्चल
लुञ्चितगोपसुतागणशाटक
सञ्चितरङ्गमहोत्सवनाटक
तारय मामुरुससृतिशातन

१. क शिखण्डिशिखरा. । २. गोवि. पर्वतसघृति- । ३. ख. शशीवर ।

धारय लोचनमम सनातन
धीर ।

सुरगदनुसुताकुम्भभेदे दधान
कुलिशघटितटङ्काद्भटविस्फूर्जितानि ।
सगुरुविकटदंष्ट्रो मु(मृ)ष्टकेयूरमुद्र
प्रथयतु पटुतां वः केशवो वामबाहुः ।
माधव विस्फुर दानवनिष्ठुर
यौवतरञ्जित सौरभसञ्चित
धीर ।

पतितकरणी दया प्रभो मुहुरन्धकरणी च मां गता ।
सुमङ्गकरणी कृपा शुभैर्न तवाद्य करणी च मय्यभूत् ॥

सचित्रः कोरकोऽयम् ॥११॥

११ अथ गुच्छकवृत्तम्

नसौ भमौ जसौ क्रमात् प्रयोजितौ बुधा यदा ।
तदा तु षण्डवृत्तकं विभावयन्तु गुच्छकम् ॥ ३७ ॥

[व्या०] अयमर्थः—हे बुधाः ! यदा नसौ-नगणसगणौ अथ च भमौ-भगणमगणौ ततश्च जसौ-जगणसगणौ क्रमात्-प्रतिपदं प्रयोजितौ भवतः, तदा तु गुच्छकं नाम षण्डवृत्तं विभावयन्तु-कुर्वन्तु । अत्रोऽभवत्र स्वार्थे कः ॥३७॥ किञ्च—

षोडशात्र पदं भात्र पदान्यपि च षोडश ।
सानुप्रासानि यमकैरङ्कितानि च गुच्छके ॥ ३८ ॥

[व्या०] सुगमम् । यथा—

जय जलदमण्डमीढ्युतिनिवहसुन्दर
स्फुरदमलकौमुदीमृदुहसितचन्द्र
भ्रमहरिणलोचनावदनशशिचुम्बक
प्रचलतर खञ्जनद्युतिविमलचम्पक
स्मरसमररङ्गपूरीनिचयवरपण्डित
प्रणयधुराभिकापटिमभरमण्डित
वनजवनसुमनंशिका हृतपशुपयौवत
स्थिरसमररङ्गपूरीकुसमरमितदैवत

---

१ योधि मधुरतर । २ क. वीथिका ।

ग्रथितशिखिचन्द्रकस्फुटकुटिलकुन्तल
श्रवणतट[1]सञ्चरन्मणिमकरकुण्डल
प्रथित तव[2] ताण्डवप्रकटगतिमण्डल
द्विजकिरणधोरणीविजितसिततण्डुल
स्फुरित तव दाडिमीकुसुमयुतकर्णक[3]
छदनवरकाकलीहृतचटुलतर्णक
[4]प्रकटमिह मामके हृदि वससि माधव
स्फुरसि ननु सतत सकलदिशि मामव[4]
वीर !

पुनागस्तवकनिबद्धकेशजूट,
कोटीरीकृतवरकेकिपक्षकूट ।
पायान्मा मरकतमेदुर स तन्वा,
कालिन्दीतटविपिनप्रसूनधन्वा ।[5]
गर्गप्रिय जय भर्गस्तुत रस
सर्गस्थिरनिज-वर्गप्रवणित
वीर !

दनुजवधूवैधव्यव्रतदीक्षाशिक्षणाचार्य ।
स जयति विदूरपाती मुकुन्द तव शृङ्गनिर्घोष ।
सविरुद गुच्छाख्य चण्डवृत्तम् ।३३।

३४. अथ कुसुमञ्चण्डवृत्तम्

चतुर्भिर्नगणैर्यत्र पद यमकित भवेत् ।
अनन्तनेत्रप्रमित कुसुम तत्प्रकीर्तितम् ।। ३९ ।।

[व्या०] अनन्त–शून्य नेत्र–द्वय ताभ्यां प्रमित–गणित पद यत्र तत्, विंशतिपदमित्यर्थः । शेष सुगमम् ।।३९।।

यथा–

कुसुमनिकरनिचितचिकुर[6]
नखरविजितमणिजमुकुर
सुभटपटिमरमितमथुर
विकटसमरनटनचतुर

---

१. गोवि. श्रवणनट- । २ गोवि. प्रथितनव- । ३. गोवि स्फुरितवरदाडिमीकुसुमयुग-कर्णक । ४-४ गोवि. पक्तिद्वय नास्ति । ५. क नत्वा । ६. गोवि. रचितचिकुर ।

समवभुजगदमनचरण
निखिलपशुपनिचयशरण[1]
[2]भ्रमसकमलविशदचरण
सकलदनुजविलयकरण[2]
मुदितमविरमधुरनयन
शिखरिकुहररचितशयन
रमितपशुपयुवतिपटल
मदनकलहभटनचटुल
विषमदमुजनिवहमथन
भुवनरसदविशदकथन
कुमुदमृदुलविमलदमल
हसितमधुरवदनकमल
मधुपसदृशविचलदलक
मसृणभुसृणकलिततिलक
मिमृतमुदितमथितकलश
सततमशिव ममसि विलस
धीर !

सखि! चातकजीवातुर्मधिव मुरवैरिकिमण्डलोल्लासि ।
तव दैत्यहंसमयद गुञ्जाम्बुग्गर्जितं जयति ॥

पुरुषोत्तम वीरव्रत यमुनाद्भुततीररसिपत
मुरलिध्वनिपूरम्य सरभीव्रजनादप्रिय !
धीर !

जगतीमभावसम्भा स तव जयत्यम्बुयादा दो स्तम्भ ।
रमगाद्विभेद दनुजान् प्रतापमहरियतोऽम्भुदित ॥

ललितं कुसुमितम् ॥१४॥

एते महाकलिकाव्यस्य षण्ठ्यतम नवमिमता[3] प्रभेदाः । इत्येवं चतुर्दि गति १४ प्रभेदाः ।

इति श्रीवृत्तमौक्तिके विरुदावल्यां महाकलिकाख्यपुरुषोत्तमादिकृष्णानां
ललितवचनावरं बन्धवृत्तप्रकरणं द्वितीयम् ॥२॥

---

१ क. चरण । २ २ नौयं पंक्तिद्वयं नास्ति । ३ क नवतिमिता । ४ ४ पंक्तिर्नास्ति क प्रतौ ।

[विरुदावल्या तृतीय त्रिभङ्गी-कलिकाप्रकरणम्]

१. अथ दण्डकत्रिभङ्गी कलिका

अथ त्रिभङ्गीकलिकासु दण्डकत्रिभङ्गीकलिकागर्भित तद्गतैव[1] लक्ष्यते । तद्भङ्गाना[2] वाहुल्यादेवास्या कलिकाया दण्डकत्रिभङ्गीति सज्ञा ।

अथाऽस्या लक्षण सम्यक् सोदाहरणमुच्यते ।
भङ्गवाहुल्यतश्चास्या सज्ञाप्यान्वर्थिका[3] भवेत् ॥१॥

यथा–

नगणयुगलादनन्तरमिह चेद् रगणा भवन्ति रन्ध्रमिता ।
विरुदावल्या कलिका कथितेय दण्डकत्रिभङ्गीति ॥ २ ॥

[व्या०] रन्ध्राणि–नव कथिता इत्यत्र तदित्यध्याहार । भङ्गवहुत्वाच्चास्या दण्डक-त्रिभङ्गी सज्ञेति फलितोऽर्थ । अत्र च पदरचनाया पदविन्यास स्वेच्छया भवतीति सिंहाव-लोकनरीत्यावगन्तव्यम् । यथा–

चित्र मुरारे सुरवैरिपक्ष-
स्त्वया समन्तादनुवद्धयुद्ध ।
अमित्रमुच्चैरविभिद्य भेद,
मित्रस्य कुर्वन्नमित[4] प्रयाति ॥

श्रितमघजलधेर्वहित्र चरित्र सुचित्र विचित्र
फणित्र समित्र पवित्र लवित्र रुजाम् ।
जगदपरिमितप्रतिष्ठ पटिष्ठ बलिष्ठ गरिष्ठ
[5]अदिष्ठ सुनिष्ठ लघिष्ठ दविष्ठ[5] धियाम् ।
निखिलविलसितेऽभिराम सराम मुदा मञ्जुदाम-
न्नभाम ललाम धृतामन्दधाम नये ।
मधुमथनहरे मुरारे पुरारेरपारे ससारे
विहारे सुरारेरुदारे च दारे प्रभुम् ।
स्फुरितमिनसुतातरङ्गे विहङ्गेशरङ्गेण गङ्गे-
ऽष्टभङ्गे भुजङ्गेन्द्रसङ्गे सदङ्गेन भो ।

---

१. ख. अन्तर्गतैव । २. क. तद्भानां । ३. ख. सज्ञाप्यान्वर्थिकी । ४. गोवि. कुर्वन्नमृत । ५-५ गोवि. वरिष्ठ अदिष्ठ सुनिष्ठ वविष्ठं ।

धिसरिधरवरीमिदान्त प्रयान्तं सकान्तं विभान्तं
निसान्तं च कान्त प्रशान्तं इतान्तं द्विपाम् ।
दनुजहर मज्जाम्बनन्त मुदन्त नुदन्तं दुरन्त
हसन्त 'भजन्त चरन्त' भवन्तं सदा ।
वीर !

पीत्वा बिन्दुकणं मुकुन्द भवत सौन्दर्यसिन्धो सकृत्
कन्दर्पस्य वशं गता विमुमुहु के वा न साध्वीगणा ।
दूरे राज्यमयन्त्रितस्मितकथा भ्रूवल्लरीताण्डव
क्रीडापाङ्गतरङ्गितप्रभृतय कुर्वन्तु ते विभ्रमा ॥

धारतट रासमट
गोपभट पीतपट
पद्मकर दैत्यहर
कुन्दधर धीरधर
नर्ममय कृष्ण जय
नाथ !

संसाराम्भसि दुस्तरोमिगहने गम्भीरतापत्रयी
कुम्भीरेण गृहीतमुग्रपतिना क्रोशन्तमन्तर्भयात् ।
वीप्रेणाद्य सुदर्शनेन विधुरक्लान्तिच्छिदाकारिणा
चित्तासन्ततिरक्षमुद्धर हरे मच्चित्तवन्तीश्वरम् ।

इति सचित्रा चण्डवृत्तत्रिभङ्गी कलिका ।१।

२ अथ सम्पूर्णा विदग्धत्रिभङ्गी कलिका

अथापरा सम्पूर्णा विदग्धत्रिभङ्गी कलिका लक्ष्यते । यथा–

युग्मे भङ्गस्तनौ च्युतौ भौ चान्ते यत्र मिश्रितौ ।
वसुसस्य परे ह्यत्र[3] पदे सा स्यात् त्रिभङ्गिका ॥ ३ ॥
विदग्धपूर्वा सम्पूर्णा कलिकाऽतिमनोहरा ।
धाधाम्धाधी पद्यपुक्ता—

[व्या] एतद् युक्तं भवति । यत्र पदे–यस्यां कलिकायां वा युग्मे–द्वितीयाक्षरे भङ्गो भवति । तथा तनौ–तगणनगणौ स्त । तौ च च्युतौ–चारगणयुक्तौ चेत् । चान्ते–तथा भयान्ते मिश्रितौ–

१ पोथि वसन्तं भवन्तं । २ पोथि मलिका । ३ ख भवेद् यत्र । ४ ख तगणयान्ते ।

सलग्नौ भौ–भगणौ च यदि स्त । यत्र चैवविध वसुसख्य पद भवेत्, सा विदग्धपूर्वा–विदग्ध-शब्दपूर्वा सम्पूर्णा प्रथमलक्षितलक्षणविलक्षणा अतिमनोहरा विदग्धत्रिभङ्गीकलिका स्यात् इत्यन्वय । अष्टपदत्वमेव पूर्वोक्ताया सकाशात् वैलक्षण्यं स्फुटमेव लक्षयति । एतदेव चास्या सम्पूर्णत्वमिति । किञ्च, आद्यन्तयो कलिकाया इति शेष, आशी पद्ययुक्ता–आशी पद्याभ्या युक्ता आशीर्वादयुक्तपद्याभ्या सयुक्ता इत्यर्थ । आद्यन्तपदसाहित्य च तत्कलिकायुक्तेषु पूर्वोक्तेषु सर्वेषु चण्डवृत्तेषु ज्ञेय सुधीभिरित्युपदेशरहस्य, अग्रेपि तथैव वक्ष्यमाणत्वादिति । इयमेव च खण्डावलीति व्यपदिश्यते, तथा चाग्रे तथैव लक्षयिष्यमाणत्वादिति । यथा–

उद्वेलत्कुलजाभिमानविकचाम्भोजालिशुभ्राशव[1]
केलीकोपकषायिताक्षिललनामालाद्रिदम्भोलयः ।
कन्दर्पज्वरपीडितव्रजवधूसन्दोहजीवातवो,
जीयासुर्भवतश्चिर यदुपते स्वच्छा कटाक्षच्छटा ॥[2]

चण्डीप्रियनत चण्डीकृतवलरण्डीकृतखलवल्लभ वल्लव
पट्टाम्वरधर भट्टारक वककुट्टाक ललितपण्डितमण्डित
नन्दीश्वरपति-नन्दीहितभर सदीपितरससागर नागर
अङ्गीकृतनवसङ्गीतक वर-भङ्गीलवहृतजङ्गमलङ्गिम
गोत्राहितकर गोत्राहितदय गोत्राधिपधृतिशोभनलोभन
वन्यास्थितवहुकन्यापटहर धन्याशयमणिचोर मनोरम
शम्पारुचिपट सम्पालितभव-कम्पाकुलजन फुल्ल समुल्लस
उर्वीप्रियकर खर्वीकृतखल दर्वीकरपतिगर्वितपर्वत
वीर !

पिष्ट्वा सङ्ग्रामपट्टे पटलमकुटिले[3] दैत्यगोकण्टकाना,
क्रीडालोठीविघट्टे स्फुटमरतिकर नैचिकीचारकाणाम्[4] ।
वृन्दारण्य चकारखिलजगदगदङ्कारकारुण्यकारो[5],
य सञ्चारोचित व सुखयतु स पट्टु कुञ्जपट्टाधिराज ।

पिच्छलसद्घननीलकेश
चन्दनचर्चितचारुवेश
खण्डितदुर्जनभूरिमाय,
मण्डितनिर्मलहारिकाय ।
वीर !

---

१. क शुभ्राशन । २. गोवि पद्यं नास्ति । ३ क पटलमकुलिते । ४ गोवि चारुकाणाम् । ५ गोवि कारुण्यधार ।

गीर्वाणं स्फुटमखिलं विवर्द्धयन्तं,
निर्वाणं दनुजघटासु संघटय्य ।
कुर्वाणं व्रजनिलय निरन्तरोद्यत्
पर्वाणं मुरमथन स्तुवे भवन्तम् ॥

द्वितीया सम्पूर्णा सविरुदा विदग्धत्रिभङ्गी कलिका ।२।

एते चण्डवृत्तस्य गर्भितान्तर्गताः प्रभेदाः ।

अथ मिश्रिता

तत्र—

१ मिश्रकलिका

—*मिश्रिता चाथ कथ्यते ॥ ४ ॥*

आद्यन्ताशीःपद्ययुक्ता पद्याभ्यां चापि संयुता ।
मध्यतः कलिका कार्या सवर्णैर्भनजैर्गणैः ॥ ५ ॥
विरुदेनान्विता चापि रमणीयतरा मता ।
षट्पदा सापि विज्ञेया छन्दःशास्त्रविशारदैः ॥ ६ ॥

[व्या०] अस्यार्थः—अथ-विदग्धत्रिभङ्गीकलिकानन्तरं मिश्रिता मिश्रकलिका कथ्यते-उच्यत इत्यर्थः । तां विविनक्ति—कलिकाया आद्यन्तयोराशीःपद्याभ्यां युक्ता तथा आद्यन्तयोरेव पद्याभ्यां च संयुता मध्यतस्तयोरित्यर्थः, कलिका कार्या । कलिकां विविनक्ति तवर्गं सप्तमो लघुः[1] तत्सहितैः भगणैः—भभभनभभभभभरन्विता संयुक्ता इत्यर्थः ॥४-५॥

तथा विरुदेन चाप्यन्विता । अतएवातिरमणीयतरा मता—सम्मता । साऽपि च छन्दःशास्त्रविशारदैः षट्पदा विज्ञेया इत्युपदिश्यत इति वाक्यार्थः । विरुदसाहित्यं च विदग्धत्रिभङ्गीकलिकालक्षणकारिकायामप्यवधेयं सुधीभिरिति शिवम् ॥६॥

अत्र चादौ आशीःपद्यं ततो पद्यं ततश्च षट्पदीकलिका तदनन्तरमपि पद्यं तदा विरुदं तदनन्तरमपि पद्यमेव । ततोऽपि विरुदं वीरं सम्बोधनोपलक्षितं तदन्ते चाशीःपद्यम्, इति क्रमेणोक्तलक्षणोपलक्षिता मिश्रा कलिका कार्या इति फलितोऽर्थः ।

यथा—

उदञ्चदतिमञ्जुलस्मितसुधोर्मिभीसास्पद
तरङ्गितवराङ्गनास्फुरदनङ्गरङ्गाम्बुधे ।
दृगिन्दुमणिमण्डलीद्रवितनिर्झरस्यन्दनो
मुकुन्द मुखचन्द्रमास्तव तनोतु धर्म्मांशुकम् ।[2]

---

१ क सप्तमः । २ श्रीपि तनोति धर्माणि न ।

दुष्टदुर्दमारिष्टकण्ठीरवकण्ठविखण्डनखेलदष्टापद नवीनाष्टापदविस्पर्द्धिपदाम्बरपरीत गरिष्ठगण्डशैलसपिण्डवक्ष पट्ट पाटव—

दण्डितचटुलभुजङ्गम
कन्दुकविलसितलङ्घिम
भण्डिल[1] विचकिल[2] मण्डित
सङ्गरविहरणपण्डित
दन्तुरदनुजविडम्बक
कुण्ठितकुटिलकदम्बक ।

खचिताखण्डलोपलविराजदण्डजराजमणिम[य][3] कुण्डलमण्डितमञ्जुलगण्डस्थलविशङ्कटभाण्डीरतटीताण्डवकलारञ्जितसुहृन्मण्डल

नन्दविचुम्बित-कुन्दनिभस्मित
गन्धकरम्बित शन्दविवेष्टित
तुन्दपरिस्फुर-दण्डकडम्बर ।

[4]दुर्जनभोजेन्द्रकण्टककण्ठकन्दोद्धरणो[4]द्दामकुद्दाल विनम्रविपद्दारुणध्वान्तविद्रावणमार्तण्डोपमकृपाकटाक्ष शारदचन्द्र[5]मरीचिमाधुर्यविडम्बितुण्डमण्डल

लोष्ठीकृतमणि-कोष्ठीकुलमु[नि-
गोष्ठीश्वर मधुरोष्ठीप्रिय पर-
मेष्ठी][6]डित परमेष्ठीकृतनर
धीर ।

उपहितपशुपालीनेत्रसारङ्गतुष्टि,
प्रसरदमृतधाराधोरणीधौतविश्वा ।
पिहितरविसुधांशु प्रांशुतापिञ्छरम्या,
रमयतु वकहन्तु[7] कान्तिकादम्बिनी व ।

इति मिश्रकलिका ।३।

अथ चण्डवृत्तस्य मिश्रित प्रभेद । एवमन्येपि ।

इति विरुदावल्यां चण्डवृत्तमेव दण्डकत्रिभङ्गयाद्यवान्तर-
त्रिभङ्गीकलिका प्रकरण तृतीयम् ।३।

इति श्रीवृत्तमौक्तिके वार्त्तिके सलक्षण चण्डवृत्तप्रकरण समाप्तम् ।१।

---

१. ख तण्डिल । २ क विचकित । ३ गोवि मणिम[य]नास्ति । ४ गोवि दुर्जनभोजेन्द्रकटककदम्बोद्धरणो । ५. गोवि. शारदाचण्ड- । ६ [-] कोष्टगतोंशो नास्ति क प्रतौ । ७ क. ख. वहकंतु ।

गीर्वाण स्फुटमखिलं विवर्द्धयन्त
निर्वाम दनुजघटासु सघटम्य।
कुर्वाण प्रणमिलय निरन्तरोद्यत्
पर्वाणं मुरमथन स्तुवे भवन्तम् ॥

द्वितीया सम्पूर्णा सविरुदा विरुदपविभङ्गी कलिका ।२।

एते चण्डवृत्तस्य गर्भितान्तर्गता प्रभेदा ।

अथ मिश्रिता

तत्र–

१ मिश्रकलिका

—मिश्रिता चाथ कथ्यते ॥ ४ ॥
आद्यन्तयोः पद्ययुक्ता पद्याभ्यां चापि संयुता।
मध्यतः कलिका कार्या सदण्डकर्मनजैर्गणैः ॥ ५ ॥
विरुदेनान्विता चापि रमणीयतरा मता।
षट्पदा सापि विज्ञेया छन्दःशास्त्रविशारदैः ॥ ६ ॥

[व्या.] अस्यार्थः—अथ-विरुदपविभङ्गीकलिकानन्तरं मिश्रिता मिश्रकलिका कथ्यते-उच्यत इत्यर्थः। तां विशिनष्टि—कलिकाया आद्यन्तयोरार्या पद्याभ्यां युक्ता तथा आद्यन्तयोरेव पद्याभ्यां च संयुता मध्यतस्तयोरित्यर्थः, कलिका कार्या। कलिकां विशिनष्टि तत्र दण्डो लघु[1] तासद्विते भगणे-नगणनगणभगणैरन्विता संयुक्ता इत्यर्थः ॥४-५॥

तथा विरुदेन चाप्यन्विता। अतएवातिरमणीयतरा मता-सम्मता। साऽपि च छन्दःशास्त्रविशारदैः षट्पदा विज्ञेया इत्युपदिश्यत इति वाक्यार्थः। विरुदसाहित्यं च विरुदविभङ्गीकलिकालक्षणकारिकाव्याख्यानवदेव सुधीभिरिति शिवम् ॥६॥

अत्र चादौ आर्याचरणं ततो मध्यं ततश्च षट्पदीकलिका तदनन्तरमपि पद्यं ततो विरुदं अनन्तरमपि पद्यमेव। ततोऽपि विरुदं वीरं सम्बोधनोपलक्षितं सर्वान्ते चार्या पद्यम् इति च मेलनोपलक्षणोपलक्षिता मिश्रा कलिका कार्या इति कलितोऽर्थः।

यथा–

उदञ्चदतिमञ्जुलस्मितसुधोर्मिलीलास्पद
तरङ्गितवराङ्गनास्फुरदनङ्गरङ्गाम्बुधे।
दृगिन्दुमणिमण्डलीसलिलनिर्झरस्यन्दनो
मुकुन्द मुरबन्धमारतव तनोतु शर्मांशुमम्।[2]

---

१ ख लघ्व। २ चौखं. तनोति शर्माणि मे।

दुष्टदुर्दमारिष्टकण्ठीरवकण्ठविखण्डनखेलदष्टापद नवीनाष्टापदविस्पर्द्धिपदाम्बरपरीत गरिष्ठगण्डशैलसपिण्डवक्ष पट्ट पाटव—

दण्डितचटुलभुजङ्गम
कन्दुकविलसितलङ्घिम
भण्डिल[1] विचकिल[2] मण्डित
सङ्गरविहरणपण्डित
दन्तुरदनुजविडम्बक
कुण्ठितकुटिलकदम्बक।

खचिताखण्डलोपलविराजदण्डजराजमणिम[य][3] कुण्डलमण्डितमञ्जुलगण्डस्थलविशङ्कटभाण्डीरतटीताण्डवकलारञ्जितसुहृन्मण्डल

नन्दविचुम्बित-कुन्दनिभस्मित
गन्धकरम्बित शन्दविवेष्टित
तुन्दपरिस्फुर-दण्डकडम्बर।

[4]दुर्जनभोजेन्द्रकण्टककण्ठकन्दोद्धरणो[4]द्दामकुद्दाल विनम्रविपद्दारुणध्वान्तविद्रावणमार्तण्डोपमकृपाकटाक्ष शारदचन्द्र[5]मरीचिमाधुर्यविडम्बितुण्डमण्डल

लोष्ठीकृतमणि-कोष्ठीकुलमु[नि-
गोष्ठीश्वर मधुरोष्ठीप्रिय पर-
मेष्ठी][6]डित परमेष्ठीकृतनर
धीर।

उपहितपशुपालीनेत्रसारङ्गतुष्टि,
प्रसरदमृतधाराधोरणीधौतविश्वा।
पिहितरविसुधांशु प्रांशुतापिञ्छरम्या,
रमयतु बकहन्तु[7] कान्तिकादम्बिनी व।

इति मिश्रकलिका।३।

अथ चण्डवृत्तस्य मिश्रित प्रभेद। एवमन्येपि।

इति विरुदावल्यां चण्डवृत्तमेव दण्डकत्रिभङ्ग्याद्यवान्तर-
त्रिभङ्गीकलिका प्रकरण तृतीयम्।३।

इति श्रीवृत्तमौक्तिके वार्त्तिके सलक्षण चण्डवृत्तप्रकरणं समाप्तम्।१।

---

१. ख तण्डिल। २ क. विचकित। ३ गोवि मणिम[य]नास्ति। ४ गोवि दुर्जनभोजेन्द्रकटककदम्बोद्धरणो। ५. गोवि. शारदाचण्ड-। ६ [-] कोष्टगतोंशो नास्ति क प्रतौ। ७ क्र. ख वहकतु।

[विरुदावल्यां साधारणमतं चण्डवृत्तं चतुर्थप्रकरणम्]

अथ साधारणं चण्डवृत्तम्

तत्र–

स्वेच्छया तु कलान्यासः साधारणमिदं मतम् ।
न च सप्तदशादूर्ध्वं न वर्णत्रितयादधः ॥ १ ॥
क्रियते यैर्गणैराद्यास्तैरेव सकला कला ।
प्रस्वादिवर्णसंयोगेऽप्यत्र चणस्य लाघवम् ॥ २ ॥

[व्या०] अस्यार्थः —स्वेच्छया इत्यादि सुगमम् । तत्राक्षरनियममाह—न चेति । न च सप्तदशवर्णादूर्ध्वं न वा वर्णत्रितयादधः कला कार्या इति शेषः । किञ्च नियमान्तरमाह—क्रियत इति । आद्यात्-आदौ यैरेव गणैः कलाप्रारम्भः क्रियते तैरेव सकला अपेक्षिताः कला कर्तव्या इति शेषः । अपि च 'प्रस्वादीति' प्रस्वेति आदिशब्देन-ह्र-प्र-स्फु-स्मि-स्म-ह्वेत्यादीनां संयुक्तानां वर्णानां संयोगेऽपि सति अत्र चण्डवृत्तारम्भे तत्प्रकरणस्थले वा पूर्वपूर्ववर्णस्य लाघवं-लघुत्वं भवनमवश्यमित्युत्सर्गः ।

तत्र प्रकारे यथा–

भङ्गुण रिङ्गुण ।

इत्यादि । संयुक्ते यथा–

प्रणयप्रवण ।

इत्यादि । एवं गणान्तरेऽपि बोद्धव्यम् ।

चतुर्वर्णे सर्वलघौ यथा–

विधुमुख हृतमुख ।

इत्यादि । एवं प्रस्तारान्तरेऽपि सर्वसम्भावितस्थले स्वेच्छातः कलान्यासोऽवगन्तव्यः ।

मात्रावृत्ते यथा–

चतुष्कलद्वयेनापि कला जगणवर्जिता ।

[व्या०] कर्तव्या इति शेषः । यथा—

तारापतिमुख सारायितमुख ।

इत्यादि ।

प्रस्तारद्वितयेऽप्येवं कलान्यासः स्वतः स्मृतः ॥३॥

[व्या०] स्वतः–स्वेच्छातो भवतीति स्मृत इत्यर्थः ॥३॥

साधारणमतं चैतद् दिङ्मात्रमिह दर्शितम् ।
विशेषस्तत्र तत्रापि बोध्यो विस्तारशङ्कया ॥ ४ ॥

[व्या०] तत्र तत्रापीति–तत्तत्प्रस्तारेषु इत्यर्थः ॥४॥

इति विरुदावल्यामवान्तरं साधारणमतं चण्डवृत्त-प्रकरणं चतुर्थम् ॥४॥

१ अथ साप्तविभक्तिकी कलिका

स्तुतिर्विधीयते विष्णो, सप्तभिस्तु विभक्तिभि ।
यत्र सा कलिका सद्भिर्ज्ञेया साप्तविभक्तिकी ॥ १ ॥
अथोच्यते विभक्तीना लक्षण कविसम्मतम् ।
तत्तद्गणोपनिहित यथाशास्त्रमतिस्फुटम् ॥ २ ॥
भसौ तु घटितौ यत्र प्रथमा सा प्रकीर्तिता ।
नयाभ्या तु द्वितीया स्यात् तृतीया ननसा लघु ॥ ३ ॥
त्रिभिस्तैस्तु चतुर्थी स्यात् यत्र यौ पञ्चमी तु सा ।
ताभ्या तु षष्ठी विज्ञेया यत्र सौ सप्तमी तु सा ॥ ४ ॥
विहाय प्रथमा ज्ञेया सर्वा साधारणे मते ।
स्थितास्तु गणसाम्येन स्वेच्छयैव यत.[1] कला ॥ ५ ॥
उदाहरणमेतासा क्रमतो वृत्तमौक्तिके ।
कथ्यते कविसन्तोषहेतवे* हरिकीर्त्तनै ॥ ६ ॥

[व्या०] सुलभार्थास्तु कारिका इति न व्याख्यायन्ते । क्रमेणोदाहरणानि, यथा–

य स्थिरकरुण-स्तर्जितवरुणः ।
तर्पितजनक सम्मदजनक ॥ १ ॥
प्रणतविमाय जगुरनपायम् ।
घनरुचिकाय सुकृतिजना यम् ॥ २ ॥
सुजनकलितकथनेन प्रबलदनुजमथनेन ।
प्रणयिषु रतमभयेन प्रकटरतिषु किल येन ॥ ३ ॥
यस्मै परिध्वस्तदुष्टाय चक्रु स्पृहा माल्यदुष्टाय[2] ।
दिव्या स्त्रिय केलितुष्टाय कन्दर्परङ्गेण पुष्टाय ॥ ४ ॥
धृतोत्साहपूराद् द्युतिक्षिप्तसूरात् ।
यतोऽरिर्विदूराद् भय प्राप शूरात् ॥ ५ ॥
यस्योज्वलाङ्गस्य सञ्चार्यपाङ्गस्य ।
वेणुर्ललामस्य हस्तेऽभिरामस्य ॥ ६ ॥
स्मितविस्फुरिते-ऽजनि यत्र हिते ।
रतिरुल्लसिते सदृशा ललिते ॥ ७ ॥

इति सप्तविभक्तय ।*

- चिह्नान्तर्गतोयमशो नास्ति ख. प्रतौ । १. ख यता । २. गोवि. जुष्टाय ।

*अथ सम्बुद्धिः

तगौ [गु] घटितौ यत्र तत्सम्बोधनमीरितम् ।
एवं सम्बोधनान्तेयं विभक्तिः सप्तकीर्तिता ॥ ७ ॥

यथा–

स त्वं जय ! जय ! दुष्टप्रतिभय !
मकस्मितदय[1] ! मुप्तप्रणभय ! ॥ ८ ॥
धीर !
मित्रकुलोदित नर्मसुमोदित
रञ्जितराधिक धर्म्मभराधिक ।

विरुदमित्थम्—

धीर !
हंसोत्तमामिमपिता सेवकजनक्षेपु वर्धितोत्सेका ।
मुरजयिन कल्याणी करुणाकल्लोलिनी जयति ।

इति साप्तविभक्तिकी कलिका ।१।

२ अथ अक्षमयी कलिका

अकारादि-क्षकारान्त-मातृकारूपधारिणी ।
विष्णो स्तुतिपरा सेयं कलिकाऽक्षमयी मता ॥ ८ ॥
यत्र स्युस्तु[*]रगाः सर्वे गणा जगणवर्जिताः ।
मातृकावर्णघटिता क्रमात् भगवत स्तुतौ ॥ ६ ॥

[व्या०] अस्यार्थः— यत्राक्षमयी भगवत स्तुतौ सर्वे तुरगाः—चतुष्कला कर्ण-द्वितपत-भगण-सगणाः, जगणवर्जिता गणाः क्रमात् मातृकावर्णेषु यथायथं घटिताश्चेत् स्युस्तदा पूर्वोक्तविशेषण-विशिष्टा सैवं प्रक्षमयी कलिका मता-सम्मता इति पूर्वश्लोकेन सम्बन्धः । मात्रावृत्ते तु 'चतुष्कल-द्वयेनापि कलाजगणवर्जिताः' इत्यत्रैव उक्तत्वात् अक्षमयीमात्रावृत्तमेवेति पुस्तिकाः समुल्लसाम । सर्वत्र च मात्रावृत्तेष्वेव जगणस्य हेयत्वेन निर्देशाच्च । यथा–

मधुरेश ! माधुरीमय माधव मुरलीमतस्मिकामुग्ध ।
मम मदनमोहन मुधा मर्दय ममसो महामोहम् ॥
अच्युत जय जय आर्तकृपामय ।
इन्द्रमखार्दन ईतिविघातन ॥ १ ॥
उज्ज्वलविभ्रम ऊर्जितविक्रम ।
ऋद्धिपुरोधपुर ऋमुदयापर ॥ २ ॥

---

१ गोवि. भक्तस्मितदय । २ गोवि. पुरोधर । * *चिह्नगतोंऽशो नास्ति ख प्रतौ ।

लृदियकृपेक्षित लॄवदलक्षित ।
एधितवल्लव ऐन्दवकुलभव ॥ ३ ॥
ओज स्फूर्जित औग्र्यविवर्जित ।
असविशङ्कट अष्टापदपट ॥ ४ ॥

इति षोडशस्वरादय ।

अथ कादय पञ्चवर्गा.

कङ्कणयुतकर खण्डितखलवर[1] ।
गतिजितकुञ्जर घनघुसृणाकर[2] ॥ ५ ॥
ङुतमुरलीरत चलचिल्लीलत ।
छलितसतीशत जलजोद्भवनत[3] ॥ ६ ॥
झपवरकुण्डल ञोङ्गयितदल ।
टङ्कितभूधर ठसमाननवर[4] ॥ ७ ॥
डमरघटाहर ढक्कितकरतल ।
णवरधृताचल तरलविलोचन ॥ ८ ॥
थूत्कृतखञ्जन दनुजविमर्द्दन ।
धवलावर्द्धन नन्दसुखास्पद ॥ ९ ॥
पङ्कजसमपद फणिनुतिमोदित ।
बन्धुविनोदित भङ्गुरितालक ॥ १० ॥
मञ्जुलमालक—

इति कादिपञ्चवर्गा ।

अथ यादय.

—यष्टिलसद्भुज
रम्यमुखाम्बुज ललितविशारद ॥ ११ ॥
वल्लवरङ्गद शर्म्मदचेष्टित ।
षट्पदवेष्टित सरसीरुहधर ॥ १२ ॥
हलधरसोदर क्षणदगुणोत्कर ॥ १३ ॥

इति यादय ।

वीर ।

---

१. क. खलधर । २. गोवि. घनघुसृणाम्बर । ३. गोवि. जलजोद्भवनुत । ४. गोवि. ठनिभाननवर ।

कर्णे कल्पितकर्णिक· कलिकया कामायित· कान्तिभि·
कान्तानां किलकिञ्चितं किसलयं कीनाशधि· कीर्तिभि· ।
कुर्वन् कूर्दनकानि केशरितया कैशोरधाम् कोटिश
कोपीकौकुमकसकुष्टकृतिक ¹ कृष्ण· क्रियात् कांक्षितम् ।
सौरीतटचर गौरीव्रतपर
गौरीपटहर चौरीकृतकर ।
धीर !
प्रेमोरुहट्टहिण्डक कंसघटसुभटेभ्रकण्ठकुट्टाक ।
कुरु कौकुमपट्टाम्बर भट्टारक ताण्डव बुद्धि² मे ॥
इति चतुर्थी कलिका ।२।

३ अथ सर्वलघुकलिका

अथ सर्वलघुकं कलिकाद्वयं युगपदेव लक्ष्यते । तत्र–

मगणैर्पञ्चभिर्यत्र सप्तस्तैर्वापि तै पुन ।
क्रमेण पञ्चदशभिर्वर्णै· षोडशभिस्तथा ॥ १० ॥
प्रस्तारक्रममनस्य स्याल्लघुभि· सकलाक्षरै· ।
तत्सर्वलघुक प्रोक्त कलिकाद्वयमुत्तमम् ॥ ११ ॥

[व्या] अस्यायमर्थः —यत्र पञ्चभिः—पञ्चसंख्याकैर्मगणैः—मितगुरुकैर्वर्णैः पदं भवेत्, पुन· सप्तस्तबकेऽपि तैरेव पञ्चभिर्मगणैः –क्रमेण पञ्चदशभिर्वर्णैः षोडशभिर्वा पदं भवति । आ दाद्येन सप्तदशाक्षरमपि पदं कर्तव्यम् । एतद्रूपं तु न कर्तव्यमेवेत्युपदेशः । न च सप्तदशा- क्षरात्मकमित्यत्रैव निषेधस्य उक्तत्वात् । स्वेच्छया कलाग्राहकस्तु सप्तदशवर्णपर्यन्तमेव तावत्पद- मते चमत्कारकारी भवतीत्यर्थमिति प्रस्तारेऽपि सर्वलघुभिस्समस्तैर्वर्णैर्यत्र प्रस्तारः भवति तत् सर्वलघुकमुत्तमं कलिकाद्वयं भवतीत्यर्थः ।

तत्र पञ्चदशाक्षरी सर्वलघुका कलिका यथा–

गोपस्त्रीविधुदाशोक्षसयितवपुर्यं मन्दगोपादिके कि-
म्पूहानन्दैकहेतुं धनुजशतमयोद्दामदावाग्निधामम् ।
ईषद्धास्याम्बुधाराभितरणभृतसद्बन्धुषितस्तडागे
चिरस श्रीकृष्ण मेऽद्य श्रम शरणमहो दुःखदाहोपशान्त्यै³ ।
चरणचलनहतशकटशकटक⁴
रजकदलन मदागतपरकन्यक

---

१ गोवि· कौपीरीकुरकंसकण्ठकुलिका । २ क. बुद्धि । ३ गोवि· पूर्णपद नास्ति ।
४ गोवि· चरत चरटक ।

नटनघटनलसदगवरकटक
सकनकमरकतमयनवकटक ॥ १ ॥

इति पञ्चदशाक्षरी सर्वलघुका कलिका ।

अथ षोडशाक्षरी सर्वलघुका कलिका

कपटरुदितनटदकठिनपदतट-
विघटितदधिघट निविडितसुशकट
रुचितुलितपुरटपटलरुचिरपट-
घटितविपुलकट[1] कुटिलचिकुरघट ।
रविदुहितृनिकटलुठदजठरजट-[2]
विटपनिचितवटतटपटुतरनट-
निजविलसितहठविचटितसुविकट-
चटुलदनुजभट[3] जय युवतिषु शठ ।
धीर !

स्फुटनाटचकडम्बदण्डित-द्रढिमोड्डामर[4]दुष्टकुण्डली ।
जय गोष्ठकुटुम्बसवृतस्त्वमिडाडिम्बकदम्बडुम्बक ॥

रशनमुखर सुखरनखर
दशनशिखर-विजितशिखर ।
वीर !

विवृतविविधबाधे भ्रान्तिवेगादगाधे,
धवलित[5]भवपूरे मज्जतो मेऽविदूरे ।
अशरणगणबन्धो हा[6] कृपाकौमुदीन्दो,
सकृदकृतविलम्ब देहि हस्तावलम्बम् ॥

नामानि प्रणयेन ते सुकृतिना तन्वन्ति तुण्डोत्सव,
धामानि प्रथयन्ति हन्त जलदश्यामानि नेत्राञ्जनम् ।
सामानि श्रुतिशष्कुली मुरलिकाजातान्यलङ्कुर्वते,
कामा निर्वृतचेतसामिह विभो ! नाशापि न शोभते ॥

इति षोडशाक्षरी सर्वलघुका कलिका ।३।

---

१. गोवि. विपुलघट । २. गोवि जरठजट । ३ गोवि. चटुलदनुजघट । ४. क. घटितोड्डामर । ५. गोवि बलयति । ६. गोवि. हे ।

अथ सर्वासु कलिकासु स्थितानां विरुदानां युगपदेव लक्षणमुच्यते—

वसुषट्पङ्क्तिरविभिर्मनुभिश्चापि सर्वतः ।
कलिकासु कविः कुर्याद् विरुदानां तु कल्पनम् ॥ १२ ॥

[व्या.] अस्यार्थः—सर्वासु कलिकासु वस्वादिभिः पञ्चभिः संख्यासंकेतैश्चकारोक्तैरपि कविर्विरुदानां कल्पनं कुर्यात् । तथा हि—कस्यांचित् कलिकायामष्टकलिकं विरुदं कस्यांचित् षट्कलिकं विरुदं अपरस्यां दशकलिकं विरुदं अन्यस्यां च द्वादशकलिकं विरुदं कस्यांचित् कलिकायां चतुर्दशकलिकं विरुदम् । कुत्रापि चकारोपदिष्टं च विरुदमितयमिति क्रमेण सर्वत्र विरुदकल्पनं कविना कार्यमित्युपदिश्यते ॥१२॥

किञ्च–

वीर-वीरादिसंयुक्ता कलिका विरुदादिकम् ।
यत्र भूपतितत्तुल्यवर्णनेषु प्रयोजयेत् ॥ १३ ॥
संस्कृतप्राकृतमयी शौर्यवीर्यदयादिभिः ।
कीर्तिप्रतापप्राधान्यैः कुर्वीत कलिकादिकम् ॥ १४ ॥

[व्या.] सुगमम् ॥१३ १४॥

अपि च–

गुणालङ्कारसहितं सरसं रीतिसंयुतम् ।
अन्त्यानुप्राससम्बद्धमाडम्बर[1] चोचितं द्वयोः ॥ १५ ॥

[व्या.] द्वयोः—कलिकाविरुदयोरित्यर्थः ॥१५॥

कलिकाश्लोकविरुदत्रिकं त्रिंशत्त्रिकावधि ।
पञ्चत्रिकोर्ध्वं विरुदावली कविभिरिष्यते ॥ १६ ॥

[व्या.] अस्यार्थः—अस्यां कारिकायां सम्पूर्णा विरुदावली लक्ष्यते—विरुदावली तावत् कलिकाश्लोकविरुदैस्त्रिभिः सम्पद्यते । तत्र कलिकाश्लोकविरुदानामिति त्रिकं पञ्चत्रिकोर्ध्वम्—पञ्चत्रिकं, पञ्चदश तदूर्ध्वं एतदारभ्य इत्यर्थः । कियदवधीत्यपेक्षायामुच्यते—त्रिंशत्त्रिकावधि—यदि त्रिंशत्त्रिकावधिश्चेत् क्रियते तदा मध्यमा विरुदावली भवति । एतादृशी विरुदावली कविभिरिष्यते कर्तुं मतम् इत्यर्थः । यथा षट्त्रिंशत्स्थाने तु महती विरुदावली स्यात् । तथा च पञ्चदशमारभ्य त्रिंशत्त्रिकं भवतिसत्पर्यन्तं तावत् सति महती विरुदावली भवतीति । संक्षेपात्तथा व्याख्यातमस्माभिरिति सर्वं समञ्जसम् ॥१६॥

क्वचित्तु कलिकास्थाने केवलं गद्यमिष्यते ।
पद्यमाद्यन्तयोराशीः प्रधानं सुमनोहरम् ॥ १७ ॥
त्रिचतुःपञ्चकलिकाः श्लोकास्तावन्त एव हि ।

---

१ क. अन्त्याडम्बरं ।

[व्या०] इति, सार्द्धेन श्लोकेन विरुदावलीलक्षणे कस्यचिन्मत उपन्यस्यति । क्वचित्तु–कस्याश्चित् कलिकाया–कलिकास्थाने गद्यमेवोभयत्र केवल सविरुदं वा भवतीतीष्यते । किञ्च, आद्यन्तयो –कलिकाविरुदयो, आशी प्रधान–आशीर्वादोपलक्षित पद्यमतिसुमनोहर भवतीति च[1] ॥१७॥

[व्या०] कियन्त्य· कलिका·, कियन्तश्च श्लोकाः कार्या इत्यपेक्षायामुच्यते – त्रिचतु·-पञ्चकलिकाः स्वेच्छया कर्त्तव्या । श्लोका अपि तावन्त एव हि स्वेच्छयैव विधेया इत्युपदेश[2] ।

एतत् सर्वं यथास्थानमस्माभि समुदाहृतम् ॥ १८ ॥

[व्या०] सुगमम् ॥१८॥

विरुदावलीपाठफलमुपदिशति––

रम्यया विरुदावल्या प्रोक्तलक्षणयुक्तया ।
स्तूयमान प्रमुदित श्रीगोविन्द[3] प्रसीदति ॥ १९ ॥

श्री[4]

इति श्रीवृत्तमौक्तिके वार्त्तिके विरुदावली-
प्रकरणं नवमम् ॥९॥

---

१. ख 'च' नास्ति । २. ख. इत्युपेक्षायामुच्यते । ३. गोवि. वासुदेव· । ४ ख. 'श्री' नास्ति ।

दशमं खण्डावली-प्रकरणम्

अथ खण्डावली

आद्यौ पद्य यदाद्यन्तयो[1] स्यात खण्डावली स्वसौ ।
विनैव विरुदं नानागणभेदैरनेकधा ॥ १ ॥

तत्र–

१ अथ तामरसं खण्डावली

पदे चेद् रगणः सौ च लघुद्वयनिवेशनम् ।
तदा तामरसं नाम साधारणमते भवेत् ॥ २ ॥

[व्या०] अनयोः कारिकयोरयमर्थः । यदा कलिकाया आद्यन्तयोः विरुदं विनैव आदी पद्य भवति तदा नानागणभेदैरनेकधा असौ खण्डावली स्यादित्यन्वयः । किञ्च तत्र पदे चेद् रगणो भवति, अथ च सौ–सगणौ भवतः ततो लघुद्वयनिवेशन–लघुद्वयस्थापनं चेत्–स्यात्तदा साधारणमते स्वेच्छाकल्पाभिप्रायसमये तामरस इति नाम खण्डावली भवतीति वाक्यार्थः । १–२॥

यथा–

कलकलमितबधिकाधिकमभागरीसागरी
भवद्विषमसामकद्विगुणबढ्गुप्रद्युति ।
पतङ्गतनयातटी-घनमटी भवद्विग्रह
नवीनघनमण्डलीरुचिरमाविरास्तां मह ॥
देव !

जय वल्लीरवोल्लास ! जय वृन्दावनप्रिय !।
जय कृष्ण ! कृपाशील ! जय लीलासुधाम्बुधे ! ॥
वीर !

दम्यशामपि दुर्गमधमस्तव
मिन्दुबिम्बसमानमुखानन !
मन्दहासविकस्वरसुन्दर !
कुन्दकोरकदन्तशिखाज !

---

१ क यदाद्यन्तयो ।

सुन्दरीजनमोहनमन्मथ
चन्दनद्रवरज्यदुर स्थल
नन्दनालयशीलितसद्गुण-
वृन्द कच्छपरूपसमुद्धृत-
मन्दराचलवाहभुजार्गल-
कन्दलीकृतसारसमर्थ पु-
रन्दरेण चिर परिवेपित [1]
नन्दिनाथसमञ्चितदिव्यक-[2]
लिन्दशैलसुताजलजन्यर-
विन्दकाननकोपकदम्बमि-
लिन्दशावक निर्जरनायक
वृन्दया सह कल्पितकौतुक
दन्दशूकफणावलिगञ्जन
चन्द्रिकोज्ज्वलनिर्गलितामृत-
विन्दुदुर्दिनसूनृतसार मु-
कुन्ददेव कृपाल[3]दशि (दृशि) त्वयि
किं दुरापमिहास्ति ममेश्वर
किं दयावरुणालय दुर्जन-
निन्दयापि जगत्त्रयवल्लभ !
कन्दनीलिमदेहमह कुरु-
विन्दखण्डजपाकुसुमस्फुरद्
इन्द्रगोपकबन्धुरिताधर
चन्द्रकाद्भुतपिञ्छशिरस्तद-
रिन्दम स्वमतिं दवसे यदि
विन्दते सुखमेन[4]जनस्तव
वन्दिवद्गुणगानकर ध्रुव-
मिन्दयन् विदितो गरुडध्वज
नन्दयन्निजयासनयानय
नन्दगोपकुमार जयीभव ।
देव !

---

१. ख. परिपेवित । २. ख विकृक । ३. ख. कृपालु । ४. ख. मेव ।

जय नीपावलीवास जय वेणुसुधाप्रिय ।
जय वल्लवसौभाग्य जय भक्तरसायन ।
धीर !
पशुपवसनावल्लीवृन्दे श्रिया करपल्लवे
विपुलपुलकश्रेणि¹स्फीतस्फुरत्कुसुमोद्गमः ।
तपनतनयातीरे तीरे तमालतरुप्रभः
कलयतु मम क्षेमं कश्चिन्नवः कमलेक्षणम्² ॥१॥

इति तामरसं नाम चण्डवृत्तम् ।१।

२ अथ मञ्जरी चण्डवृत्तम्

नरेन्द्रवर्जिता यत्र रचिता स्युस्तुरङ्गमाः ।
भावन्तपदसंयुक्ता मञ्जरी सा निगद्यते ॥ २ ॥

[व्या०] अस्यार्थः—यत्र-यस्यां मञ्जर्यां नरेन्द्रेण-जगणेन वर्जिता-रहिताः तुरङ्गमाः चतुर्मात्राश्चतुष्कला रचिता यदि स्युः । किञ्च भावन्तमौ पदाभ्यां संयुक्ता येषु भवति तदा सा मञ्जरीति नाम्ना प्रसिद्धा चण्डवृत्तं निगद्यते छन्दोवित्तैरिति शेषः ॥२॥

यथा–

पिशङ्गसिचयाञ्चितं चटुलनैचिकीचारकं
कमलकुवलयगन्धलोभलसत्¹कुसुमामिषमसमम् ।
कलधूतघटितरचितकटककरणकुण्डलचूडाम्बरं
तमालदलमेचकं सुचिरमाविरास्तां महः ॥
देव !
जय लीलासुधासिन्धो ! जय शीलाविमन्दिरम्¹ ।
जय राधैकसौहार्द जय कन्दर्पविभ्रम ॥
धीर !
जय जय जम्भारि भुजस्तम्भा-
कलिताहम्मा-वाहितजम्भा
मुरदम्भस्तम्भा-पहृतरम्भा ¹
जय निर्दम्भा-सादितरम्भा
लघुकुचकुम्भा-दरपरिरम्भा
निधुवनपुम्भा-वप्रारम्भा

१ ख. श्रेणी । २ ख कमलेक्षणः । ३ ख भारतं । ४ ख कुसुमिता । ५. ख. मन्दिरः । ६. वाहितकुम्भा । ७. ख पहृतरंभा ।

धिकसुखसम्भा-वनविश्रम्भा-
भाषणसम्भारैरिह सम्भा-
वय न सम्भावितमुज्जृम्भा-
म्बुजसदृशर्म्भाषणमधुरम्भा-
रत्यालम्भा-ग्यायतनम्भा-
कमुख सम्भालयत [१] किम्भा-
लाक्षरसम्भावनया देव !

कुमारपत्रपिञ्छेन विराजत्कुन्तलश्रियम् ।
सुकुमारमह वन्दे नन्दगोपकुमारकम् ॥
धीर !

नित्य यन्मधुमन्थरा मधुकरायन्ते सुधास्वादिन-
स्तन्माधुर्यधुरीणतापरिणते प्राय परीक्षाविधिम् ।
कर्त्तुं स्वाघ्रिसरोरुह करपुटे कृत्वा मुहु सलिहन्,
दोलान्दोलनदोलिताखिलतनु पायाद् यशोदार्भक ॥

इति मञ्जरी खण्डावली ।२।

इत्थ खण्डावलीना तु भेदा सन्ति सहस्रश ।
साकल्येन मया नोक्ता ग्रन्थविस्तरशङ्कया ॥४॥

सुकुमारमतीनां च मार्गदर्शनतो भवेत् ।
विज्ञानमिति मत्वैव मया मार्गः प्रदर्शित ॥५॥

सहस्रेण मुखेनैतद् वक्तु शेषोऽपि न क्षमः ।
कथमेकमुखेनाहमशेष वाङ्मय ब्रुवे ॥६॥

श्री

इति श्रीवृत्तमौक्तिके वार्त्तिके खण्डावलीप्रकरणं दशमम् ।१०।

श्रीः

---

१. ख. वत्मुक सम्भालय ।

एकादशं दोष-प्रकरणम्

अथ दोषाः

अथैतयोर्निरूप्यन्ते दोषाः कविसुखावहाः ।
यान्विदित्वैव सुकविः काव्यं कर्तुमिहार्हति ॥१॥

[व्या०] अथेति । विरुदावली-खण्डावली-कथनानन्तरमेतयोः—विरुदावली-खण्डावली-मेतयोर्दोषा निरूप्यन्ते । शेषं सुगमम् ॥१॥

तान् आह—

अमैत्री निरनुप्रासो दौर्बल्यं च कलाहतिः ।
असाम्प्रतं हतौचित्यं विपरीतयुतं पुनः ॥ २ ॥
विश्रृङ्खलं स्खलत्तालं नवदोषांश्च वेत्ति यः ।
कुर्यान्नैतत् तमोलोके उलूकोऽसौ भवेन्नरः ॥ ३ ॥

[व्या०] अस्यार्थः—अमैत्री—अक्षरमैत्रीराहित्यं । निरनुप्रासः—अनुप्रासाभावः । दौर्बल्यं—श्लथवर्णता इति निगदेनैव व्याख्यातं । कलाहतिः—अन्यपदे पूर्ववर्णस्थानेऽन्यवर्णपाठः । यथा—

कमलनयन सुविमलयश ।
रञ्जितरण सञ्जितगुण ।

असुन्दरवर्णनं—हतौचित्यं । स्वयमुदाहरणम् । श्लिष्टवर्णस्थाने मधुरवर्णस्थितिः, मधुरस्थाने वा श्लिष्टस्थापनं विपरीतयुतं । विश्रृङ्खलं—न्यूनाधिकविसर्गादिवर्णानां ग्रथनम् । स्खलत्ताल-पतितत्वं तालानुसारात् अक्षराणि यथाहरणानि । इत्येतान्नवदोषान् यः कविः न वेत्ति—न जानाति अविज्ञाय च यदि एतत्—पूर्वोक्तं विरुदावली-खण्डावलीलक्षणं यो नरः—कविः काव्यं कुर्यात् तदा तमोलोके पातालान्धकारातिशयवति लोके असौ उलूको—दिवान्धपक्षी भवेदित्यर्थः । तस्मात् दोषज्ञाने महान् गुणः, तद्वैपरीत्ये महदनिष्टं इत्यन्वयव्यतिरेकसिद्धोऽयमर्थः ।
इति सर्वं निर्मलं मङ्गलम् ।

लक्ष्मीनाथतनूजेन चन्द्रशेखरसूरिणा ।
छन्दःशास्त्रे विरचितं वार्त्तिकं वृत्तमौक्तिकम् ॥

इति दोषनिरूपण-प्रकरणमेकादशम् ॥११॥

द्वादशं अनुक्रमणी – प्रकरणम्

प्रथमखण्डानुक्रमणी

रविकर-पशुपति-पिङ्गल-शम्भुग्रन्थान् विलोक्य निर्बन्धान् ।
सद्वृत्तमौक्तिकमिद चक्रे श्रीचन्द्रशेखर सुकवि. ॥१॥

अथाऽभिधीयते चाऽत्राऽनुक्रमो वृत्तमौक्तिके ।
अत्र खण्डद्वय प्रोक्त मात्रा-वर्णात्मिक पृथक् ॥ २ ॥

तत्र मात्रावृत्तखण्डे प्रथमेऽनुक्रमः स्फुटम् ।
प्रोच्यते यत्र विज्ञाते समूहालम्बनात्मकम् ॥ ३ ॥

ज्ञान भवेदखण्डस्य[1] खण्डस्य[2] छन्दसोऽपि च ।
मङ्गलाचरण पूर्वं ततो गुरुलघुस्थिति ॥ ४ ॥

तयोरुदाहृति पश्चात् तद् विकल्पस्य कल्पनम् ।
काव्यलक्षणवैलक्ष्ये अनिष्टफलवेदनम् ॥ ५ ॥

गणव्यवस्थामात्राणा प्रस्तारद्वयलक्षणम् ।
मात्रागणाना नामानि कथितानि तत स्फुटम् ॥ ६ ॥

वर्णवृत्तगणाना च लक्षण स्यात् तत परम् ।
तद्देवता च तन्मैत्री तत्फल चाप्यनुक्रमात् ॥ ७ ॥

मात्रोद्दिष्ट च तत्पश्चात्तन्नष्टस्याथ कीर्त्तनम् ।
वर्णोद्दिष्ट ततो ज्ञेय वर्णनष्टमत परम् ॥ ८ ॥

वर्णमेरुश्च तत्पश्चात् तत्पताका प्रकीर्त्तिता ।
मात्रामेरुश्च तत्पश्चात् तत्पताका प्रकीर्त्तिता ॥ ९ ॥

ततो वृत्तद्वयस्थस्य गुरोर्ज्ञान लघोरपि ।
वर्णस्य मर्कटी पश्चात् मात्रायाश्चापि मर्कटी ॥ १० ॥

तयो फल च कथित षट्प्रकार समासत ।
ततस्त्वेकाक्षरादेश्च षड्विंशत्यक्षरावधे. ॥ ११ ॥

प्रस्तारस्यापि सख्याऽत्र पिण्डीभूता प्रकीर्त्तिता ।
ततो गाथादिभेदाना कलासख्या प्रकीर्त्तिता ॥ १२ ॥

---

१ ख भवेदखण्डलस्य । २. ख. 'खण्डस्य' नास्ति ।

गाथोदाहरणं पश्चात् सप्रभेदं सलक्षणम् ।
विगाथा च तथा ज्ञेया ततो गाहू प्रकीर्तिता ॥ १३ ॥
अथोद्गाथा गाहिनी च सिंहिनी च ततः परम् ।
स्कन्धकं चापि कथितं सप्रभेदं सलक्षणम् ॥ १४ ॥
इति गाथाप्रकरणं प्रथमं वृत्तमौक्तिके ।
द्वितीयं षट्पदस्याथ द्विपथा तत्र संस्थिता ॥ १५ ॥
सलक्षणा सप्रभेदा रसिका स्यात् ततः परम् ।
अथ रोला समाख्याता गन्धाणा स्यात् ततः परम् ॥ १६ ॥
चौपैया च ततः प्रोक्ता ततो घत्ता प्रकीर्तिता ।
घत्तानन्दमतः काव्यं सोल्लासं सप्रभेदकम् ॥ १७ ॥
षट्पदं च ततः प्रोक्तं सप्रभेदमतः परम् ।
काव्यषट्पदयोश्चापि दोषाः सम्यङ् निरूपिताः ॥ १८ ॥
प्राकृते संस्कृते चापि दोषाः कविसुखावहाः ।
द्वितीयं षट्पदस्यैतत् प्रोक्तं प्रकरणं त्विह ॥ १९ ॥
अथ रड्डाप्रकरणं तृतीयं परिकीर्त्यते ।
तत्र पज्झटिकाछन्दोऽडिल्लाछन्दस्ततः परम् ॥ २० ॥
ततस्तु पादाकुलकं चौबोला छन्द एव च ।
रड्डाछन्दस्ततः प्रोक्तं भेदाः सप्तैव चास्य तु ॥ २१ ॥
रड्डाप्रकरणं चैव तृतीयमिह कीर्तितम् ।
पद्मावतीप्रकरणं चतुर्थमथ कथ्यते ॥ २२ ॥
तत्र पद्मावती पूर्वं ततः कुण्डलिका भवेत् ।
गगनाङ्गं ततः प्रोक्तं द्विपदी च ततः परम् ॥ २३ ॥
ततस्तु झुल्लणा-छन्दः खञ्जा-छन्दस्ततः परम् ।
शिखाछन्दस्ततश्च स्यात् मालाछन्दस्ततो भवेत् ॥ २४ ॥
ततस्तु चुलियाला स्यात् सोरठा तदनन्तरम् ।
हाकलीर्मधुभारश्चाऽभीरश्च स्यादनन्तरम् ॥ २५ ॥
अथ दण्डकला प्रोक्ता ततः कामकला भवेत् ।
रुचिराख्यं ततश्छन्दो दीपकश्च ततः स्मृतम् ॥ २६ ॥
सिंहावलोकितं छन्दस्ततश्च स्यात् प्लवङ्गमः ।
अथ लीलावतीछन्दो हरिगीतं ततः स्मृतम् ॥ २७ ॥

हरिगीत[1] ततः प्रोक्त मनोहरमत. परम् ।
हरिगीता तत प्रोक्ता यतिभेदेन या स्थिता ॥ २८ ॥
अथ त्रिभङ्गी छन्द स्यात् ततो दुर्मिलका भवेत् ।
हीरच्छन्दस्तत प्रोक्तमथो जनहर मतम् ॥ २९ ॥
तत स्मरगृह छन्दो मरहट्टा तत स्मृता ।
पद्मावतीप्रकरण चतुर्थमिह कीर्त्तितम् ॥ ३० ॥
सवैयाख्य प्रकरण पञ्चम परिकीर्त्यते ।
तत्र पूर्वं सवैयाख्य छन्द स्यादतिसुन्दरम् ॥ ३१ ॥
भेदास्तस्यापि कथिता रससख्या मनोहराः ।
ततो घनाक्षर वृत्तमतिसुन्दरमीरितम् ॥ ३२ ॥
पञ्चम तु प्रकरण सवैयाख्यमिहोदितम् ।
अथो **गलितकाख्य** तु **षष्ठ प्रकरण** भवेत् ॥ ३३ ॥
पूर्वं गलितक तत्र ततो विगलित मतम् ।
अथ सङ्गलित ज्ञेयमत· सुन्दर-पूर्वकम् ॥ ३४ ॥
भूषणोपपद तच्च मुखपूर्वं तत स्मृतम् ।
विलम्बितागलितक समपूर्वं ततो मतम् ॥ ३५ ॥
द्वितीय समपूर्वं चापर सङ्गलित तत ।
अथापर गलितक लम्बितापूर्वक भवेत् ॥ ३६ ॥
विक्षिप्तिकागलितक ललितापूर्वक तत ।
ततो विषमितापूर्वं मालागलितक तत ॥ ३७ ॥
मुग्धमालागलितकमथोद्गलितक भवेत् ।
षष्ठ गलितकस्यैतत् प्रोक्त प्रकरण शिवम् ॥ ३८ ॥
रन्ध्रसूर्यशिवसख्यात (७९) मात्रावृत्तमिहोदितम् ।
सप्रभेद वसुद्वन्द्व-शतद्वय-(२८८) मुदीरितम् ॥ ३९ ॥
तथा प्रकरण चात्र रससख्य[2] प्रकीर्त्तितम् ।
मात्रावृत्तस्य खण्डोऽयु प्रथम. परिकीर्तितः ॥ ४० ॥

इति प्रथमखण्डानुक्रमणिका ।

---

१ हरगीतं ख । २ क रससख्या ।

द्वितीयखण्डानुक्रमणी

अथ द्वितीयखण्डस्य वर्णवृत्तस्य च क्रमात् ।
वृत्तानुक्रमणी स्पष्टा क्रियते वृत्तमौक्तिके ॥ १ ॥
आरभ्यैकाक्षरं वृत्तं षड्विंशत्यक्षरावधि ।
तत्तत्प्रस्तारगत्याऽत्र वृत्तानुक्रमणी स्थिता ॥ २ ॥
तत्र श्रीनामकं वृत्तं प्रथमं परिकीर्तितम् ।
ततः कथितं वृत्तं द्वौ भेदावत्र कीर्तितौ ॥ ३ ॥
एकाक्षरे द्व्यक्षरे तु पूर्वं कामस्ततो मही ।
ततः सारं मधुश्चेति भेदाश्चत्वार एव हि ॥ ४ ॥
त्र्यक्षरे चात्र ताली स्याच्छारी चापि शशी ततः ।
ततः प्रिया समाख्याता रमणः स्यादनन्तरम् ॥ ५ ॥
पञ्चालश्च मृगेन्द्रश्च मन्दरश्च ततः स्मृतः ।
कमलं चेति चात्र स्युरष्टौ भेदाः प्रकीर्तिताः[1] ॥ ६ ॥
अथातो द्विगुणा भेदाश्चतुर्वर्णादिषु स्थिताः ।
यथासम्भवमेतेषामाद्यास्तानुक्रमात् स्फुटम् ॥ ७ ॥
वृत्तानुक्रमणी सेयमङ्कसंकेततः कृता ।
प्रतिप्रस्तारविस्तारं षड्विंशत्यक्षरावधि ॥ ८ ॥

तत्र–

चतुर्वर्णप्रभेदेषु तीर्णा कन्याऽपि चाप्यतः ।
धारी[2] ततस्तु विख्याता नगाणी च ततः परम् ॥ ९ ॥
शुभं चेति समाख्यातामत्र भेदचतुष्टयम् ।
शेषभेदा न संप्रोक्ता ग्रन्थविस्तरशङ्कया ॥ १० ॥
प्रस्तारगत्या ते भेदाः षोडशैव व्यवस्थिताः ।
सुधीभिरुह्याः प्रस्तार्य यथाशास्त्रमशेषतः ॥ ११ ॥
अथ पञ्चाक्षरे[3] पूर्वं सम्मोहा वृत्तमीरितम् ।
हारी ततः समाख्याता ततो हंसः प्रकीर्तितः ॥ १२ ॥

---

१ ख. भेदाः क्रमात् स्थिताः । २ ख. धारी । ३ ख. पञ्चाक्षरे ।

प्रिया तत. समाख्याता यमक तदनन्तरम् ।
प्रस्तारगत्या चैवाऽत्र भेदा द्वात्रिंशदीरिता (३२) ॥ १३ ॥

षडक्षरेऽपि पूर्वं तु शेषाख्य वृत्तमीरितम् ।
तत स्या त्तिलका वृत्त विमोह तदनन्तरम् ॥ १४ ॥

विजोहे[1]त्यन्यत ख्यात चतुरसमत परम् ।
पिङ्गले चउरसेति स्त्रीलिङ्ग परिकीर्तितम् ॥ १५ ॥

मन्थान च तत प्रोक्त मन्थानेत्यन्यतो भवेत् ।
शङ्खनारी तत प्रोक्ता सोमराजीति चान्यतः ॥ १६ ॥

स्यात् सुमालतिका चात्र मालतीति च पिङ्गले ।
तनुमध्या तत प्रोक्ता ततो दमनक भवेत् ॥ १७ ॥

प्रस्तारगत्या चाप्यत्र भेदा वेदरसैर्मता (६४) ।
अथ सप्ताक्षरे पूर्वं शीर्षाख्य वृत्तमीरितम् ॥ १८ ॥

तत समानिका वृत्त ततोऽपि च सुवासकम् ।
करहञ्चि तत प्रोक्त कुमारललिता तत ॥ १९ ॥

ततो मधुमती प्रोक्ता मदलेखा ततः स्मृता ।
ततो वृत्त तु कुसुमतति स्यादतिसुन्दरम् ॥ २० ॥
प्रस्तारगतिभेदेन वसुनेत्रात्मजेरिता[2] (१२८) ।
भेदा सप्ताक्षरस्यान्या ऊह्या प्रस्तार्य पण्डितै ॥ २१ ॥
अथ वस्वक्षरे पूर्वं विद्युन्माला विराजते ।
तत प्रमाणिका ज्ञेया मल्लिका तदनन्तरम् ॥ २२ ॥
तुङ्गावृत्त तत प्रोक्त कमल तदनन्तरम् ।
माणवकक्रीडितक ततश्चित्रपदा मता ॥ २३ ॥
ततोऽनुष्टुप् समाख्याता जलद च तत स्मृतम् ।
अत्र प्रस्तारगत्यैव रसबाणयुगैर्मता. (२५६) ॥ २४ ॥
भेदा वस्वक्षरे शेषा सूचनीयाः सुबुद्धिभिः ।
नवाक्षरेऽथ पूर्वं स्याद् रूपामाला मनोरमा ॥ २५ ॥
ततो महालक्ष्मिका स्यात् सारङ्ग तदनन्तरम् ।
सारङ्गिका पिङ्गले तु पाइन्त तदनन्तरम् ॥ २६ ॥

---

१. ख. विड्गोहे । २. क. वसुनेत्रात्मतेडिता ।

पाइन्ता पिङ्गलै तु स्यात् कमल तदनन्तरम् ।
[बिम्बवृत्त तत प्रोक्तं तोमर तदनन्तरम्][1] ॥ २७ ॥
भुजगशिशुसृतावृत्त मणिमध्य तत स्मृतम् ।
भुजङ्गसङ्गता च स्यात् तत सुललित स्मृतम् ॥ २८ ॥
प्रस्तारगत्या चामास्य नेत्रचन्द्राक्षरैरपि (११२) ।
भेदा नवाक्षरे शिष्टाः सूचनीयाः सुबुद्धिभिः ॥ २९ ॥
अथ पङ्क्त्यक्षरे पूर्वं गोपाल परिकीर्तितः ।
सयुतं कथित पश्चात् ततश्चम्पकमालिका ॥ ३० ॥
क्वचिद् रुक्मवती चैयं क्वचिद् रूपवतीति च ।
तत सारवती च[2] स्यात् सुषमा तदनन्तरम् ॥ ३१ ॥
ततोऽमृतगति प्रोक्ता मत्ता स्यात्तदनन्तरम् ।
पूर्वमुक्ताऽमृतगति सा चेद् यमकिता भवेत् ॥ ३२ ॥
प्रतिपाद्य तदोक्तैषा त्वरिताऽनन्तरं गतिः ।
मनोरमं ततः प्रोक्तमन्यच्च मनोरमा ॥ ३३ ॥
ततो ललित-पूर्वं तु गतीति समुदीरितम् ।
प्रस्तारान्त्य सर्वलघुवृत्तमत्यन्तसुन्दरम् ॥ ३४ ॥
प्रस्तारगत्या भेदा स्युः तत्वाकाशारमसंख्यकाः (१०२४) ।
दशाक्षरेऽपरे भेदा सूक्ष्मा प्रस्तार्य पण्डितैः ॥ ३५ ॥
अथ रुद्राक्षरे[3] पूर्वं माल्तीवृत्तमीरितम् ।
ततो बन्धुः समाख्यातो ह्यन्यत्र दोधक भवेत् ॥ ३६ ॥
ततस्तु सुमुखीवृत्त शालिनी स्यादनन्तरम् ।
वातोर्मी तदनु प्रोक्ता छन्दःशास्त्रविशारदैः ॥ ३७ ॥
परस्परं चैतयोश्चेत् पादा एकत्रयोजिताः ।
तदोपजातिनामानो भेदास्ते च चतुर्दश ॥ ३८ ॥
ततो दमनक प्रोक्तं चण्डिका तदनन्तरम् ।
सेनिका श्रेणिका चेति तथा नामान्तरं क्वचित् ॥ ३९ ॥
नाममात्रे परं भेद छन्दतो न तु किञ्चन ।
इन्द्रवज्रा तत प्रोक्ता ततश्चापे ह्यपूर्विका ॥ ४० ॥

---

१ [ ] कोष्ठगतोंऽशो नास्ति क ख प्रतौ । २ ख. ततः सारवती च' नास्ति । ३ ख. रुद्राक्षरैः । ४ ख तु ।

उपजातिस्तत प्रोक्ता पूर्वोक्तेनैव वर्त्मना ।
भेदाश्चतुर्दशैतस्या विज्ञेया. पिण्डतो बहिः ॥ ४१ ॥

ततो रथोद्धतावृत्त स्वागतावृत्ततस्तथा ।
भ्रमरान्ते विलसिताऽनुकूला च ततो भवेत् ॥ ४२ ॥

ततो मोट्टनक[1] वृत्त सुकेशी च ततो भवेत् ।
तत सुभद्रिकावृत्त बकुलं कथित तत ॥ ४३ ॥

रुद्रसख्याक्षरे भेदा वसुवेदखनेत्रकैः (२०४८) ।
प्रस्तारगत्या जायन्ते शिष्टान् प्रस्तार्य सूचयेत् ॥ ४४ ॥

अथ रव्यक्षरे पूर्वमापीड कथितोऽन्यत ।
विद्याधरस्ततश्च स्यात् प्रयातं भुजगादनु ॥ ४५ ॥

ततो लक्ष्मीधर वृत्तमन्यत्र स्रग्विणी तत. ।
तोटक स्यात् तत सारङ्गक मौक्तिकदामत ॥ ४६ ॥

मोदक सुन्दरी चापि तत स्यात् प्रमिताक्षरा ।
चन्द्रवर्त्म ततो ज्ञेयमतो द्रुतविलम्बितम् ॥ ४७ ॥

ततस्तु वशस्थविला क्वचित् क्लीबमिद भवेत् ।
क्वचित्तु वशस्तनितमिन्द्रवशा ततो भवेत् ॥ ४८ ॥

अनयोरपि चैकत्रपादानां योजन यदि ।
तदोपजातयो नाम भेदा स्युस्ते चतुर्दश ॥ ४९ ॥

सर्वत्रैव स्वल्पभेदे भवन्तीहोपजातय. ।
वृत्ताभ्यामल्पभेदाभ्यामुपदेशः पितुर्मम ॥ ५० ॥

ततो जलोद्धतगतिर्वैश्वदेवी ततो मता ।
मन्दाकिनी ततो ज्ञेया तत कुसुमचित्रिता ॥ ५१ ॥

ततस्तामरस वृत्त ततो भवति मालती ।
कुत्रचिद् यमुना चेति मणिमाला ततो भवेत् ॥ ५२ ॥

ततो जलधरमाला स्यात् ततश्चापि प्रियवदा ।
ततस्तु ललिता सैव सुपूर्वान्यित्र लक्षिता ॥ ५३ ॥

---

[1] ख मोटनकम् ।

ततोऽपि ललितं वृत्तं ललनेत्यपि च क्वचित् ।
कामदत्ता ततः प्रोक्ता ततो वसन्तचत्वरम् ॥ ५४ ॥
प्रमुदितवदना-मन्दाकिन्योर्भेदो न वास्तवो घटितः ।
नामान्तरेण भेदो गणतो भवितो न चोद्दिष्टः ॥ ५५ ॥[1]
प्रमुदितावृदूर्ध्वं[2] वदने[3] नवमाऽत्र च प्रभा ।
विन्यासा कविमुख्यैस्तु ततः स्यान्नवमालिनी ॥ ५६ ॥
सर्वान्त्य नयनात् पूर्वं तरलं वृत्तमीरितम् ।
अत्र प्रस्ताररीत्या तु भेदा द्व्यक्षरे स्थिताः ॥ ५७ ॥
रसरन्ध्रखवेदैस्तु(४०९६) ज्ञेया सूच्या[4] सुबुद्धिभिः ।
त्रयोदशाक्षरे पूर्वं वाराहः कथितो मया ॥ ५८ ॥
मायावृत्तं ततस्तु स्यात् क्वचिन्मत्तमयूरकम् ।
ततस्तु तारकं वृत्तं कन्द पङ्कावली तथा ॥ ५९ ॥
ततः प्रहर्षिणीवृत्तं रुचिरा तदनन्तरम् ।
चण्डीवृत्तं ततः प्रोक्तं ततः स्यान्मञ्जुभाषिणी ॥ ६० ॥
चान्द्री सुनन्दिनी चैव चन्द्रिका तदनन्तरम् ।
क्वचिदुत्पलिनीवृत्तं चन्द्रिकैवोच्यते बुधैः ॥ ६१ ॥
कलहंसस्ततश्च स्यात् सिंहनादोऽप्ययं क्वचित् ।
ततो मृगेन्द्रवदनं क्षमा पश्चात् ततो लता ॥ ६२ ॥
ततस्तु चन्द्रलेखाख्यं चन्द्रलेखेत्यपि क्वचित् ।
ततश्च सुधतिः पश्चाल्लक्ष्मीवृत्तं मनोहरम् ॥ ६३ ॥
ततो विमलपूर्वं तु गतीतिरुचिरं भवेत् ।
प्रस्तारास्य वृत्तमेतद् भाषितं कविपुङ्गवैः ॥ ६४ ॥
प्रस्तारगत्या विज्ञेया भेदाः कामाक्षरे बुधैः ।
नेत्रग्रहेन्दुवसुभिः (८१९२)ज्ञेयान् प्रस्तार्य सूचयेत् ॥ ६५ ॥
अथ मन्वक्षरे पूर्वं सिंहास्यः कथितो बुधैः ।
ततो वसन्ततिलकं ततश्चक्रं प्रकीर्तितम् ॥ ६६ ॥
असम्बाधा ततश्च स्यात् ततः स्यादपराजिता ।
कलिकान्तं प्रहरणं वासन्ती स्यादनन्तरम् ॥ ६७ ॥

---

१ पद्यं नास्ति क. प्रतौ । २ क. प्रमुदितवदनस्यान्ते । ३ क. वदने । ४ क. ज्ञेयास्तुधैः ।

लोला नान्दीमुखी तस्माद् वैदर्भी तदनन्तरम् ।
प्रसिद्धमिन्दुवदन स्त्रीलिङ्गमिदमन्यत ॥ ६८ ॥

ततस्तु शरभी प्रोक्ता ततश्चाहिधृतिः स्थिता ।
ततोऽपि विमला ज्ञेया मल्लिका तदनन्तरम् ॥ ६९ ॥

ततो मणिगण वृत्तमन्त्य मन्वक्षरे भवेत् ।
प्रस्तारगत्या चात्रापि भेदा वेदाष्टतो गुणा[1] ॥ ७० ॥

रसेन्दुप्रमिताश्चापि(१६३८४) विज्ञेया कविशेखरै ।
यथासम्भवसम्प्रोक्ता शेषास्तूह्या. स्वबुद्धित ॥ ७१ ॥

लीलाखेलमथो वक्ष्ये वृत्त पञ्चदशाक्षरे ।
सारङ्गिकेति यन्नाम पिङ्गले प्रोक्तमुत्तमम् ॥ ७२ ॥

ततस्तु मालिनीवृत्त तत. स्याच्चारु चामरम् ।
तूणक चान्यतश्चापि भ्रमरावलिका तत. ॥ ७३ ॥

भ्रमरावली पिङ्गले स्यान् मनोहसस्ततस्तत ।
शरभ वृत्तमन्यत्र मता शशिकलेति च ॥ ७४ ॥

मणिगुणनिकर स्रगिति च भेदौ द्वावस्य यतिकृतौ भवत ।
तत्प्रागेवाभिहित वृत्तद्वयमस्य शरभतो न भिदा ॥ ७५ ॥

ततस्तु निशिपालाख्य विपिनात्तिलक तत ।
चन्द्रलेखा तत प्रोक्ता चण्डलेखाऽपि चान्यत. ॥ ७६ ॥[2]

ततश्चित्रा समाख्याता चित्र चान्यत्र कीर्तितम् ।
ततस्तु केसर वृत्तमेला स्यात्तदनन्तरम् ॥ ७७ ॥

तत प्रिया समाख्याता यतिभेदादलिः पुन ।
उत्सवस्तु तत प्रोक्तस्ततश्चोडुगण मतम् ॥ ७८ ॥
प्रस्तारगत्या सम्प्रोक्ता भेदा पञ्चदशाक्षरे ।
वसुशास्त्राश्वनेत्राग्निप्रमिता (३२७६८) कविपण्डितै ॥७९॥
प्रस्तार्य शेषभेदास्तु कृत्वा नामानि च स्वत ।
अस्मदीयोपदेशेन सूचनीया सुबुद्धिभि ॥ ८० ॥
अथ प्रथमतो राम प्रस्तारे षोडशाक्षरे ।
ब्रह्मरूपकमित्यस्य नाम प्रोक्त च पिङ्गले ॥ ८१ ॥

---

१ क गुण । २. ख पद्य नास्ति ।

नराचमिति यन्नाम ततः स्यात् पञ्चचामरम् ।
ततो नील समाख्यात ततः स्याच्चञ्चलाभिधम् ॥ ८२ ॥

इदमेवान्यतश्चित्रसङ्गमित्येव भाषितम् ।
ततस्तु मदनाद्यूर्ध्वं ललिता स्यादनन्तरम् ॥ ८३ ॥

वाणिनीवृत्तमाख्यात प्रवरललितं ततः ।
अनन्तरं तु गरुडरुतं स्याच्चकिता ततः ॥ ८४ ॥

चकितैव यतिविभेदात् क्वचिदपि गजतुरगविलसितं भवति ।
क्वचिदिदमेव ऋषभगजविलसितमिति नाम संधत्ते ॥ ८५ ॥

ततः शैलशिखावृत्तं ततस्तु ललितं मतम् ।
ततः सुकेसरं वृत्तं ललना स्यादनन्तरम् ॥ ८६ ॥

ततो गिरिधृतिः कुमार्यथ समानन्तरं धृतिः ।
प्रस्तारगत्यैवात्रापि भेदाः स्युः षोडशाक्षरे ॥ ८७ ॥

रसाग्निपञ्चेषुरसैः (६५५३६) मिताः प्रख्यातबुद्धिभिः ।
प्रस्तार्य सुध्याख्या येपि भेदा इत्युपदिश्यते ॥ ८८ ॥

अथ सप्तदशे वर्णप्रस्तारे वृत्तमीर्यते ।
लीलाधृष्टं प्रथमतस्ततः पृथ्वी प्रकीर्तिता ॥ ८९ ॥

ततो मालावतीवृत्तं मालाधर इति क्वचित् ।
ततः शिखरिणीवृत्तं हरिणीवृत्ततस्तथा ॥ ९० ॥

मन्दाक्रान्ता वंशपत्रपतितं पतिता क्वचित् ।
शम्भौ तु वंशदलमेतन्नाम प्रकीर्तितम् ॥ ९१ ॥

ततो नर्दटकं वृत्तं यतिभेदात्तु कोकिलम् ।
ततस्तु हारिणीवृत्तं भाराक्रान्ता ततो भवेत् ॥ ९२ ॥

मतङ्गवाहिनीवृत्तं ततः स्यात् पद्मकं तथा[1] ।
वदवाद्यामुदाहरमिति वृत्तं समीरितम् ॥ ९३ ॥

प्रस्तारगत्या भेदाः स्युरत्र सप्तदशाक्षरे ।
नेत्राश्वव्योमचन्द्राग्निचन्द्रैः (१३१०७२) परिमिताः परे ॥ ९४ ॥

भेदाः सुबुद्धिभिस्सूक्ष्मा प्रस्तार्य स्वमनीषया ।
अथाष्टादशवर्णानां प्रस्तारे प्रथमं भवेत् ॥ ९५ ॥

---

१ ख ततः ।

लीलाचन्द्रस्ततश्च स्यान्मञ्जीरा चर्चरी तत ।
क्रीडाचन्द्रस्ततश्च स्यात् तत. कुसुमिताल्लता ॥ ९६ ॥

ततस्तु नन्दन वृत्त नाराच स्यादनन्तरम् ।
मञ्जुलेत्यन्यत. प्रोक्ता चित्रलेखा ततो भवेत् ॥ ९७ ॥

ततस्तु भ्रमराच्चापि पदमित्यतिसुन्दरम् ।
शार्दूलललितं पश्चात् ततः सुललित भवेत् ॥ ९८ ॥

अनन्तर चोपवनकुसुम वृत्तमीरितम् ।
अत्र प्रस्तारगतितो भेदा. ह्यष्टादशाक्षरे ॥ ९९ ॥

वेदश्रुत्यवनीनेत्ररसयुग्मैः(२६२१४४)मिता मताः ।
शेषा स्वबुद्धया प्रस्तार्य विज्ञेया स्वगुरूक्तित ॥ १०० ॥

अथ प्रथमतो नागानन्दश्चैकोनविंशके ।
शार्दूलानन्तर विक्रीडित वृत्तं तत स्मृतम् ॥ १०१ ॥
ततश्चन्द्र समाख्यात चन्द्रमालेति च क्वचित् ।
ततस्तु धवल वृत्त धवलेति च पिङ्गले ॥ १०२ ॥
तत शम्भुः समाख्यातो मेघविस्फूर्जिता तत ।
छायावृत्त ततश्च स्यात् सुरसा तदनन्तरम् ॥ १०३ ॥
फुल्लदाम ततश्च स्यान्मृदुलात् कुसुम तत ।
प्रस्तारगत्या भेदाश्चैकोनविंशाक्षरे कृता ॥ १०४ ॥
वस्वष्टनेत्रश्रुतिदृग्भूतै (५२४२८८) परिमिता परे ।
भेदाः प्रस्तार्य बोद्धव्या. स्वबुद्धया शुद्धबुद्धिभि ॥ १०५ ॥
अथ विंशाक्षरे पूर्व योगानन्द[1] समीरित ।
ततस्तु गीतिकावृत्त गण्डका तदनन्तरम् ॥ १०६ ॥
गण्डकैव क्वच्चित्रवृत्तमन्यत्र वृत्तकम् ।
शोभावृत्त तत प्रोक्त तत सुवदना भवेत् ॥ १०७ ॥
प्लवङ्गभङ्गाच्च पुनर्मङ्गल वृत्तमुच्यते ।
तत शशाङ्कचलित ततो भवति भद्रकम् ॥ १०८ ॥
ततो गुणगण वृत्तमन्त्य स्यादतिसुन्दरम् ।
प्रस्तारगत्या चात्रत्या भेदा रसमुनीषुभि ॥ १०९ ॥

१. क. ख नागानन्द ।

मरावमिति यन्नाम तत स्यात् पञ्चचामरम् ।
ततो नील समाख्यातं ततः स्याच्चञ्चलाभिधम् ॥ ८२ ॥
इदमेवान्यतश्चित्रसञ्ज्ञमित्येव भाषितम् ।
ततस्तु मदनादूर्ध्वं ललिता स्यादनन्तरम् ॥ ८३ ॥
वाणिनीवृत्तमाख्यातं प्रवरात्ललितं ततः ।
अनन्तरं तु गरुडरुत स्याच्चकिता ततः ॥ ८४ ॥
चकितैव यतिविभेदात् क्वचिदपि गजतुरगविलसित भवति ।
क्वचिदिदमेव ऋषभगजविलसितमिति नाम सधरो ॥ ८५ ॥
ततः शलधिकावृत्तं ततस्तु ललित मतम् ।
ततः सुकेशरं वृत्तं ललना स्यादनन्तरम् ॥ ८६ ॥
ततो गिरिधृतिः कुत्राप्यवसानान्तरं धृतिः ।
प्रस्तारगत्यैवात्रापि भेदाः स्युः षोडशाक्षरे ॥ ८७ ॥
रसाग्निपञ्चेषुरसैः (६५५३६) मिता प्रख्यातबुद्धिभिः ।
प्रस्तार्य सूच्याख्या येपि भेदा इत्युपदिश्यते ॥ ८८ ॥
अथ सप्तदशे वर्णप्रस्तारे वृत्तमीर्यते ।
लीलाधृष्टः प्रथमतस्ततः पृथ्वी प्रकीर्तिता ॥ ८९ ॥
ततो मालावतीवृत्तं मालाधर इति क्वचित् ।
ततः शिखरिणीवृत्तं हरिणीवृत्ततस्तथा ॥ ९० ॥
मन्दाक्रान्ता वशपत्रपतितं पतिता क्वचित् ।
शम्भौ तु वंशवदनमेतन्नाम प्रकीर्तितम् ॥ ९१ ॥
ततो नर्दटकं वृत्तं यतिभेदात्तु कोकिलम् ।
ततस्तु हारिणीवृत्तं भाराक्रान्ता ततो भवत ॥ ९२ ॥
मतङ्गवाहिनीवृत्तं ततः स्यात् पयकं तथा[1] ।
ह्वाधम्लाम्बुगहरमिति वृत्तं समीरितम् ॥ ९३ ॥
प्रस्तारगत्या भेदाः स्युरत्र सप्तदशाक्षरे ।
मित्रारयम्योमपक्षाग्निचन्द्रैः (१३१०७२) परिमिताः परे ॥९४॥
भेदाः गुरुउक्तिभिरूह्याः प्रस्तार्य स्वमनीषया ।
अथाष्टादशवर्णानां प्रस्तारे प्रथमं भवत् ॥ ९५ ॥

---

१ ख ततः ।

अथ तत्त्वाक्षरे पूर्वं रामानन्दोऽथ दुर्मिला ।
किरीटं तु ततः प्रोक्तं ततस्तन्वी प्रकीर्तिता ॥ १२४ ॥
ततस्तु माधवीवृत्तं तरलान्नयनं ततः ।
अत्र प्रस्तारभेदेन भेदाः षड्भूमियुग्मकैः ॥ १२५ ॥
सप्तर्षिमुनिशास्त्रेन्दु(१६७७७२१६)मिताः स्युरपरे पुनः ।
गुरूपदेशमार्गेण सूचनीया मनीषिभिः ॥ १२६ ॥
अथ पञ्चाधिके विंशत्यक्षरे पूर्वमुच्यते ।
कामानन्दस्ततः क्रौञ्चपदा मल्ली ततो भवेत् ॥ १२७ ॥
ततो मणिगणं वृत्तमिति वृत्तचतुष्टयम् ।
प्रस्तारगत्या चात्रापि भेदा नेत्राग्निसिन्धुभिः ॥ १२८ ॥
वेदपञ्चेषुवह्निभ्यामपि(३३५५४४३२)स्युरपरेपि च ।
छन्दःशास्त्रोक्तमार्गेण सूचनीयाः स्वबुद्धितः ॥ १२९ ॥
षड्भिरभ्यधिके विंशत्यक्षरेऽप्यथ गद्यते ।
श्रीगोविन्दानन्दसंज्ञं वृत्तमत्यन्तसुन्दरम् ॥ १३० ॥
ततो भुजङ्गपूर्वं तु विजृम्भितमिति स्मृतम् ।
अपवाहस्ततो वृत्तं मागधी तदनन्तरम् ॥ १३१ ॥
ततश्चान्त्यं भवेद् वृत्तं कमलाऽनन्तरं दलम् ।
प्रस्तारगत्या चात्रत्या भेदाः सम्यग् विभाविताः ॥ १३२ ॥
वेदशास्त्रवसुद्वन्द्वखेन्द्वश्वरससूचिता ।(६७१०८८६४) ।
प्रस्तार्य शास्त्रमार्गेणापरे सूच्याः स्वबुद्धितः ॥ १३३ ॥
एकाक्षरादिषड्विंशत्यक्षरावधि कीर्तितम् ।
यथालाभं वर्णवृत्तमन्यदूह्यं महात्मभिः ॥ १३४ ॥
रसलोचनमुन्यश्वचन्द्रनेत्राब्धिवह्निभिः ।
शशिना योजितैरङ्कैः(१३४२१७७२६)पिण्डसंख्या भवेदिह ॥ १३५ ॥
भेदेष्वेतेषु चाद्यन्तसहितैः भेदकल्पनैः ।
पञ्चषष्ठ्यधिकं नेत्रशतकं (२६५) वृत्तमीरितम् ॥ १३६ ॥
द्वितीये खण्डके वर्णवृत्ते सवृत्तमौक्तिके ।
वृत्तानुक्रमणीरूपमाद्यं प्रकरणं त्विदम् ॥ १३७ ॥
प्रकीर्णकप्रकरणं द्वितीयमथ कथ्यते ।
प्रस्तारोत्तीर्णवृत्तानि कानिचित्तत्र चक्ष्महे ॥ १३८ ॥

वसुवेदखचन्द्रश्च (१०४८५७६) मिता स्युश्चापरे[1] बुधै ।
प्रस्तार्य बुद्धधा ससूच्या छन्दःशास्त्रविशारदैः ॥ ११० ॥

अथैकविंशत्यक्षरेऽस्मिन् ब्रह्मानन्दादनन्तरम् ।
स्रग्धरा मञ्जरी च स्यान्नरेन्द्रस्तदनन्तरम् ॥ १११ ॥

ततस्तु सरसीवृत्तं क्वचित् सुरतरुर्भवेत् ।
सिद्धक चान्यत प्रोक्तं रुचिरा तदनन्तरम् ॥ ११२ ॥

ततश्च स्यान्निरुपमतिलकं वृत्तमग्रगम् ।
प्रस्तारगत्या चात्रापि भेदा नन्नेयुधमक्ष ॥ ११३ ॥

मुनिरप्रशनेत्रैश्च (२०९७१५२) विज्ञेया कविशेखरैः ।
प्रस्तार्यान्यिसमुन्नेयं भेदजातं सुबुद्धिभिः ॥ ११४ ॥

अथ प्रथमतो विद्यामन्दवृत्तमुदीरितम् ।
द्वाविंशत्यक्षरे हंसीवृत्तं स्यात्तदनन्तरम् ।
ततस्तु मदिरावृत्तं मन्द्रक तदनन्तरम् ॥ ११५ ॥
तदेव यतिभेदेन शिखरं परिकीर्तितम् ।
तत स्यादच्युतं वृत्त मदालसमनन्तरम् ॥ ११६ ॥
ततस्तरुवर वृत्तमन्त्य भवति सुन्दरम् ।
प्रस्तारगत्यैवात्रापि भेदा वेदशशिभि ॥ ११७ ॥
वेदग्रहेन्दुवेदैश्च (४१९४३०४) भवन्तीति विनिश्चितम् ।
तथैवान्येपि ये भेदास्ते प्रस्तार्य स्वबुद्धित ॥ ११८ ॥
सूचनीया कविवरै. छन्दःशास्त्रविशारदैः ।
अथात्र त्र्यधिके विंशत्यक्षरे पूर्वमुच्यते ॥ ११९ ॥
दिव्यानन्द सर्वगुरुस्तत सुन्दरिका भवेत् ।
ततस्तु यतिभेदेन सैव पद्मावती भवेत् ॥ १२ ॥
ततोऽद्रितनया प्रोक्ता सैवाश्वललितं क्वचित् ।
ततस्तु मालतीवृत्तं मल्लिका स्यादनन्तरम् ॥ १२१ ॥
मत्ताक्रीड तत प्रोक्तं कनकाद्यब्जयं तत ।
प्रस्तारगतितो भेदास्त्रयोविंशाक्षरे स्थिता ॥ १२२ ॥
वसुव्योमरसवसुनागवसुनिभिवसुभिर्मिता (८३८८६०८) ।
शेषभेदाः सुधीभिस्तु सूच्या प्रस्तार्य शास्त्रत ॥ १२३ ॥

---

1 क चापरे ।

अथ तत्त्वाक्षरे पूर्वं रामानन्दोऽथ दुर्मिला ।
किरीट तु तत प्रोक्त ततस्तन्वी प्रकीर्तिता ॥ १२४ ॥
ततस्तु माधवीवृत्त तरलान्नयन तत ।
अत्र प्रस्तारभेदेन भेदा षड्भूमियुग्मकै. ॥ १२५ ॥
सप्तर्षिमुनिशास्त्रेन्दु(१६७७७२१६)मिता स्युरपरे पुन ।
गुरूपदेशमार्गेण सूचनीया मनीषिभि ॥ १२६ ॥
अथ पञ्चाधिके विंशत्यक्षरे पूर्वमुच्यते ।
कामानन्दस्तत क्रौञ्चपदा मल्ली ततो भवेत् ॥ १२७ ॥
ततो मणिगण वृत्तमिति वृत्तचतुष्टयम् ।
प्रस्तारगत्या चात्रापि भेदा नेत्राग्निसिन्धुभि ॥ १२८ ॥
वेदपञ्चेषुवह्निभ्यामपि(३३५५४४३२)स्युरपरेपि च ।
छन्द शास्त्रोक्तमार्गेण सूचनीया स्वबुद्धित ॥ १२९ ॥
षड्भिरप्यधिके विंशत्यक्षरेऽप्यथ गद्यते ।
श्रीगोविन्दानन्दसज्ञ वृत्तमत्यन्तसुन्दरम् ॥ १३० ॥
ततो भुजङ्गपूर्वं तु विजृम्भितमिति स्मृतम् ।
अपवाहस्ततो वृत्त मागधी तदनन्तरम् ॥ १३१ ॥
ततश्चान्त्य भवेद् वृत्त कमलाऽनन्तर दलम् ।
प्रस्तारगत्या चात्रत्या भेदा सम्यग् विभाविता· ॥ १३२ ॥
वेदशास्त्रवसुद्वन्द्वखेन्द्वश्वरससूचिता ।(६७१०८८६४) ।
प्रस्तार्यं शास्त्रमार्गेणापरे सूच्या स्वबुद्धित ॥ १३३ ॥
एकाक्षरादिषड्विंशत्यक्षरावधि कीर्तितम् ।
यथालाभ वर्णवृत्तमन्यदूह्य महात्मभि ॥ १३४ ॥
रसलोचनमुन्यश्वचन्द्रनेत्राब्धिवह्निभि ।
शशिना योजितैरङ्कै (१३४२१७७२६)पिण्डसख्या भवेदिह ॥ १३५ ॥
भेदेष्वेतेषु चाद्यन्तसहितै भेदकल्पनै ।
पञ्चषष्ठ्यधिक नेत्रशतक (२६५) वृत्तमीरितम् ॥ १३६ ॥
द्वितीये खण्डके वर्णवृत्ते सवृत्तमौक्तिके ।
वृत्तानुक्रमणी रूपमाद्य प्रकरण त्विदम् ॥ १३७ ॥
प्रकीर्णकप्रकरण द्वितीयमथ कथ्यते ।
प्रस्तारोत्तीर्णवृत्तानि कानिचित्तत्र चक्ष्महे ॥ १३८ ॥

भावी पिपीलिका सम ततस्तु करभः स्मृतः ।
ततोऽन्तरं च पणव मालाः स्यात्तदनन्तरम् ॥ १३९ ॥
द्वितीयाख्य त्रिभङ्गी स्यात् शालूरं तदनन्तरम् ।
इति प्रकीर्णकं नाम द्वितीयं वृत्तमौक्तिके ॥ १४० ॥
प्रोक्त प्रकरणं चाथ तृतीयमिदमुच्यते ।
दण्डकानां प्रकरणं क्रमप्राप्तं मनोरमम् ॥ १४१ ॥

तत्र–

चण्डवृष्टिप्रपातस्तु प्रथमं परिकीर्तितः ।
तत प्रचितकश्चाथ ततोऽप्यर्णादयो मताः ॥ १४२ ॥
ततस्तु सर्वतोभद्रस्ततश्चाशोकमञ्जरी ।
कुसुमस्तबकश्चाथ मत्तमातङ्ग एव च ॥ १४३ ॥
अनङ्गशेखरश्चेति तृतीयं परिकीर्तितम् ।
अथार्द्धसमकं नाम चतुर्थं परिकीर्त्यते ॥ १४४ ॥
पुष्पिताग्रा भवेत्तत्र प्रथम वृत्तमुत्तमम् ।
ततश्चोपचित्र स्याच्च वेगवती भवेत् ॥ १४५ ॥
हरिणाप्लुता चापि प्लुता संपरिकीर्तिता ।
ततश्चापरवक्त्रं स्यात् सुन्दरी च ततो मता ॥ १४६ ॥
अथ भद्रविराट वृत्तं तत केतुमती स्मृता ।
ततस्तु वाङ्मतीवृत्तमथ स्यात् षट्पदावली ॥ १४७ ॥
इत्यर्द्धसमकं नाम तुर्यं प्रकरणं मतम् ।
अथोच्यते प्रकरणं विषमं वृत्तमौक्तिके ॥ १४८ ॥
पञ्चम तत्र पूर्वं स्याद् उद्गता वृत्तमुत्तमम् ।
ततस्तु सौरभं वृत्त ललितं तदनन्तरम् ॥ १४९ ॥
अथ भावस्ततो वक्त्रं पथ्यावृत्तमतः स्मृतम् ।
ततस्त्वानुष्टुभं वृत्तमष्टाक्षरतया कृतम् ॥ १५० ॥
इत्थं विषमवृत्तानां प्रोक्तं प्रकरणं स्विह ।
अथ षष्ठं प्रकरणं वैतालीयं प्रकीर्त्यते ॥ १५१ ॥
वैतालीयं प्रथमतस्तत्र वृत्तं निगद्यते ।
ततश्चौपच्छन्दसिकमापातलिकमेव च ॥ १५२ ॥

द्विविध नलिनाख्य च तत स्याद् दक्षिणान्तिका ।
अथोत्तरान्तिका पश्चात् [प्राच्यवृत्तिरुदीरिता ॥ १५३ ॥
उदीच्यवृत्तिस्तत्पश्चात् प्रवृत्तकमतः परम् ।
अथापरान्तिका पश्चा]¹च्चारुहासिन्युदीरिता ॥ १५४ ॥
वैतालीय प्रकरण षष्ठमेतदुदीरितम् ।
यतिप्रकरण चाथ **सप्तमं** परिकीर्त्यते ॥ १५५ ॥
यतीना घटन यत्र सोदाहरणमीरितम् ।
अथ **गद्यप्रकरणमष्टम** **वृत्तमौक्तिके** ॥ १५६ ॥
नानाविधानि गद्यानि गद्यन्ते यत्र लक्षणै ।
तत्र तु प्रथम शुद्ध चूर्णक गद्यमुच्यते ॥ १५७ ॥
अथाऽऽविद्ध चूर्णक तु ललित चूर्णक तत ।
ततस्तूत्कलिकाप्राय वृत्तगन्धि तत· स्मृतम् ॥ १५८ ॥
ग्रन्थान्तरमत चात्र लक्षित गद्यलक्षणे ।
इति गद्यप्रकरणमष्टम परिकीर्तितम् ॥ १५९ ॥
विरुदावलीप्रकरण **नवमं** चाथ कथ्यते ।

तत्र–

द्विगाद्या च त्रिभङ्ग्यन्ता कलिका नवधा पुरा ॥ १६० ॥
ततस्त्रिभङ्गी कलिका ²नोधा साऽपि² प्रकीर्तिता ।
विदग्धाद् या द्विपाद्यन्ता सापि षोढा तत स्मृता ॥ १६१ ॥
मुग्धादिका तरुण्यन्ता मध्ये मध्या चतुर्विधा ।
अवान्तरप्रकरण कलिकाया प्रकीर्तितम् ॥ १६२ ॥
अथातो व्यापक चण्डवृत्त विरुदमीरितम् ।
सलक्षण तथा साधारण चेति द्विधैव तत् ॥ १६३ ॥
ततोऽस्य परिभाषा स्यात् तद्भेदाना व्यवस्थिति. ।

तत्र–

पुरुषोत्तमाख्यं प्रथम ततस्तु तिलक भवेत् ॥ १६४ ॥
अच्युतस्तु तत. प्रोक्तो वर्द्धितस्तदनन्तरम् ।
ततो रणः समाख्यातस्तत. स्याद् वीरचण्डकम् ॥ १६५ ॥

---

१. [–] कोष्ठगतांशो क. प्रतौ नोपलभ्यते । २-२. 'नवधा सा' इति सुष्ठु ।

अन्यत्र वीरभद्रं स्यात् ततः शाकः प्रकीर्तितः ।
मातङ्गखेलितं पश्चादथोत्पलमुदीरितम् ॥ १६६ ॥
ततो गुणरतिः प्रोक्ता ततः कल्पद्रुमो भवेत् ।
कन्दलश्चाथ कथितस्ततः स्यादपराजितम् ॥ १६७ ॥
नर्तनं तु ततः प्रोक्तं तरत्पूर्वं समस्तकम् ।
वेष्टनाख्यं चण्डवृत्तं ततश्चास्खलितं मतम् ॥ १६८ ॥
अथ पल्लवितं पश्चात् समग्रं तुरगस्तथा ।
पङ्केरुहं ततः प्रोक्तं सितकञ्जमतः परम् ॥ १६९ ॥
पाण्डूत्पलं ततश्च स्यादिन्दीवरमतः परम् ।
अरुणाम्भोरुहं पश्चादथ फुल्लाम्बुजं मतम् ॥ १७० ॥
चम्पकं तु ततः प्रोक्तं वञ्जुलं तदनन्तरम् ।
ततः कुन्दं समाख्यातमथो बकुलभासुरम् ॥ १७१ ॥
अनन्तरं तु बकुलमङ्गलं परिकीर्तितम् ।
मञ्जरी कोरकश्चाथ गुच्छः कुसुममेव च ॥ १७२ ॥
अत्रान्तरमिदं चापि प्रोक्तं प्रकरणं त्विह ।
अथ त्रिभङ्गी कलिका चण्डकाख्या प्रकीर्तिता ॥ १७३ ॥
विदग्धपूर्वा सम्पूर्णा त्रिभङ्गी कलिका ततः ।
ततस्तु मिश्रकलिका कथिता वृत्तमौक्तिके ॥ १७४ ॥
अत्रान्तरं प्रकरणं तृतीयमतिसुन्दरम् ।
इत्थं सलक्षणं चण्डवृत्तप्रकरणं स्फुटम् ॥ १७५ ॥
ततः साधारणमतं चण्डवृत्तमिहोदितम् ।
साधारणमतं चैकदेशतः प्रोक्तमत्र हि ॥ १७६ ॥
अत्रान्तरप्रकरणं साधारणमते स्थितम् ।
चतुर्थं विरुदावल्या[1] विज्ञेयं कविपण्डितैः ॥ १७७ ॥
ततस्तत्रैव कलिका ज्ञेया सप्तविभक्तिकी ।
अनन्तरं चाक्षमयीकलिका कथिता त्विह ॥ १७८ ॥
ततस्तु सर्वलघुकं कलिकाद्वयमीरितम् ।
ततश्च विरुदावली तु युगपल्लक्षणं स्फुटम् ॥ १७९ ॥

---

१ क विरुदावल्यो । २. क. कलिका* ।

ततस्तु विरुदावल्या' सम्पूर्णं लक्षण कृतम् ।
विरुदावलीप्रकरण नवम वृत्तमौक्तिके ॥ १८० ॥

अथ खण्डावली तत्र पूर्वं तामरस भवेत् ।
ततस्तु मञ्जरी नाम भवेत् खण्डावली त्विह ॥ १८१ ॥

खण्डावलीप्रकरण दशम परिकीर्तितम् ।
अथानयोस्तु दोषाणा निरूपणमुदीरितम् ॥ १८२ ॥

एकादश प्रकरणमिदमुक्तमतिस्फुटम् ।
तत खण्डद्वयस्यापि प्रोक्ताऽनुक्रमणी क्रमात् ॥ १८३ ॥

एतत् प्रकरण चात्र द्वादश परिकीर्तितम् ।
वृत्तानि यत्र गण्यन्ते तथा प्रकरणानि च ॥ १८४ ॥

पूर्वखण्डे षडेवात्र प्रोक्त प्रकरण स्फुटम् ।
द्वितीयखण्डे चाप्यत्र रविसख्यमुदीरितम् ॥ १८५ ॥

अवान्तर प्रकरण चतु सख्य प्रकीर्तितम् ।
सम्भूय चात्र गदित रसेन्दुमितमुत्तमम् ॥ १८६ ॥

उभयो खण्डयोश्चापि सम्भूयैव प्रकाशितम् ।
द्वाविंशति'प्रकरण रुचिर वृत्तमौक्तिके ॥ १८७ ॥

मात्सर्यमुत्सार्य मुदा सदा सहृदयैरिदम् ।
अन्तर्मुखै प्रकरण विज्ञैरालोक्यता मम ॥ १८८ ॥

इति खण्डद्वयानुक्रमणीप्रकरण द्वादशम् ।१२।

---

१ ख नेत्रद्वय ।

ग्रन्थकृत् प्रशस्ति

दुस्थीभूतमिमं प्रसाद्यममधिस्थित्वा मयाऽस्य क्वचि
न्मोहान्धीकृतगोत्रज मनसिजस्फूर्जद्विषज्वालया ।
गर्वाग्नि पदपद्मयुग्मवसनैर्निर्वाप्य सर्वात्मना
स्व निर्वासिम मन्मनोहृदगत दुर्वासिमाकाश्रियम् ॥ १ ॥

यद्दोर्मन्दलमण्डमन्दरतटीनिष्पेषणासोदिता
वैराम्भोनिभयो विनाशमगमन्निस्सारभूता भुवि ।
कालिन्दीतटमध्यसिन्धुरमम् श्रीनाथवैकुन्धुरे
राधीरीनिकुरुम्बमीतिशमन वन्दे यमीराघयम् ॥ २ ॥

सि कामतुच्छीकृतकामधाम
मध्यस्फुरद्धाम जगत्ललाम ।
उद्दामचिन्तापसदामबद्ध
श्रीराम मामुद्धर वामबुद्धिम् ॥ ३ ॥

श्रीचन्द्रशेखरकृते रुचिरतरे वृत्तमौक्तिकेऽमुष्मिन् ।
प्रस्तारवृत्तविधायकखण्डस्सम्पूर्णतामगमत् ॥ ४ ॥

लक्ष्मीनाथसुभट्टवर्य्य इति यो वासिष्ठवंशोद्भव
स्तत्सूनु कविचन्द्रशेखर इति प्रख्यातकीर्तिर्भुवि ।
बालानां सुखबोधहेतुमतुल सच्छन्दसां मन्दिरं
स्पष्टार्थ वरवृत्तमौक्तिकमिति ग्रन्थं मुदा निर्ममे ॥ ५ ॥

रसमुनिरसचन्द्रैर्मापिते (१६७६) वैक्रमेऽब्दे
सितदलकलितेऽस्मिन्कार्तिके पौर्णमास्याम् ।
प्रतिविमलमतिः श्रीचन्द्रमौलिर्व्यधत्ते
रुचिरतरमपूर्वं मौक्तिकं वृत्तपूर्वम् ॥ ६ ॥

प्रगवशास्त्रपयोनिधिकोपामुद्रापतिं पितरम् ।
श्रीमल्लक्ष्मीनाथं सकलागमपारगं वन्दे ॥ ७ ॥

---

१ क बन्धुरा । २ क नातिघर्मं । ३ क पिनदरं ।

याते दिवं सुतनये विनयोपपन्ने,
श्रीचन्द्रशेखरकवौ किल तत्प्रबन्धः ।
विच्छेदमाप भुवि तद्वचसैव सार्द्धं,
पूर्णीकृतश्च स हि जीवनहेतवेऽस्य ॥ ८ ॥

श्रीवृत्तमौक्तिकमिदं लक्ष्मीनाथेन पूरितं यत्नात् ।
जीयादाचन्द्रार्कं जीवातुर्जीवलोकस्य ॥ ९ ॥

श्री

इत्यालङ्कारिकचक्रचूडामणि-छन्दःशास्त्र[1]परमाचार्य-सकलोपनिषद्रहस्यार्णव-
कर्णधार-श्रीलक्ष्मीनाथभट्टात्मज-कवि[2]-चन्द्रशेखरभट्टविरचिते
श्रीवृत्तमौक्तिके पिङ्गलवार्त्तिके वर्णवृत्ताख्यो
द्वितीयः परिच्छेदः ।२।

श्रीः

समाप्तश्चायं वार्त्तिके द्वितीयः खण्डः[3] ।

श्रीकृष्णायानन्तशक्तये नमः । श्रीरस्तु ।

समाप्तमिदं श्रीवृत्तमौक्तिकं नाम पिङ्गलवार्त्तिकम् ।

शुभमस्तु ।

संवत् १६९० समये श्रावनवदि ११ रवौ शुभदिने लिखितं शुभस्थाने अर्गलपुरनगरे लालमनिमिश्रेण । शुभम् । इदं ग्रन्थसंख्या ३८५०॥

---

१ ख. छन्दःशास्त्रे । २. ख. कविशेखरश्री । ३. ख. द्वितीयखण्डः ।

छन्दःशास्त्रपरमाचार्यश्रीलक्ष्मीनाथभट्टप्रणीतो

वृत्तमौक्तिक-वार्त्तिक-दुष्करोद्धारः

प्रथमो विश्रामः

श्रीगणेशाय नमः

प्रणम्य जगदाधारं विश्वरूपिणमीश्वरम् ।
श्रीचन्द्रशेखरकृते वार्त्तिके वृत्तमौक्तिके ॥ १ ॥
ग्रन्थसारं समालोच्य नष्टोद्दिष्टादिदुष्करम् ।
श्रीलक्ष्मीनाथभट्टेन सुकरीक्रियतेतराम् ॥ २ ॥

अथात्र तावत् छान्दसिकपरीक्षार्थं कौतुकार्थञ्च मात्राणामुद्दिष्टमुच्यते । तत्र त्रयोदशविभेदभिन्नेषु षट्कलप्रस्तारगणेषु क्व कतिमं रूपम् इति लिखित्वा पृष्टं रूपमुद्दिष्टं प्रथमप्रत्ययस्वरूपं, तत्प्रकारमाह सार्द्धेन श्लोकेन ।

दद्यात् पूर्वयुगाङ्कान् लघोरुपरि पस्य तूभयतः ।
अन्त्याङ्के गुरुशीर्षस्थितान् विलुम्पेदथाङ्कांश्च ॥ ५१ ॥
उर्वरितैश्च तथाङ्कैर्मात्रोद्दिष्टं विजानीयात् ।

दद्यादिति । तस्मिन् लिखिते रूपे पूर्वयुगाङ्कान् दद्यात् । तत्र च लघोरुपर्येव गुरोस्तु उभयतः—उपर्यधश्चेत्यर्थः । अथ पश्चादन्त्याङ्के—शेषाङ्के गुरुशीर्षस्थितान् अङ्कान् विलुम्पेत् । तथा कृते सति उर्वरितैश्च अङ्कैः मात्राणामुद्दिष्टं जानीयात् । एतद् दुष्करं भवति । षट्कलप्रस्तारे तावदेको गुरुः द्वौ लघू एको गुरुश्च एवंरूपो गणः ऽ।।ऽ कुत्र स्थानेऽस्तीति प्रश्ने कृते तदाकारं गणं लिखित्वा पूर्वयुगेन समाना नमादङ्का दातव्याः २ त १३ (त)मादिकलायां प्रथमोऽङ्को देयः, तत पूर्वयुगाङ्कमानादुत्सर्गसिद्धो द्वितीयोऽङ्कस्तत्र च । तदनन्तरं पूर्वाङ्कद्वयमेकीकृत्य तद्युग्मको ऽङ्कोऽग्रे देयः । एवं च पूर्वयुगसमानाङ्कास्त्रिपञ्चादिर्देय इति पूर्वयुगक्रमार्थः । अत्र गुरोरुपर्यधश्चाङ्को देयो द्विकलत्वात् । एतच्च गुरुशीर्षपदा-ल्लभ्यते । एवं तेषु अङ्केषु अन्त्याङ्के—चरमाङ्के त्रयोदशरूपे १३ मात्रयो गुरुशीर्षस्थितान् अङ्कांस्तान् विलुम्पेत् । ते च अत्र तथा च त्रयोदशात्मकात् चरमेऽङ्के नवाङ्के लुप्ते सति उर्वरितैरङ्कैश्चतुर्भिश्चतुर्थं स्थाने लिखित्वा तत्समानाङ्क-स्थानको यद्गणः इति जानीयात् । तदेतन्मात्राणामुद्दिष्टम् । उद्दिष्टस्य गणस्य स्थानमात्रानयनादिति भावः ।

एव चाप्टभेदविभिन्नो पञ्चकलप्रस्तारे—द्वौ लघू, एको गुरु, एको लघुश्च इत्येवरूपो गण ।।ऽ। कुत्र स्थानेऽस्तीति प्रश्ने, प्रथमलघोरुपरि प्रथमाङ्कस्तदनु द्वितीयलघोरुपरि द्वितीयाङ्कस्ततो गुरोरुपरि तृतीयाङ्कस्तदध. पञ्चमाङ्कस्तदनु लघोरुपरि अप्टमाङ्कश्च देयः। अतोऽन्त्याङ्के-अष्टमाङ्के ८ गुरुशिरोऽङ्कस्तृतीयोऽङ्को ३ लोप्योऽवशिप्ट' पञ्चमाङ्को भवति। तस्मात् पञ्चमो गणस्तादृशो भवतीति एव जानीयादिति।

तथा च पञ्चभेदे चतुष्कलप्रस्तारे जगण ।ऽ। कुत्रास्तीति प्रश्ने, प्रथमलघोरुपरि प्रथमाङ्कस्तदनु गुरोरुपरि द्वितीयाङ्कस्तदधस्तृतीयाङ्क शेपो लघोरुपरि पञ्चमाङ्को देय। अत शेपे पञ्चमाङ्के ५ गुरुशिरोऽङ्को द्वितीयो लोप्य। अवशिष्टस्तृतीयाऽङ्को भवति। तस्मात् तृतीयस्थाने जगणो वर्त्तत इति जानीयादिति।

एवञ्च सप्ताष्टकलादिकेषु समस्तेषु प्रस्तारेषु प्रथमे शेपे च गणे शङ्कैव नावतरीतर्त्तीति। द्वितीयस्थानादारभ्य उपान्त्यस्थानपर्यन्त प्रश्ने कृते प्रोक्तप्रकारेण उद्दिष्ट बोद्धव्यमतिविशुद्धबुद्धिभिरित्यास्ता विस्तारेण इत्युपरम्यते। इति शिवम्।

श्रीनागराजाय नम.

प्रस्तारविस्तारणकौतुकेन प्रस्तारयन्त पतगाधिराजम्।
मध्येसमुद्र प्रविशन्तमन्तर्भजामि हेतु भुजगाधिराजम्॥

अथ मात्रा-वर्णोद्दिष्टौ वक्तव्ये तत्र प्रस्तारमन्तरेणोद्दिष्टादीनामशक्यकथनत्वात् समस्तप्रस्तारस्य वसुधावलयेऽप्यसमावेशात् केचन प्रस्तारा प्रस्तुतोपयोगिनो लिख्यन्ते। एव अन्येपि षड्विंशत्यक्षरपर्यन्त प्रस्ताराः बोद्धव्या सुबुद्धिभि।

द्विकलप्रस्तारो यथा—

ऽ	१
।।	२

त्रिकलप्रस्तारो यथा—

।ऽ	१
ऽ।	२
।।।	३

चतुष्कलप्रस्तारो यथा—

ऽऽ	१
।।ऽ	२
।ऽ।	३
ऽ।।	४
।।।।	५

पञ्चकलप्रस्तारो यथा–

। ऽ ऽ	१
ऽ । ऽ	२
। । । ऽ	३
ऽ ऽ ।	४
। । ऽ ।	५
। ऽ । ।	६
ऽ । । ।	७
। । । । ।	८

षट्कलप्रस्तारो यथा—

ऽ ऽ ऽ	१
। । ऽ ऽ	२
। ऽ । ऽ	३
ऽ । । ऽ	४
। । । । ऽ	५
। ऽ ऽ ।	६
ऽ । ऽ ।	७
। । । ऽ ।	८
ऽ ऽ । ।	९
। । ऽ । ।	१०
। ऽ । । ।	११
ऽ । । । ।	१२
। । । । । ।	१३

मात्राणामुद्दिष्टं द्वितीयस्य

१	३
।	ऽ
	३

मात्राणामुद्दिष्टं प्रथमप्रस्तस्य

१	३	५	८
	।	।	ऽ
२			१३

लोपो गणाङ्कः ६

इति श्रीमत्प्रभुवरचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकास्सूरिकवि-चूडामणि-साहित्यार्णवकर्णधार-षड्भाषाप्रशस्तपरमाचार्य-श्रीलक्ष्मीनाथभट्टारक-विरचिते श्रीवृत्तमौक्तिके वार्त्तिके दुष्करोद्धारे मात्राप्रस्तारो-द्दिष्टगणसमुद्धारो नाम प्रथमो विभागः ॥ १ ॥

द्वितीयो विश्रामः

अथ मात्राणामदृष्ट रूप नष्ट द्वितीयप्रत्ययस्वरूपम् । तच्च षट्कलप्रस्तारे प्रस्तारान्तरे वा अमुकस्थाने कीदृश इति प्रश्नोत्तरमध्यर्द्धेन श्लोकद्वयेनाह—

अथ मात्राणां नष्ट यददृष्ट पृच्छ्यते रूपम् ॥ ५२ ॥
यत्कलकप्रस्तारो लघवः कार्याश्च तावन्तः ।
दत्त्वा पूर्वयुगाङ्कान् पृष्ठाङ्क' लोपयेदन्त्ये ॥ ५३ ॥
उर्वरितोर्वरितानामङ्कानां यत्र लभ्यते भागः ।
परमात्रा च गृहीत्वा स एव गुरुतामुपागच्छेत् ॥ ५४ ॥

अथेति । पूर्वार्द्धं अवतारिकयैव व्याख्यातप्रायम् ॥ ५२ ॥

यत्कलकप्रस्तार कृत तत्कलकप्रस्तारकृते तावन्त एव लघव कार्याः । चकारोऽवधारणार्थं । तत्र च दत्त्वा पूर्वयुगाङ्कान् एक-द्वि-त्रि-पञ्चाष्ट-त्रयोदशादीन् । यथा— । । । । । । तत पृष्ठाङ्क अन्त्ये—शेषे लोपयेत् ॥ ५३ ॥

एव चोर्वरितोर्वरिताना अवशिष्टानामङ्काना यत्र यत्राङ्के भागो लभ्यते स स एवाङ्क शेषाङ्के लोपयितु शक्यते । स. पुनस्तदध स्थितकल परमात्रां च गृहीत्वा गुरुतामुपागच्छेत्—गुरुर्भवतीत्यर्थ । गुरुत्वे चाऽध स्थितकलाया अपि सग्रहोऽर्थाद् भवतीति । अन्यथा लघुगुरुरित्येव ब्रूयादिति ॥ ५४ ॥

अनेन व्याख्यानेनाव्युत्पन्नतम' शिष्यो बोधयितु न शक्यत इति स्फुटीकृत्य सोदाहरण विलिख्यते । यथा—

षट्कलप्रस्तारे द्वितीयस्थाने कीदृशो गण ? इति प्रश्ने, पूर्वोक्ताङ्कसहिता लघुरूपा. षट्कला स्थापनीया । पूर्वयुगलसदृशा अङ्का देया । तत शेषाङ्के त्रयोदशे १३ पृष्ठाङ्कलोपे द्वितीयाङ्क २ लोपे सति एकादशावशिष्टा ११ भवन्ति । तत्राव्यवहिताष्टलोपे शेषकलाद्वयेन एको गुरुर्भवति । अवशिष्टाङ्क त्रय भवति । तत्र च पञ्चलोपाशक्यत्वात् परमात्रा गृहीत्वा गुरुर्भवतीत्युक्तत्वाच्च त्रिलोपे ३ तृतीयचतुर्थाभ्यामपरो गुरुर्भवति । शेषाङ्को नावशिष्यत इति । प्रथम लघुद्वयमेव । तथा चादौ लघुद्वयमनन्तर गुरुद्वयमित्येतादृशो । । ऽ ऽ द्वितीयो गणो भवतीत्यर्थं । एवमन्यत्रापि ।

यद्यप्याद्यन्तयोस्सन्देहाभावस्तथापि प्रथमे कीदृशो गण ? इति प्रश्ने, गुरुत्रयात्मक प्रथम गण लिखित्वा तत्रोपर्यध क्रमेण पूर्वयुगाङ्का एक-द्वि-त्रि-पञ्चाष्ट-

पञ्चकलप्रस्तारो यथा-

। ऽ ऽ	१
ऽ । ऽ	२
। । । ऽ	३
ऽ ऽ ।	४
। । ऽ ।	५
। ऽ । ।	६
ऽ । । ।	७
। । । । ।	८

षट्कलप्रस्तारो यथा—

ऽ ऽ ऽ	१
। । ऽ ऽ	२
। ऽ । ऽ	३
ऽ । । ऽ	४
। । । । ऽ	५
। ऽ ऽ ।	६
ऽ । ऽ ।	७
। । । ऽ ।	८
ऽ ऽ । ।	९
। । ऽ । ।	१०
। ऽ । । ।	११
ऽ । । । ।	१२
। । । । । ।	१३

मात्राणामुद्दिष्ट द्वितीयस्य

१	२
।	ऽ
	३

मात्राणामुद्दिष्ट प्रथमप्रस्तरस्य

१	३	५	८
	।	।	ऽ
२			१३

लोपो नष्टाङ्क ९

इति श्रीम[illegible]-
चूडामणि-साहित्यार्णवकर्णधार-छन्दःशास्त्रपरमाचार्य-श्रीलक्ष्मीनाथभट्टारक-
विरचिते श्रीवृत्तमौक्तिके वार्तिके दुष्करोद्धारे मात्राप्रस्तारो-
द्दिष्टनष्टसमुद्धारो नाम प्रथमो विश्रामः ॥ १ ॥

तृतीयो विश्रामः

अथ तथैव क्रमप्राप्त वर्णानामुद्दिष्टमाह—द्विगुणानिति श्लोकेन ।

द्विगुणानङ्कान् दत्त्वा वर्णोपरि लघुशिर स्थितानङ्कान् ।
एकेन पूरयित्वा वर्णोद्दिष्ट विजानीत ॥ ५५ ॥

वर्णानामुपरिप्रसृताना इति अध्याहार्यम् । तथा च तेषामुपरि द्विगुणानङ्कान् दत्त्वा ततो लघुशिर स्थितानङ्कान् सयोज्येति शेष । तथा च त–सयुक्त अङ्क एकेनाधिकेन अङ्केन पूरयित्वा–एकीकृत्य वर्णोद्दिष्ट विजानीत शिष्या इति शेष ॥ ५५ ॥

एवमुक्त भवति । एकाक्षरादिषड्विंशत्यक्षरावधिप्रस्तारेषु प्रतिप्रस्तारमाद्य-भेदे लघ्वाभावादुद्देश सर्वथा नास्त्येव । अतो द्वितीयभेदादारभ्य उपान्त्यभेद-पर्यन्त उद्देशो भवतीति तत्प्रकारबोधनार्थं शिष्यानभिमुखीकृत्य प्रस्तारा निर्द्धार-पूर्वक वर्णोद्दिष्टमुच्यते । तथा च—

एकाक्षरप्रस्तारे भेदद्वय भवति । तत्र प्रथमभेदस्य उद्देशासम्भवात् । द्वितीय-भेदे च एकलघुरूपे द्वितीयाक्षराभावादेकमेवाङ्क तस्मिन् दत्त्वा तदुपरि एक-मङ्कमधिक दत्त्वा द्वितीयभेदमुद्दिशेत् । इत्येकाक्षरप्रस्तार ।

द्व्यक्षरप्रस्तारे भेदचतुष्टय ४ भवति । तत्र द्वितीये एको लघुरेकोगुरुरित्येव भेदे । ऽ, प्रथमे लघावेकोऽङ्को, द्वितीये गुरौ द्वितीयोऽङ्को दातव्य , तदनु लघोरुपरि एकमधिक दत्त्वा द्वितीयभेद उद्दिशेत् । एव तृतीये एको गुरुरेको लघुरित्येव भेदे ऽ ।, प्रथमे गुरावेकोऽङ्को, द्वितीये लघौ द्वितीयोऽङ्कोऽन्त्यस्ततो लघोरुपरि स्थिते द्वितीयेऽङ्के एकमधिक दत्त्वा तृतीय भेदमुद्दिशेत् । एवमेव लघुद्वयात्मके ॥ चतुर्थे भेदे प्रथमे लघौ प्रथमाऽङ्क दत्त्वा, द्वितीयेऽपि लघौ द्वितीयमङ्क विधाय तयोरुपरिस्थयो प्रथमद्वितीयाङ्कयोर्मेलने कृते जाते त्रिके एकाङ्क अधिक दत्त्वा तस्य चतुष्टय सम्पाद्य चतुर्थ भेदमुद्दिशेदिति । इति द्व्यक्षरप्रस्तार ।

त्र्यक्षरप्रस्तारे तु भेदाष्टक ८ भवति । तत्र एको लघु द्वौ गुरू चेति गण कुत्रास्तीति प्रश्ने कृते पृष्ठ गण । ऽ ऽ लिखित्वा तत्र प्रथमे लघौ प्रथमाङ्को दातव्य , द्वितीये गुरौ तद्द्विगुणो द्वितीयोऽङ्को दातव्य , तृतीये गुरौ तद्द्विगुण-श्चतुर्थाऽङ्को दातव्य । अत्र सर्वत्र प्रथमादिपदेन वर्णो लक्ष्यते, ततो लघोरुपरि योऽङ्कस्तस्मिन्नेकमधिक दत्त्वा तेन सह एकीकृत्य द्व्यङ्को भवति तस्मात् द्वितीयो यगणास्त्र्याक्षरप्रस्तारे गणो भवतीत्येव वेदितव्यम् ।

त्रयोदशाकारा देयाः । यथा— ऽ ऽ ऽ तत्र शेषाङ्के त्रयोदशात्मनि १३ गुरुशीर्षस्था ये अङ्का एकाष्टरूपास्तैर्भावो द्वादशाङ्को लोप्यस्तथा च लुप्ते तस्मिन् प्रथमो गणस्तादृशो भवतीति वेदितव्यम् ।

अथ च त्रयोदशस्थाने कीदृशो गणः ? इति प्रश्ने, पूर्व[व]दिव लघूनामुपर्यङ्कान् दत्त्वा शेषाङ्के त्रयोदशात्मनि पृष्टाङ्कलोपे अवशिष्टाङ्काभावात् गुरुकल्पना । अतो लघव एवावशिष्यन्ते इति ।।।।।।

चतुर्दशादिप्रश्ने चाङ्कलोपासम्भवादसत्यत्वमात्र वाच्यम् । तदधिकप्रस्ताराभावादित्थं च मात्राप्रस्तारे सर्वत्रैव शेषाङ्कसमसंख्यागणा भवन्तीत्यपि निश्चीयते । इति गुरुमुखादवगतार्थो लिखित इति शिवम् ।

मात्राणां नष्टम्

१	२	३	५	८	१३
।	।	।	।	।	।
		।	।	ऽ	ऽ

द्वितीयः प्रत्ययः

इति श्रीमन्मण्डनमण्डनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिक-चक्रचूडामणि-साहित्यार्णवकर्णधार-छन्दःशास्त्रपरमाचार्य-श्रीलक्ष्मीनाथ-भट्टारकविरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारे मात्रा-प्रस्तारनष्टगणसमुद्धारो नाम द्वितीयो विभागः ॥ २ ॥

तृतीयो विश्रामः

अथ तथैव क्रमप्राप्त वर्णानामुद्दिष्टमाह—द्विगुणानिति श्लोकेन ।

द्विगुणानङ्कान् दत्त्वा वर्णोपरि लघुशिर स्थितानङ्कान् ।
एकेन पूरयित्वा वर्णोद्दिष्ट विजानीत ॥ ५५ ॥

वर्णानामुपरिप्रसृताना इति अध्याहार्यम् । तथा च तेषामुपरि द्विगुणानङ्कान् दत्त्वा ततो लघुशिर स्थितानङ्कान् सयोज्येति शेष । तथा च त-सयुक्त अङ्क एकेनाधिकेन अङ्केन पूरयित्वा-एकीकृत्य वर्णोद्दिष्ट विजानीत शिष्या इति शेष ॥ ५५ ॥

एवमुक्त भवति । एकाक्षरादिषड्विंशत्यक्षरावधिप्रस्तारेषु प्रतिप्रस्तारमाद्य-भेदे लघ्वाभावादुद्देश सर्वथा नास्त्येव । अतो द्वितीयभेदादारभ्य उपान्त्यभेद-पर्यन्त उद्देशो भवतीति तत्प्रकारबोधनार्थ शिष्यानभिमुखीकृत्य प्रस्तारा निर्द्धार-पूर्वक वर्णोद्दिष्टमुच्यते । तथा च—

एकाक्षरप्रस्तारे भेदद्वय भवति । तत्र प्रथमभेदस्य उद्देशासम्भवात् । द्वितीय-भेदे च एकलघुरूपे द्वितीयाक्षराभावादेकमेवाङ्क तस्मिन् दत्त्वा तदुपरि एक-मङ्कमधिक दत्त्वा द्वितीयभेदमुद्दिशेत् । इत्येकाक्षरप्रस्तार ।

द्व्यक्षरप्रस्तारे भेदचतुष्टय ४ भवति । तत्र द्वितीये एको लघुरेकोगुरुरित्येव भेदे । ऽ, प्रथमे लघावेकोऽङ्को, द्वितीये गुरौ द्वितीयोऽङ्को दातव्य , तदनु लघोरुपरि एकमधिक दत्त्वा द्वितीयभेद उद्दिशेत् । एव तृतीये एको गुरुरेको लघुरित्येव भेदे ऽ ।, प्रथमे गुरावेकोऽङ्को, द्वितीये लघौ द्वितीयोऽङ्कोऽन्त्यस्ततो लघोरुपरि स्थिते द्वितीयेऽङ्के एकमधिक दत्त्वा तृतीय भेदमुद्दिशेत् । एवमेव लघुद्वयात्मके ॥ चतुर्थे भेदे प्रथमे लघौ प्रथमाऽङ्क दत्त्वा, द्वितीयेऽपि लघौ द्वितीयमङ्क विधाय तयोरुपरिस्थयो प्रथमद्वितीयाङ्कयोर्मेलने कृते जाते त्रिके एकाङ्क अधिक दत्त्वा तस्य चतुष्टय सम्पाद्य चतुर्थ भेदमुद्दिशेदिति । इति द्व्यक्षरप्रस्तार ।

त्र्यक्षरप्रस्तारे तु भेदाष्टक ८ भवति । तत्र एको लघु. द्वौ गुरू चेति गण कुत्रास्तीति प्रश्ने कृते पृष्ठ गण । ऽ ऽ लिखित्वा तत्र प्रथमे लघौ प्रथमाङ्को दातव्य , द्वितीये गुरौ तद्द्विगुणो द्वितीयोऽङ्को दातव्य , तृतीये गुरौ तद्द्विगुण-श्चतुर्थाऽङ्को दातव्य । अत्र सर्वत्र प्रथमादिपदेन वर्णो लक्ष्यते, ततो लघोरुपरि योऽङ्कस्तस्मिन्नेकमधिक दत्त्वा तेन सह एकीकृत्य द्व्यङ्को भवति तस्मात् द्वितीयो यगणाख्याक्षरप्रस्तारे गणो भवतीत्येव वेदितव्यम् ।

एवं चात्रैव प्रथमं लघुद्वय ततो गुरुरित्येवं गण ।।ऽ कस्मिन् स्थानेऽस्तीति प्रश्ने कृते तदाकार गण १, २ लिखित्वा प्रथमे लघावेकाङ्कं दत्त्वा १, द्वितीयेऽपि तद्द्विगुण द्व्यङ्क २ विधाय तृतीये गुरौ तद्द्विगुण चतुर्थमङ्क कृत्वा ४ ततो लघोरुपरिस्थयो प्रथमद्वितीयाङ्कयो संयोगकृतत्रय भवति ३ तस्मिन्नेकेऽधिके दत्ते सति चतुरङ्को भवति ४ । अतश्चतुर्थस्सगणास्त्र्यक्षरप्रस्तारे गणो भवतीति ज्ञेयम् । एवमन्यत्र । इति त्र्यक्षरप्रस्तार ।

अथ चतुरक्षरप्रस्तारे षोडश भेदा १६ भवन्ति । तत्र द्वौ गुरू एको लघुरेको गुरुरित्येवंरूपो गण कुत्रास्तीति प्रश्ने कृते त पृष्ठ गण लिखित्वा ऽऽ।ऽ तत्र प्रथमगुरोरुपरि प्रथमाङ्को १ देय ततो द्विगुणान् द्विगुणान् अङ्कान् दत्त्वा, ततश्च द्वितीयगुरोरुपरि द्वितीयोऽङ्को देय तृतीयो लघौ चतुरङ्क चतुर्थो गुरा वष्टमाङ्को देय ८। इति द्वैगुण्यम् । ततो लघोरुपरिस्थचतुर्थोऽङ्कस्त एकेन पूर यित्वा तस्य पञ्चत्वं विधाय तत्समानाङ्कस्थाने स गणोऽस्तीति विज्ञातव्यम् । इत्युद्दिष्टं वर्णप्रस्तारे प्रथमप्रत्ययस्वरूप विजानीत शिष्या इति ।

अत्र सर्वत्र गणशब्देन तत्तद्भेदो भण्यते । तथा चात्रैव प्रथम लघुत्रय मनन्तर एको गुरुरित्येवमाकारको गण कुत्र स्थानेऽस्तीति प्रश्ने कृते तदाकारं गणं लिखित्वा ।।।ऽ तत्र प्रथमलघोरुपरि प्रथमाङ्कं दत्त्वा ततोऽपि द्विगुणान् द्विगुणान् अङ्कान् दत्त्वा तदनु द्वितीयलघोरुपरि तद्द्विगुणं द्वितीयमङ्क विलिख्य तृतीये लघौ तद्द्विगुणं चतुरङ्क विधाय चतुर्थे गुरावष्टमाङ्क तद्द्विगुणं दत्त्वा एवं द्विगुणत्व सम्पाद्यत । लघुशिरःस्थितान् एक-द्वि-चतुरङ्कान् एकीकृत्य जात सप्ताङ्क ७ एकेन प्रक्षिप्तेन पूरयित्वा तस्याष्टत्व विधाय तत्समानाङ्कस्थाने स गणोऽस्तीति ज्ञेयम् । इत्युद्दिष्टं विस्पष्ट विजानीत विज्ञा । इति चतुरक्षरप्रस्तार ।

किञ्च—

विपरीतप्रस्तारोद्दिष्टे क्रियमाणे लघुशिरःस्थितान् अङ्कान् इत्यत्र गुरुशिरः स्थितान् इति पाठस्तत्रोद्दिष्टप्रकारः सुगम । एवञ्च सर्वप्रत्ययेषु पाठविपर्यय कार्य इत्युपदिश्यते । एवञ्च ते सर्वेऽपि प्रत्यया विपरीता भवन्तीति रहस्यान्तरम् । एवमन्येष्वपि प्रस्तारेषु तत्तद्गमस्थानायस्वानं बोद्धव्यमिति विदग्धबुद्धिभि । इति संक्षेप । इति सर्वमवदातम् ।

एकाक्षरप्रस्तारो यथा–

ऽ   १

।   २

द्व्यक्षरप्रस्तारो यथा–

ऽ ऽ	१
। ऽ	२
ऽ ।	३
। ।	४

त्र्यक्षरप्रस्तारो यथा–

ऽ	ऽ	ऽ	१
।	ऽ	ऽ	२
ऽ	।	ऽ	३
।	।	ऽ	४
ऽ	ऽ	।	५
।	ऽ	।	६
ऽ	।	।	७
।	।	।	८

चतुरक्षरप्रस्तारो यथा–

ऽ	ऽ	ऽ	ऽ	१
।	ऽ	ऽ	ऽ	२
ऽ	।	ऽ	ऽ	३
।	।	ऽ	ऽ	४
ऽ	ऽ	।	ऽ	५
।	ऽ	।	ऽ	६
ऽ	।	।	ऽ	७
।	।	।	ऽ	८
ऽ	ऽ	ऽ	।	९
।	ऽ	ऽ	।	१०
ऽ	।	ऽ	।	११
।	।	ऽ	।	१२
ऽ	ऽ	।	।	१३
।	ऽ	।	।	१४
ऽ	।	।	।	१५
।	।	।	।	१६

वर्णाना उद्दिष्ट तथैव प्रथम ।

[इति] श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारप्रस्तारे विस्तारप्रकार॰ ।

इति श्रीमन्नन्दनन्दनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिक-
चक्रचूडामणि-साहित्यार्णवकर्णधार-छन्द शास्त्रपरमाचार्य-श्रीलक्ष्मी-
नाथभट्टारकविरचिते श्रीवृत्तमौक्तिक-वार्त्तिकदुष्करो-
द्धारे वर्णप्रस्तारोद्दिष्टगणसमुद्धारो नाम
तृतीयो विश्राम. ॥ ३ ॥

चतुर्थो विश्राम

अथ क्रमप्राप्तं तत्रैव वर्णानां नष्टमाह—'नष्टे पृष्ठे' इति श्लोकेन ।

> नष्टे पृष्ठे भागः कर्तव्यः पृष्ठसंख्यायाः ।
> समभागे लं कुर्याद् विषमे दत्त्वैकमानयेद् गुरुकम् ॥ ५६ ॥

नष्टे—अदृष्टरूपे पृष्ठे सति पृष्ठसंख्यायाः—पृष्ठायाः संख्यायाः भागः कर्तव्यः—विधेयः । तत्र समभागे सति लं—लघुं कुर्यात् विषमेऽवशिष्टे सतीति शेषः । एकं दत्त्वा तस्यापि भागं कृत्वा गुरुकमानयेत्—गुरुं लिखेदित्यर्थः । एवं कृते सति प्रकृतप्रस्तारस्थितादृष्टरूपगणस्थानसिद्धिर्भवतीति भावः ॥ ५६ ॥

इदमत्रानुसन्धेयम्—

अथ तावद् भागो नाम अर्धाङ्कस्य भागसंख्यापूरणम् । तथाहि सोदाह रणमुच्यते । यथा–

चतुरक्षरप्रस्तारे षष्ठो गणः किमाकारः ? इति प्रश्ने षडङ्कभागं कृत्वा तदर्धं त्रयं ३ स्थापनीयम् । अत्र च समो भागः उभयकोटिसाम्यात् । अत एको १ गुरुर्लेख्यः । अनन्तरं अवशिष्टस्य त्रयस्य विषमत्वात् एकं १ दत्त्वा चतुष्टयं सम्पाद्य तस्य भागं कृत्वा द्वयं २ स्थापनीयम् । तदा एको गुरुर्लेख्यः, ततो द्वयोर्भागं कृत्वा एकं १ स्थापनीयम् । तदा एको १ लघुर्लेख्यः । ततोऽप्यवशिष्टे विषमे एकं १ दत्त्वा द्वित्वं सम्पाद्य तस्यापि भागं कृत्वा एकमेव स्थापनीयम् । तदा एको गुरुर्लेख्यः । एवञ्च प्रथमं लघुरनन्तरं गुरुस्ततो लघुरन्ते गुरुरेवमाकार श्चतुरक्षरप्रस्तारे षष्ठो । ऽ । ऽ गण इति बोद्धव्यम् ।

तथा चात्रैव सप्तमस्थाने किमाकारको गणः ? इति प्रश्ने सप्तमस्य विषमत्वात् पूर्वमेको गुरुर्लेख्यः । ततः सप्तसु एकं दत्त्वा अष्टौ कृत्वा विभागः कार्यस्तेन अवशिष्टाश्चत्वारः । अयं च समो भागस्तत एको १ लघुर्लेख्यः । पुनश्चतुष्टयस्यावशिष्टस्य भागं कृत्वा द्वयं समं स्थापनीयम् । अत एको लघुरेव लेख्यः । अनन्तरं अवशिष्टस्य एकाङ्कस्य विषमीभूतत्वाद् गुरुरेव लेख्यः । एवञ्च प्रथमं गुरुरनन्तरं लघुस्ततोऽपि लघुरेव चरमे च गुरुरेवं ऽ । । ऽ आकारश्चतुरक्षर प्रस्तारे सप्तमो गण इति च विज्ञेयम् । एवं पुनः पुनरपि समे विभजनीये लघु र्लेख्यः । विषमे एकं दत्त्वा भागे कृते गुरुर्लेख्यः । प्रकृते च सप्तावधिको गण

ायातीति षड्विंशतिवर्णप्रस्तारपर्यन्तं विषमस्थलेषु एकैक दत्त्वा गुरुर्लेख्य
ते सक्षेपः । सर्वमिदमतिमञ्जुलवञ्जुलवर्णनष्टमिति शिवम् ।

वर्णाना नष्टम्

। ऽ । ऽ ६

ऽ । । ऽ ७

तथैव द्वितीयप्रत्ययः ।

इति श्रीमन्नन्दनन्दनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिकचक्रचूडा-
मणिसाहित्यार्णवकर्णधार-छन्द.शास्त्रपरमाचार्यश्रीलक्ष्मीनाथभट्टारक-
विरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारवर्णप्रस्तार-
नष्टगणसमुद्धारो नाम चतुर्थो विश्राम. ॥ ४ ॥

पञ्चमो विश्राम

1

अथ तृतीयप्रत्ययस्वरूपवर्णमेरुमाह—श्लोकद्वयेन कोष्ठानिति ।

> कोष्ठानेकाधिकान् वर्णे कुर्यादाद्यन्तयो पुन ।
> एकाङ्कमुपरिस्थाङ्कद्वयैरन्यान् प्रपूरयेत् ॥ ५७ ॥
> वर्णमेरुरयं सर्वगुर्वादिगणबोधकम् ।
> प्रस्तारसंख्याज्ञानञ्च फल तस्योच्यते बुधै ॥ ५८ ॥

तत्र च क्रमाद् एकाधिकान् कोष्ठान् वर्णैरक्षरैरुपलक्षितान् पुनराद्यन्तयो-रेकाङ्क च कुर्याद् विलिख्य रचयेत् । ततश्च मध्यस्थकोष्ठकस्योपरि स्थिताङ्क द्वयैरेकीकृतैरित्यर्थ । अन्यान् शून्यान् कोष्ठान् प्रपूरयेत् ॥ ५७ ॥

एवं कृते सत्ययं वर्णमेरुर्मेरुरिव भवतीति शेष । तस्यैवप्रकारेण विरचि तस्य मेरोर्बुधैः—अधीतछन्द शास्त्रै माध्यर्थाभिज्ञतात्पर्याभिज्ञैरिति यावत् । सर्व गुरुरादौ येषामेवविधानां गणानां वेदक—ज्ञापकं गणबोधकमिति यावत् प्रस्तार संख्याज्ञानं च यतो भवतीति उभयमपि फलविशेषणम् । तथा च एतत्यविशस्य कोष्ठगत-तत्तद्वर्णप्रस्तारसंख्याज्ञापक फलं उच्यते—प्रकाश्यत इत्यर्थ ॥५८॥

अस्य निर्गलितार्थस्त्वेव समुल्लसति—

एकाक्षरादिषड्विंशत्यक्षरपर्यन्त स्वस्वप्रस्तारे कति सर्वगुरव कत्येकादि गुरवः, कति सर्वलघव, कति वा प्रस्तारसंख्येति प्रश्ने कृते वर्णमेरुणा प्रत्युत्तरं देयम् । तत्र एकाक्षरादिक्रमेण यावदिष्ट कोष्ठकान् विरचय्य आद्यावन्ते च कोष्ठके प्रथमाङ्को दातव्य । ततो मध्यस्थकोष्ठके च तदीयशिरःकोष्ठकद्वयाङ्क शृङ्खला-बन्धन्यायेन एकीकृत्य परं शून्यं कोष्ठक एकीकृताङ्के पूरयेत् । एवं अन्यत्रापि पूरणीये कोष्ठके कोष्ठानामुपरिस्थितकोष्ठद्वयाङ्कमुक्तन्यायेन पूरणं विधेयं इति सक्षेप । एव पूरितेषु कोष्ठेषु एकाक्षरप्रस्तारे आद्यावेकगुर्वात्मकस्तदन्ते च एकलघ्वात्मक सकेत इति ।

द्व्यक्षरप्रस्तारे तु सर्वगुरुरादौ त्रिगुरु-द्विगुरुर्वारिभावात् स्थानद्वयेऽप्येक-गुरुरन्ते च सर्वलघुरिति ।

त्र्यक्षरप्रस्तारे चादौ सर्वगुरुस्त्रिगुरोरन्यभासम्भवात् स्थानत्रये द्विगुरु स्थान त्रये च एकगुरुरन्ते च सर्वलघुरिति ।

चतुरक्षरप्रस्तारेऽपि सर्वगुरुरादौ च चतुर्गुरोरन्यभावात् स्थानचतुष्के त्रिगुरु स्थानषट्के द्विगुरु स्थानचतुष्टये च एकगुरुरन्ते च सर्वलघुरिति ।

एवमनया प्रणालिकया सुधीभि षड्विंशत्यक्षरप्रस्तारपर्यन्त अङ्कसञ्चार-प्रकार समुन्नेय ।

किञ्चात्र तत्तत्पङ्क्तिकोष्ठगततत्तद्वर्णप्रस्तारपिण्डसख्यापि तत्तत्पङ्क्ति-स्थिताङ्कै समुल्लसतीति वर्णमेरुरय मेरुरिवादिभागसकुचितान्तविस्ताररूपो विभातीति श्रीगुरुमुखादवगतो वर्णमेरुलिखनक्रमप्रकार प्रकाशित इति शिवम् ।

श्रीलक्ष्मीनाथभट्टेन रायभट्टात्मजन्मना ।
कृतो मेरुरय वर्णप्रस्तारस्यातिसुन्दर ॥

अस्य स्वरूपमुदाहरणमत्र द्रष्टव्यम् ।

वर्णमेरुर्यथा तृतीयः

१	१								
१	२	१							
१	३	३	१						
१	४	६	४	१					
१	५	१०	१०	५	१				
१	६	१५	२०	१५	६	१			
१	७	२१	३५	३५	२१	७	१		
१	८	२८	५६	७०	५६	२८	८	१	
१	९	३६	८४	१२६	१२६	८४	३६	९	१

नववर्णमेरुरयम् । एव अग्रेपि समुन्नेय सुधीभि ।

इति श्रीमन्नन्दनन्दनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिक-चक्रचूडामणि-साहित्यार्णवकर्णधार-छन्द शास्त्रपरमाचार्य-श्रीलक्ष्मीनाथ-भट्टारकविरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारे एकाक्षराद् षड्विंशत्यक्षरावधिवर्णप्रस्तारमेरूद्धारो नाम पञ्चमो विश्राम ॥५॥

षष्ठो विश्राम

अथ मेरुगर्भां चतुर्थप्रत्ययस्वरूपां वर्णानां पताकामाह—श्लोकत्रयेण दत्त्वेत्यादि ।

> दत्त्वा पूर्वयुगाङ्कान् पूर्वाङ्के योजयेत्परान् ।
> अङ्कः पूर्वं यो वै भृतस्तत्र पङ्क्तिसञ्चारः ॥५९॥
> अङ्का पूर्व भृता येन तमङ्कभरणं त्यजेत् ।
> अङ्कस्य पूर्वं यः सिद्धस्तमङ्कं नैव साधयेत् ॥६०॥
> प्रस्तारसंख्यया वर्णमङ्कविस्तारकल्पना ।
> पताका सर्वगुर्वादिवेदिकेयं विशिष्य तु ॥ ६१ ॥

तत्र पूर्वयुगाङ्कान् एक-द्वि-चतुरष्टादीन् अङ्कान् प्रथम दत्त्वा पूर्वाङ्कैरेकधा द्विभिरपरान् त्र्यादीन् अङ्कान् योजयेत् विमृयात् भरणं कुर्यादिति यावत् । किञ्च य एवाङ्कः पूर्वं भृत-पूरित ततस्तस्मादेव अङ्कात् वै-नियमेन पङ्क्तिसञ्चारः विधेय इति शेष ॥ ५९ ॥

अङ्का इति । नियमान्तरं च येन-अङ्केन पूर्वमङ्का भृताः-पूरिताः तमङ्कं पुनर्भरणं त्यजेत् प्रयोजनाभावात् । किञ्च, अङ्कस्य पूर्वं यः सिद्धस्तमङ्कं पुनर्न साधयेत्—न स्थापयेदित्यर्थ ॥ ६० ॥

पताकाप्रयोजनमाह—

प्रस्तारेति । एवं प्रस्तारसंख्यया वर्णाङ्कविस्तारकल्पना भवतीति शेष । एतादृशी चेय पताका विशिष्य-विशिष्टां कृत्वा तु-अवधारणे, सर्वगुर्वादिसर्व सम्भवदेविका-ज्ञापिका विज्ञातव्यैवेति वाक्यार्थ ॥ ६१ ॥

एवमुक्तं भवति—

भो शिष्या ! उद्दिष्टसदृशा अङ्का देयाः । पूर्वाङ्कैः परभरणं कुर्यात् पूरयितव्य । पङ्क्तेः प्रधानाङ्कस्य पश्चात् स्थिता पूर्वाङ्का भरणं पूरणम् । एकमाधिकस्य अङ्कस्य प्राप्तौ सा पङ्क्तिरेव तदङ्कभरणे त्यज्यत इत्यवधेयम् ।

एवञ्च मेरुवत्प्रस्तारसंख्यया पताकाङ्का वर्धयितव्याः । तथाहि—

चतुर्वर्णप्रस्तारे एक-द्वि-चतुरष्टाङ्का देया । यथा—१।२।४।८। अत्र काङ्कस्य पूर्वाङ्कासम्भवात् द्वितीयाङ्कादारभ्य पंक्ति पूर्यते । तत्र

पूर्वाङ्का एकाङ्क एव प्रस्तारादिभूत सर्वगुरुरूप, तस्य परे द्वितीयादय ते च अव्यवहितानतिक्रमेण पूर्यन्ते । तथा च एकेन द्वाभ्या मिलित्वा त्र्यङ्को भवति स. द्वितीयाङ्काधस्तात् स्थापनीय । तत एकेन अष्टभिश्च मिलित्वा नवाङ्को भवति स पञ्चमाङ्काध स्थात् स्थापनीय । तत पक्तिपरित्याग: । मेरौ त्रिगुरूणा रूपाणा चतु सख्यादर्शनादिति भाव । एतेन चतुर्वर्णप्रस्तारे प्रथम रूप सर्वगुरु ब्रूयात् । द्वि-त्रि-पञ्च-नवस्थानस्थानि चतूरूपाणि त्रिगुरूणि जानीयादिति । एवमङ्कचतुष्टय साधयित्वा, ततश्चतुरङ्कस्य अधस्तात् पूरित-पक्तिस्था पराङ्कमिलिता षडङ्का देया । तत्र प्रथम पूरित एवेति त्यज्यते । ततो द्वाभ्या चतुर्भिर्मिलित्वा षष्ठोऽङ्को ६ भवति, स चतुरङ्काधस्तात् स्थापनीय । ततः त्रिभि चतुर्भि सम्भूय सप्तमोऽङ्को भवति, स च षडङ्काधस्तात् स्थापनीय । एव च पञ्चभिश्चतुर्भिर्मिलित्वा जायमानो नवाङ्को न स्थापनीय । 'अङ्कश्च पूर्वं य' सिद्धस्तमङ्क नैव साधयेत्' इत्युक्तत्वात् सिद्धस्य साधनायोगादिति युक्ति-सिद्धत्वाच्च इति । ततो द्वाभ्या अष्टभिर्मिलित्वा दशाङ्को भवति, स च सप्ताङ्का-धस्तात् स्थापनीय. । ततश्च त्रिभिरष्टभिर्मिलित्वा एकादशाङ्को भवति, स च दशाङ्काधस्तात् स्थापनीय । तत पञ्चभिरष्टभिर्मिलित्वा त्रयोदशाङ्को भवति, स चान्त एकादशाङ्काधस्तात् स्थापनीय इति । तत पङ्क्तिपरित्याग । मेरु-मख्यापरिमाणदर्शनादिति पूर्ववद् हेतुरिति भाव । एतेन च चतुर्वर्णप्रस्तारे चतु-षट्-सप्त-एकादश-त्रयोदशस्थानस्थानि षड्रूपाणि द्विगुरूणि जानीयादिति । एवमङ्कषट्क पूर्ववदेव साधयित्वा, ततोऽष्टाङ्काधस्तात् पूरितपक्तिस्था पराङ्क-मि लताश्चत्वारोऽङ्का देया तथा च चतुर्भिरष्टभि सम्भूय द्वादशाङ्को भवति, स चाष्टमाङ्काधस्तात् स्थापनीय । तत षड्भिरष्टभिश्च सभूय चतुर्दशाङ्को भवति, स तु द्वादशाङ्काधस्तात् स्थापनीय । तत सप्तभिरष्टभिश्च सभूय पञ्चदशाङ्को भवति, सोऽपि चतुर्दशाङ्काधस्तात् स्थापनीय । ततोऽपि पक्तिपरित्याग । मेरावेकगुरूणा चतुस्सख्यादर्शनादिति भाव । एतेन चतुर्वर्णप्रस्तारे अष्टमद्वादश-चतुर्दश-पञ्चदशस्थानस्थानि रूपाणि एकगुरूणि ब्रूयादिति । एव अङ्कचतुष्टय साधयित्वा, ततो दशभिरष्टभिस्तु प्रस्ताराधिकाङ्कसभवान्नष्टादशाङ्कसञ्चार । तर्हि षोडशाङ्क सर्वलघुरूप १६ क्वास्तामित्यपेक्षायामष्टमाङ्काग्रे दीयतां सर्व-लघुज्ञानार्थमिति सम्प्रदाय । तथा च प्रथमाङ्कचरमाङ्कयो सदृशन्यायेन अवस्थान भवतीति ज्ञेयम् ।

पताकाप्रयोजन तु मेरौ चतुर्वर्णप्रस्तारस्य एक रूप चतुर्गु रूपलक्षितम् । सर्वगुर्वात्मक चत्वारि त्रिगुरूणि रूपाणि, षड् द्विगुरूणि रूपाणि, चत्वारि एक-गुरूणि रूपाणि, एक सर्वलघ्वात्मक रूपमस्ति ।

षष्ठो विश्राम

अथ मेरुगर्भां चतुर्वर्णप्रस्तारस्य वर्णानां पताकामाह—श्लोकत्रयेण दत्त्वेत्यादि ।

> दत्त्वा पूर्वयुगाङ्कान् पूर्वाङ्के योजयेत्परान् ।
> अङ्कः पूर्वं यो वै भूतस्तत पंक्तिसञ्चारः ॥५९॥
> अङ्का पूर्वं भृता येन तमङ्कमरणं त्यजेत् ।
> अङ्कश्च पूर्वं यः सिद्धस्तमङ्कं नैव साधयेत् ॥६०॥
> प्रस्तारसंख्यया चायमङ्कविस्तारकल्पना ।
> पताका सर्वगुर्वादिविवेकिकेयं विशिष्य तु ॥ ६१ ॥

तत्र पूर्वयुगाङ्कान् एक-द्वि-चतुरष्टादीन् अङ्कान् प्रथमं दत्त्वा पूर्वाङ्कैरेकद्या त्रिभिरपरान् त्र्यादीन् अङ्कान् योजयेत् बिभृयात् भरणं कुर्यादिति यावत् । किञ्च य एवाङ्कः पूर्वं भृत-पूरितः ततस्तस्मादेव अङ्कात् वै-निश्चयेन पंक्तिसञ्चारः विधेय इति शेषः ॥ ५९ ॥

अङ्का इति । नियमान्तरं च येन-अङ्केन पूर्वमङ्का भृता-पूरिता तमङ्कं पुनर्भरणं त्यजेत् प्रयोजनाभावात् । किञ्च, अङ्कश्च पूर्वं यः सिद्धस्तमङ्कं पुनर्न साधयेत्—न स्थापयेदित्यर्थः ॥ ६० ॥

पताकाप्रयोजनमाह—

प्रस्तारेति । एवं प्रस्तारसंख्यया अयमाङ्कविस्तारकल्पना भवतीति शेषः । एतादृशी चेयं पताका विशिष्य-विशिष्टां कृत्वा तु—अवधारणे सर्वगुर्वादिसर्वसम्पन्नवेदिका-ज्ञापिका विज्ञातव्यैवेति वाक्यार्थः ॥ ६१ ॥

एवमुक्तं भवति—

भो शिष्या ! उद्दिष्टसदृशा अङ्का देयाः । पूर्वाङ्कैः परभरणं कुर्यात् पूरयितव्यः । पंक्तौ प्रथमाङ्कस्य पश्चात् स्थिता पूर्वाङ्का भरणं पूरणम् । एकत्राधिकस्य अङ्कस्य प्राप्तौ सा पंक्तिरेव तदङ्कभरणे त्यज्यत इत्यवधेयम् ।

एवञ्च मेरुस्थप्रस्तारसंख्यया पताकाङ्का वर्द्धयितव्याः । तथाहि—

चतुर्वर्णप्रस्तारे एक-द्वि-चतुरष्टाङ्का देयाः । यथा—१ । २ । ४ । ८ । अत्र काङ्कस्य पूर्वाङ्कासम्भवात् द्वितीयाङ्कादारभ्य पंक्तिः पूर्यते । तत्र

सप्तमो विश्रामः

अथ तृतीयप्रत्ययस्वरूपमेवात्र [मात्रा]मेरुमाह—एकाधिककोष्ठानामि
दिना सार्द्धेन श्लोकचतुष्टयेन—

एकाधिककोष्ठानां द्वे द्वे पक्ती समे कार्ये ।
तासामन्तिमकोष्ठेष्वेकाङ्कं पूर्वभागे तु ॥६२॥
एकाङ्कमयुक्पक्तेः समपक्ते पूर्वयुग्माङ्कम् ।
दद्यादादिमकोष्ठे यावत् पक्तिप्रपूर्तिः स्यात् ॥६३॥
आद्याङ्केन तदीयैः शीर्षाङ्कैर्वामभागस्थैः ।
उपरिस्थितेन कोष्ठं विषमाया पूरयेत् पक्तौ ॥६४॥
समपक्तौ कोष्ठानां पूरणमाद्याङ्कमपहाय ।
उपरिस्थाङ्कैस्तदुपरिसंस्थैर्वामस्थितैरङ्कैः ॥६५॥
मात्रामेरुरयं प्रोक्तः पूर्वोक्तफलभागिति ।

तत्र क्रमादेकैकेनाधिकेन कोष्ठेनोपलक्षिताना कोष्ठाना मध्ये द्वे द्वे पक्ती स
समाने कार्ये—लिखनीये इत्यर्थ । तासा—सर्वासा पक्तीना अन्तिमकोष्ठेषु एका
प्रथमाङ्क यावदित्थ दद्यात् इत्यन्वय । अथ च सर्वासा पक्तीना पूर्वभागे
अङ्कविन्यास उच्यत इति शेष ॥ ६२ ॥

एकाङ्कमिति । तत्रायुक्पक्ते—विषमपक्तेरादिमकोष्ठे—प्रथमकोष्ठे एका
प्रथमाङ्क समपक्तेरादिमकोष्ठे—प्रथमकोष्ठे पूर्वयुग्माङ्क एकान्तरित प्रथम
यावत् पक्तिप्रपूर्त्ति—पूरण स्यात्—भवति तावद् दद्यात्—विन्यसेद् इत्यर्थ ॥ ६३

तदेवाह—

आद्याङ्केनेति । ततश्च सर्वत्र विषमाया पङ्क्तौ उपरिस्थितेन आद्याङ्के
प्रथमाङ्केन वामभागस्थैः तदीयै शीर्षाङ्कैश्च कोष्ठशून्यमिति शेष प्रपूरये
साङ्क कुर्यादित्यर्थः ॥ ६४ ॥

किञ्च—

समपङ्क्ताविति । समपङ्क्तौ चाद्याङ्कं अपहाय—त्यक्त्वा उपरिस्थिताङ्क
तदुपरिसंस्थैः वामभागस्थितैरङ्कैश्च शून्यानां कोष्ठाना पूरण विधेयमि
शेषः ॥ ६५ ॥

तत्र षोडशभेदाभिन्ने चतुर्वर्णप्रस्तारे कतमस्थाने सर्वगुर्वात्मकं कतमस्थाने च त्रिगुर्वात्मकं कतरस्थाने द्विगुर्वात्मकं कतमस्थाने च एकगुर्वात्मकं वृत्तं वा सर्वलघ्वात्मकं रूपमस्ति कति वा प्रस्तारसंख्येति प्रश्ने कृते पताकया उत्तरं दातव्यमिति ।

पताकाज्ञानफलमिति श्रीगुरुमुखादवगतो वर्णपताकालिखनप्रकारः प्रकाशित इति दिगुपवर्णनम् । उत्तरत्र च षड्विंशतिवर्णपर्यन्तं पताकाविरचनप्रकारः समुन्नेयः सुधीभिः ग्रन्थविस्तरभयान्नेहास्माभिः प्रपञ्च्यत इति शिवम् ।

अत्र चतुर्वर्णपताकायां तु सिद्धाङ्कान् पिङ्गलोद्योताख्यायां प्राकृतपिङ्गलसूत्रवृत्तौ श्रीचन्द्रशेखरः श्लोकाभ्यां सम्यगाह । यथा—

एक-द्वि-त्रि-शराङ्काश्च वेदर्तु-मुनि दिक्-शिवाः ।
कामाब्ध-सूर्य-मनवस्तिथि-क्षोणीशसम्मिता ॥१॥
सिद्धाङ्काः स्युश्चतुर्वर्णपताकानुक्रमे स्फुटम् ।
पञ्चकोष्ठे लिखेदङ्कान् शेषानेव लिखेदिति ॥ २ ॥

शेषान् प्रस्तारान्तरपताकाङ्कान् एवं क्रमात् कोष्ठवर्धनपूर्वकक्रमात् लिखित-विन्यसेदित्यर्थः ।

अत्र अङ्कविन्यासक्रमस्तु श्रीगुरुमुखादेवावगन्तव्य इति सर्वं मङ्गलम् ।

चतुर्वर्णपताका यथा प्रत्ययकारस्य—

१	२	४	८	१६
	३	६	१२	
	५	७	१४	
	९	१	१५	
		११		
		१३		

इति श्रीमत्सकलजनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिकचक्रचूड-
मणि-साहित्यार्णवकर्णधार-छन्दःशास्त्रपरमाचार्य-श्रीलक्ष्मीनाथभट्टात्मजविरचिते
श्रीवृत्तमौक्तिकवार्तिकदुष्करोद्धारे वर्णपताकाप्रकरणोद्धारो
नाम षष्ठो विश्रामः ॥६॥

सप्तमो विश्रामः

अथ तृतीयप्रत्ययस्वरूपमेवात्र [मात्रा]मेरुमाह—एकाधिककोष्ठानामित्यादिना सार्द्धेन श्लोकचतुष्टयेन—

एकाधिककोष्ठानां द्वे द्वे पक्ती समे कार्ये ।
तासामन्तिमकोष्ठेष्वेकाङ्क पूर्वभागे तु ॥६२॥
एकाङ्कमयुक्पक्तेः समपक्ते पूर्वयुग्माङ्कम् ।
दद्यादादिमकोष्ठे यावत् पक्तिप्रपूर्तिः स्यात् ॥६३॥
आद्याङ्केन तदीयैः शीर्षाङ्कैर्वामभागस्थैः ।
उपरिस्थितेन कोष्ठ विषमायां पूरयेत् पक्तौ ॥६४॥
समपक्तौ कोष्ठानां पूरणमाद्याङ्कमपहाय ।
उपरिस्थाङ्कैस्तदुपरिसंस्थैर्वामस्थितैरङ्कैः ॥६५॥
मात्रामेरुरय प्रोक्तः पूर्वोक्तफलभागिति ।

तत्र क्रमादेकैकेनाधिकेन कोष्ठेनोपलक्षिताना कोष्ठाना मध्ये द्वे द्वे पक्ती समे-समाने कार्ये-लिखनीये इत्यर्थ । तासा-सर्वासा पक्तीना अन्तिमकोष्ठेषु एकाङ्क-प्रथमाङ्क यावदित्थ दद्यात् इत्यन्वय । अथ च सर्वासा पक्तीना पूर्वभागे तु अङ्कविन्यास उच्यत इति शेष ॥ ६२ ॥

एकाङ्कमिति । तत्रायुक्पक्ते -विषमपक्तेरादिमकोष्ठे-प्रथमकोष्ठे एकाङ्क-प्रथमाङ्क समपक्तेरादिमकोष्ठे-प्रथमकोष्ठे पूर्वयुग्माङ्क एकान्तरित प्रथमाङ्क यावत् पक्तिप्रपूर्त्ति -पूरण स्यात्-भवति तावद् दद्यात्-विन्यसेद् इत्यर्थ ॥ ६३ ॥

तदेवाह—

आद्याङ्केनेति । ततश्च सर्वत्र विषमाया पड्क्तौ उपरिस्थितेन आद्याङ्केन-प्रथमाङ्केन वामभागस्थै तदीयै. शीर्षाङ्कैश्च कोष्ठशून्यमिति शेष प्रपूरयेत्-साङ्क कुर्यादित्यर्थ· ॥ ६४ ॥

किञ्च—

समपड्क्ताविति । समपड्क्तौ चाद्याङ्क अपहाय-त्यक्त्वा उपरिस्थिताङ्कै -तदुपरिसस्थै वामभागस्थितैरङ्कैश्च शून्याना कोष्ठाना पूरण विधेयमिति शेष. ॥ ६५ ॥

उक्तं मात्रामेरुमुपसंहरति—मात्रामेरुरयमित्यर्द्धेन ।

भो शिष्या ! पूर्वोक्तफलभागयं मात्रामेरुरिति प्रकारेणोक्तः । यथा वर्णमेरोः फलं तथा मात्रामेरोरपीत्यर्थः ।

अत्रैतदुक्तं भवति । द्विमात्रादि-निरवधिकमात्रापंक्तिपर्यन्तं स्वस्वप्रस्तारे कति सर्वगुरवः कस्यैकादिगुरवः, कति सर्वलघवः कति वा प्रस्तारसंख्येति प्रश्ने कृते मात्रामेरुणा प्रत्युत्तरं देयम् ।

तत्र च क्रमेणैव एकैकेनाधिके कोष्ठेनोपलक्षितानां कोष्ठकानां मध्ये द्वे द्वे कोष्ठे प्रथमे पङ्क्ती समे-सदृशे लिखनीये । तत्र प्रथमे कोष्ठद्वयं । तथा द्वितीयेऽपि कोष्ठद्वयमेव । तृतीये कोष्ठत्रयं । चतुर्थेऽपि कोष्ठत्रयमेव । पञ्चमे चत्वारि । षष्ठेऽपि चत्वार्येव । अत्र कोष्ठपदेन कोष्ठाङ्क पङ्क्तिरेव लक्ष्यते उपचारात् एककलाया प्रस्तारो नास्तीति प्रथमं न कोष्ठकल्पना । अतः कोष्ठद्वया रिमकैव आद्यौ पंक्तिरिति प्रथम इत्युक्तिरिति समन्वयम् ।

एवञ्च कोष्ठपंक्तिषु अथोधः क्रमेणाङ्कान् लिखेत् । सर्वत्र च शेषकोष्ठे प्रथमाङ्को देयः । तत्र तत्र च कोष्ठद्वयमध्ये आद्यावुपरिकोष्ठे च एकस्योऽङ्को देयः । उपरिस्थितस्योपरिस्थिताङ्काभावात् उत्तर्यसिद्धैकस्याङ्कन सहितं कृत्वा द्वितीयकोष्ठे द्वितीयाङ्को देयः इति । तृतीयकोष्ठे तु उपरिस्थिताङ्कसहितं कृत्वा अर्थात् शिरःस्थेनाङ्कद्वयेन मिलितं कृत्वा मतस्त्रिस्योऽङ्कस्समायाति । तथा चार्थात् शिरःस्थेनाङ्कन सह प्रथमो द्वितीयेऽग्रस्थे मेलनीय ।

यद्वा आद्यद्वयमधो मिलतीम तु प्रक्रिया । तथा च प्रथमकोष्ठद्वयस्य पूरित त्वात् द्वितीयादारभ्याङ्का दातव्या । तत्र द्वितीये द्वय तृतीये पुनरेकं चतुर्थे त्रयम् पञ्चमे पुनरेकं षष्ठे चत्वारि, सप्तमे-पुनरेकं, अष्टमे-पञ्च नवमे-पुनरेकं दशमे षट् एकादशे पुनरेकं द्वादशे सप्तमेति प्रक्रियया अङ्का देया । एवमाद्ये । तदथ कोष्ठेऽन्तकोष्ठे च पूर्वे मध्यस्थशून्यकोष्ठे चैषा प्रक्रिया पूरणीया । कोष्ठशिरः—कोष्ठस्थाङ्क परकोष्ठस्थाङ्को द्वावङ्को चैकीकृत्य मध्यकोष्ठे-शून्यकोष्ठे मेलितोऽङ्को देयः । एवं सर्वत्र निरवधिकत्वात् यावदित्थं कोष्ठकं विरच्य मात्रामेरुः पूर्वोक्तरूपः कर्त्तव्य इति ।

अयं अमोघमात्रामेरुनिर्माणप्रकारः श्रीगुरुमुखादवगतः प्रकाशित इत्यु परम्यते ।

अत्रेदं अनुसन्धेयम् । समविषमसंख्या द्वि-त्रि-मात्रादिप्रस्तारमारभ्य निरवधि कमात्राप्रस्तारपर्यन्तं स्वस्वप्रस्तारे कति समकलो लघवः, कति च गुरवः, कति

विषमकले लघव, कति च गुरव, कति दोभयत्र प्रस्तारसख्येति प्रश्ने कृते मात्रा-मेरुणा प्रत्युत्तर देयम् ।

तत्र द्विकले समप्रस्तारे एकः सर्वगुरु, द्वितीयो द्विकलात्मक सर्वलघुरिति द्विभेद प्रस्तारसकेत ।

त्रिकले विषमप्रस्तारे द्वावेककलकावेकगुरुकौ चान्ते त्रिकलात्मक सर्वलघु-रिति द्विभेद प्रस्तारसकेत ।

समकले चतुष्कलप्रस्तारे चादौ द्विगुरुः स्थानत्रये च एकगुरुर्द्विकलश्चान्ते चतुष्कलात्मक सर्वलघुरिति पञ्चभेदः प्रस्तारसकेत ।

विषमकले पञ्चकलप्रस्तारे त्रयो गणा एकलघव, चत्वारो गणास्त्रिलघव., स्थानत्रये द्विगुरु', स्थानचतुष्टये चैकगुरुरन्ते च पञ्चकलात्मक सर्वलघु-रित्यष्टभेदः प्रस्तारसकेतः ।

समकले षट्कलप्रस्तारे आदौ सर्वगुरु, षड्गणा द्विकला, पञ्चगणाश्चतु-ष्कला, स्थानषट्के द्विगुरु, स्थानपञ्चके चैकगुरुरन्ते च षट्कलात्मक सर्वलघुरिति त्रयोदशभेद प्रस्तारसङ्केत इति ।

एवमनेन प्रकारक्रमेण यावदित्थ मात्रामेर्वभीष्टमात्राप्रस्तारे लघुगुर्वादि-प्रकारप्रक्रिया-अवगन्तव्या ।

अथवा पूर्वरूपप्रश्ने यावदित्थ यावत्कलकप्रस्तारमात्रामेरु कोष्ठकैर्विरच्य समकलप्रस्तारे वामत क्रमेण द्वौ चत्वार षडष्टावनेन प्रकारेण गुरुज्ञानम् । विषमकलप्रस्तारे तु एक-त्रि-पञ्च-सप्तानेन प्रकारक्रमेण लघुज्ञानम् । अन्ते च सर्वत्र लघुरिति । उभयत्रापि एक द्वौ त्रय पञ्चेत्याद्यनया सारण्या दक्षिणतो व्युत्क्रमेण-शृङ्खलाबन्धन्यायेन तत्तत्प्रभेदज्ञानम् ।

किन्चात्र वामभागे सर्वत्रैकैकाङ्कस्थले सर्वगुरुज्ञान भवतीति विज्ञातव्य-मित्युपदेशरहस्यम् । इति शिवम् । सर्वत्राऽत्र च दक्षिणभागे शृङ्खलाबन्धन्यायेन अग्रिमाङ्कपिण्डोत्पत्तिर्भवतीति रहस्यान्तरमिति च ।

श्रीलक्ष्मीनाथभट्टेन रायभट्टात्मजन्मना ।
कृतो मेरुरय मात्राप्रस्तारस्यातिदुर्गम ॥

अस्य स्वरूपमुदाहरणमत्र द्रष्टव्यम् ।

तथैव तृतीयप्रत्ययः मात्रामेरुः । मात्रामेरुर्यथा –

वि० १	।	१					
स० २	ऽ	१	१				
वि० ३	।ऽ	२	१				
स० ४	ऽऽ	१	३	१			
वि० ५	।ऽऽ	३	४	१			
स० ६	ऽऽऽ	१	६	५	१		
वि०	।ऽऽऽ	४	१	६	१		
स०	ऽऽऽऽ	१	१	१५	७	१	
वि०	।ऽऽऽऽ	५	१	२१	८	१	
स०	ऽऽऽऽऽ	१	१५	३५	२८	९	१
वि०	।ऽऽ ऽऽ	६	२१	५६	३६	१	१

एकादशमात्रामेरुरयम् । एवं मग्रेऽपि समुन्नेयः ।

इति श्रीमत्प्रत्यक्षनरनारायणचरणारविन्दमकरन्दास्वादमोदमानमानसकञ्चरीकायमानसूरिकुल-चक्रचूडामणि-साहित्यार्णवकर्णधार-छन्दःशास्त्रपरमाचार्य-श्रीलक्ष्मीनाथ भट्टारकविरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारे एकमात्राविमिनसविलग्नमात्राप्रस्तारमेरूद्धारो नाम सप्तमो विश्रामः ॥७॥

अष्टमो विश्रामः

अथ मेरुगर्भां चतुर्थप्रत्ययस्वरूपामेव मात्राणा पताकामाह—अथेत्यादि अर्द्धेन श्लोकद्वयेन—

अथ मात्रापताकापि कथ्यते कवितुष्टये ।।६६।।
दत्त्वोद्दिष्टवदङ्कान् वामावर्त्तेन लोपयेदन्त्ये ।
अवशिष्टो वै योऽङ्कस्ततोऽभवत् पक्तिसञ्चार ।।६७।।
एकैकाङ्कस्य लोपे तु ज्ञानमेकगुरोर्भवेत् ।
द्वित्र्यादीना विलोपे तु पक्तिर्द्वित्र्यादिबोधिनी ।।६८।।

अथेति । मात्रामेरुकथनानन्तर मात्राणा पताकापि कवितुष्टये-कवीना सन्तोषार्थं कथ्यते-उच्यत इत्यर्थ ।। ६६ ।।

तत्प्रकारमाह—

दत्त्वेति । तत्र उद्दिष्टवत्-उद्देशक्रमवत् अङ्कान्-एक-द्वि-त्रि-पञ्चाष्ट-त्रयोदशादीन् दत्त्वा-लिखित्वा, ततो वामावर्त्तेन-वामभागत अन्त्ये-त्रयोदशाङ्के लोपयेत् पूर्वमङ्कमिति शेष । अवशिष्टो वै योऽङ्क लोपे सतीति शेष । ततोऽङ्कात् पक्तिसञ्चारो भवेदिति-जानीयादित्यर्थ ।।६७।।

अपराङ्कलोपेन प्रकारमाह—

एकैकाङ्कस्येति । एकैकाङ्कस्य लोपे तु अन्त्य इति शेष । एकगुरोर्ज्ञानं भवेत् । द्विव्यादीना अङ्काना विलोपे तु पक्ति द्वित्र्यादिगुरुबोधिनी भवतीति शेष ।। ६८ ।।

अयमर्थ —उद्दिष्टसदृशा अङ्का स्थाप्या । ते यथा—१, २, ३, ५, ८, १३ । एकः द्वित्रिपञ्चाष्टत्रयोदशाद्या । ततो वामावर्त्तेन पर लोपयेत्–सर्वान्तिम अङ्क तत्पूर्वेणाङ्केन लोपयेदित्यर्थ । तत एकेनाङ्केन अन्तिमाङ्कलोपे कृते सति एकगुरुरूपज्ञान भवति । द्वाभ्या अन्तिमाङ्के लोपे सति द्विगुरुरूपज्ञान भवति । त्रिभिरन्तिमाङ्कलोपे सति त्रिगुरुरूपज्ञान भवतीत्यादि ज्ञेयम् । एव कृते मात्रापताका सिद्ध्यति ।

तत्र षट्कलप्रस्तारे यथा—उद्दिष्टसमाना अङ्का एकद्वित्रिपञ्चाष्टत्रयोदशरूपा· स्थापनीया । तत सर्वापेक्षया परस्त्रयोदशाङ्क तत्पूर्वोऽष्टमाङ्क, तेनाष्टमाङ्केन त्रयोदशाङ्कावयवे लुप्ते सति अवशिष्टा. पञ्च । तस्य पञ्चमाङ्कस्य

तथैव तृतीयप्रत्ययः मात्रामेरुः । मात्रामेरुर्यथा –

वि० १	।	१					
स० २	S	१	१				
वि० ३	।S	२	१				
स० ४	SS	१	३	१			
वि० ५	।SS	३	४	१			
स० ६	SSS	१	६	५	१		
वि०	।SSS	४	१	६	१		
स०	SSSS	१	१०	१५	७	१	
वि०	।SSSS	५	२	२१	८	१	
स०	SSSSS	१	१५	३५	२८	९	१
वि०	।SS SS	६	१५	५६	३६	१	१

एकादशमात्रामेरुरयम् । एवं अग्रेऽपि समुन्नेयः ।

इति श्रीमत्प्रस्तवनवनभारविन्यसकरस्वास्वादनोद्यमानमानसचञ्चरीकालङ्कारिक-चक्रचूडामणि-साहित्यार्णवकर्णधार-श्रीमद्भट्टात्मज-भट्टाचार्य-श्रीलक्ष्मीनाथ भट्टारकविरचिते श्रीवृत्तमौक्तिकवार्तिकदुष्करोद्धारे एकमात्रादिनिरवधिकमात्राप्रस्तारमेरुद्वारो नाम सप्तमो विश्रामः ॥७॥

े षट्कलप्रस्तारे द्वितीय-तृतीय-चतुर्थ-षष्ठ-सप्तम-नवमस्थानस्थानि रूपाणि द्विगुरूणि ब्रूयादिति ।

तथा च त्रिलोपे त्रिगुरुक रूप भवतीति, त्रिपञ्चाष्टलोपे भागो नास्तीति, द्वि-त्रि-पञ्चलोपोऽप्यष्टात्मको वृत्त एवेति, पञ्च-द्वयेकलोपोऽप्यष्टलोपात्मको वृत्त एवेति । एक-द्वि-त्रिलोपोपि वृत्त इति प्रकारेण जायमाना अङ्का न स्थापनीया कृतप्रस्तारसमाप्तेरिति भाव. ।

ननु प्रथम रूप सर्व गुर्वात्मक कुत्रास्तीत्यपेक्षाया एक-त्र्यष्टभिर्मिलित्वा जातैर्द्वादशभिस्त्रयोदशाङ्कावयवे लुप्ते सति एकोऽवशिष्ट, स आद्ये स्थाने त्रिगुर्वात्मक रूप भवतीति विज्ञातव्यमिति । चरम रूप तु अष्टमाङ्काग्रे उद्दिष्टाङ्काऽऽकारत्वेन स्थापितमेवास्ति । तथा चात्रापि प्रथमाङ्कचरमाङ्कयो पूर्वोक्तन्यायेनाऽवस्थान भवतीति वेदितव्यम् ।

पताकाप्रयोजन तु मेरौ षट्कलप्रस्तारस्यैक प्रथम रूप त्रिगुरूपलक्षित सर्वगुर्वात्मक, षड्द्विगुरूणि रूपाणि, पञ्चैकगुरूणि रूपाणि, एक सर्वलघ्वात्मक रूपमस्ति ।

तत्र त्रयोदशभेदभिन्ने षट्कलप्रस्तारे कुत्र स्थाने सर्वगुर्वात्मक, कतमस्थाने द्विगुर्वात्मक, कतरस्थाने चैकगुर्वात्मक, कुत्र वा सर्वलघ्वात्मक, कति वा प्रस्तारसख्येति प्रश्ने कृते पताकयोत्तर दातव्यमिति पताकाज्ञानफलमिति । श्रीगुरुमुखादवगतो मात्रापताकालिखनप्रकार प्रकाशित । एवमन्यत्रापि निरवधिकमात्राप्रस्तारेषु पञ्चसप्ताष्टकलाना यथाक्रम मात्रापताकाविरचनप्रकार समुन्नेय· सुधीभि, ग्रन्थविस्तारभयान्नेहास्माभि प्रपञ्चित इति शिवम् ।

अत्रापि **पिङ्गलोद्योताख्याया सूत्रवृत्तौ** सार्द्धेन श्लोकेन षण्मात्रापताकाया सिद्धाङ्का सगृहीता । यथा–

एक-द्वि-त्रि-समुद्राङ्ग-मुन्यङ्काश्च त्रयस्तथा ।
पञ्चाष्ट-दिक्-शिवेनाः स्यु तथाष्टौ च त्रयोदश ।।
षण्मात्रिकापताकायामङ्कानुक्रमणी स्मृता ।

इति । इहापि च पक्त्या विन्यासक्रमो गुरुमुखादवगन्तव्य ।

किञ्च–

एक-द्वि-त्रि-समुद्राङ्ग-मुनि-वह्नि-शरस्तथा ।
वसु-दिग्-रुद्र-सूर्याष्टक्रमादङ्कान् समालिखेत् ।।
पञ्चमात्रापताकायामङ्कानुक्रमणी मता ।

तत्पूर्वं त्रिविद्यमानत्वात् अष्टमाङ्कलोपात् परकलया सह गुरुभावाच्च पञ्चमाङ्काद् एकगुरुपंक्तिक्रमो विधेय इति । तत्र च पञ्चमस्थाने आदौ चतुर्लघुकमन्ते चैक-गुरुकमेवं ।।।।ऽ आकार रूपमस्तीति ज्ञानपताकाफलम् । एवमन्यत्रापि गुरुभावो ज्ञातव्यः ।

तथा पञ्चभिस्त्रयोदशाङ्कावयवे लुप्ते सति अष्टावशिष्यन्ते ते तु पञ्चाधो लेख्याः । तथा त्रिभिस्त्रयोदशाङ्कावयवे लुप्ते सति दशावशिष्यन्ते ते च अष्टाधो लेख्याः । तथा द्वाभ्यां द्वाभ्यां त्रयोदशाङ्कावयवे लुप्ते सति एकादशावशिष्यन्ते तेऽपि दशाधो लेख्याः । तथा एकेन त्रयोदशाङ्कावयवे लुप्ते सति द्वादशावशिष्यन्ते त एकादशाधो लेख्याः । अत्र सर्वत्र पूर्व एव हेतुरुन्नेयः ।

अतएव मेरावेकगुरुकचतुर्लघुकरूपगुरुस्थानानि प्रस्तारगत्या पञ्चैव भवन्तीति मात्रे पंक्तिसञ्चारः । एतेन षट्कलप्रस्तारे पञ्चमाष्टमदशमैकादश द्वादशस्थानस्थानि रूपाणि एकगुरुकाणि भूयादिति । एवं मात्रापञ्चमके एक-गुरुकमुक्तम् ।

अथ द्विगुरूणि रूपाणि उच्यन्ते—तत्र द्वाभ्यामङ्काभ्यां अन्तिमाङ्कलोपे कृते सति द्विगुरुक रूपमिति । पञ्चाष्टमिस्त्रयोदशाङ्कावयवे लुप्ते सति भागाभावात् तद्भावावर्तस्थैस्त्रिभिस्तदग्रस्थैरष्टभिश्च जातैरेकादशभिस्त्रयोदशाङ्कावयवे लुप्ते सति द्वावशिष्येते द्वयोस्तत्पूर्वत्र विद्यमानत्वाद् । तत्रैकादशाङ्कलोपात् पर कलया सह गुरुभावाच्च द्वितीया मारभ्य द्विगुरुकपंक्तिसञ्चारो भवतीति । तथा च द्वितीयस्थाने प्रथम द्विलघुकं ततो द्विगुरुकं ।।ऽऽ एवमाकारकं रूप मस्तीति पूर्ववदेव पताकाफलमुदेतीति ।

एवमन्यत्रापि प्रस्तारान्तरे गुरुभावोऽवगन्तव्यः । तथा च द्वाभ्यां अष्ट भिश्च जातैर्दशभिः त्रयोदशाङ्कावयवे लुप्ते सति त्रयोऽवशिष्यन्ते ते द्वयधो लेख्याः । तत एकेन अष्टभिश्च जातैर्नवभिः त्रयोदशाङ्कावयवे लुप्ते सति चत्वारो-ऽवशिष्यन्ते ते च त्र्यधो लेख्याः । ततः पञ्चभिस्त्रिभिश्च जातैरष्टभिस्त्रयोदशाङ्का-वयवलोपाद् अवशिष्टः पञ्चमाङ्को वृत्त एवेति न स्थाप्यते । 'अङ्कश्च पूर्वं न सिद्धस्तमङ्क नैव साधयेदिति । वर्णपताकातो अनुवृत्तिरत्नादिति । ततः पञ्चभि र्द्वाभ्यां च जातो सप्तभिस्त्रयोदशाङ्कावयवे लुप्ते सति षडावशिष्यन्ते ते तु चत्वधो लेख्याः । द्विभिस्त्रिभिः पञ्चमात्मको वृत्त एवेति न स्थापनीयः अनुवृत्तसिद्धयादि निषिद्धत्वादिति । तत एकेन त्रिभिश्च जातैश्चतुर्भिस्त्रयोदशाङ्कावयवे लुप्ते सति नवावशिष्यन्ते तेऽपि षष्ठाधो लेख्याः । एषु च पूर्ववद् हेतुरुन्नेयः । अतश्च मेरौ द्विगुरुक-द्विलघुकरूपस्थानानि प्रस्तारगत्या षडेव भवन्तीति मात्र पंक्तिसञ्चारः ।

ऽ पट्कलप्रस्तारे द्वितीय-तृतीय-चतुर्थ-षष्ठ-सप्तम-नवमस्थानस्थानि रूपाणि द्विगुरूणि ब्रूयादिति ।

तथा च त्रिलोपे त्रिगुरुक रूप भवतीति, त्रिपञ्चाष्टलोपे भागो नास्तीति, द्वि-त्रि-पञ्चलोपोऽप्यष्टात्मको वृत्त एवेति, पञ्च-द्वये कलोपोऽप्यष्टलोपात्मको वृत्त एवेति । एक-द्वि-त्रिलोपोपि वृत्त इति प्रकारेण जायमाना अङ्का न स्थापनीया कृतप्रस्तारसमाप्तेरिति भाव ।

ननु प्रथम रूप सर्व गुर्वात्मक कुत्रास्तीत्यपेक्षाया एक-त्र्यष्टभिर्मिलित्वा जातैर्द्वादशभिस्त्रयोदशाङ्कावयवे लुप्ते सति एकोऽवशिष्ट, स आद्ये स्थाने त्रिगुर्वात्मक रूप भवतीति विज्ञातव्यमिति । चरम रूप तु अष्टमाङ्काग्रे उद्दिष्टाङ्काऽऽकारत्वेन स्थापितमेवास्ति । तथा चात्रापि प्रथमाङ्कचरमाङ्कयो पूर्वोक्तन्यायेनाऽवस्थान भवतीति वेदितव्यम् ।

पताकाप्रयोजन तु मेरौ षट्कलप्रस्तारस्यैक प्रथम रूप त्रिगुरूपलक्षित सर्वगुर्वात्मक, षड्द्विगुरूणि रूपाणि, पञ्चैकगुरूणि रूपाणि, एक सर्वलघ्वात्मक रूपमस्ति ।

तत्र त्रयोदशभेदभिन्ने षट्कलप्रस्तारे कुत्र स्थाने सर्वगुर्वात्मक, कतमस्थाने द्विगुर्वात्मक, कतरस्थाने चैकगुर्वात्मक, कुत्र वा सर्वलघ्वात्मक, कति वा प्रस्तारसख्येति प्रश्ने कृते पताकयोत्तर दातव्यमिति पताकाज्ञानफलमिति । श्रीगुरुमुखादवगतो मात्रापताकालिखनप्रकार प्रकाशित । एवमन्यत्रापि निरवधिकमात्राप्रस्तारेषु पञ्चसप्ताष्टकलाना यथाक्रम मात्रापताकाविरचनप्रकार समुन्नेयः सुधीभि, ग्रन्थविस्तारभयान्नेहास्माभि प्रपञ्चित इति शिवम् ।

अत्रापि पिङ्गलोद्योताख्याया सूत्रवृत्तौ सार्द्धेन श्लोकेन षण्मात्रापताकाया सिद्धाङ्का सगृहीता । यथा–

एक-द्वि-त्रि-समुद्राङ्ग-मुन्यङ्काश्च त्रयस्तथा ।
पञ्चाष्ट-दिक्-शिवेनाः स्यु तथाष्टौ च त्रयोदश ॥
षण्मात्रिकापताकायामङ्कानुक्रमणी स्मृता ।

इति । इहापि च पक्त्या विन्यासक्रमो गुरुमुखादवगन्तव्य ।

किञ्च–

एक-द्वि-त्रि-समुद्राङ्ग-मुनि-वह्नि-शरस्तथा ।
वसु-दिग्-रुद्र-सूर्याष्टक्रमादङ्कान् समालिखेत् ॥
पञ्चमात्रापताकायामङ्कानुक्रमणी मता ।

नवमो विश्रामः

अथ वृत्तजातिसमार्द्धसमविषमपद्यस्थगुरुलघुसंख्याज्ञानप्रकारमाह 'पृष्ठे' इति श्लोकेन ।

पृष्ठे वर्णच्छन्दसि कृत्वा वर्णांस्तथा मात्राः ।
वर्णाङ्केन कलाया लोपे गुरवोऽवशिष्यन्ते ।। ६९ ।।

तत्राऽमुकसंख्याक्षरप्रस्तारेऽमुके छन्दसि कति गुरव, कति च लघव इति प्रश्ने कृते गुरुलघुसंख्याज्ञानप्रकारप्रक्रिया प्रकाश्यते ।

तत्रोद्भावितचतुष्पदे वर्णप्रस्तारच्छन्दसि समवृत्ते पृष्ठे सति वर्णान्- तत्रस्थ वर्णान् गुरुलघुरूपतया समुदायमापन्नान् मात्रा -कला कृत्वा, तथा गुरुलघुरूपसमुदायतयैव कलारूपतामापद्येत्यर्थ । तत कलाया इति जात्या एकवचन । अत कलाना मध्यत इत्यवधेयम् । वर्णाङ्केन पृष्ठस्य वृत्तस्य वर्णसंख्याङ्केन लोपे लोपावशिष्टकलासंख्यया गुरवोऽवशिष्यन्ते, तत्तद्वृत्तगतगुरून् जानीयादित्यर्थ । गुरुज्ञाने सति परिशेषादवशिष्टवृत्ताक्षरसंख्यया लघूनपि जानीयादित्यर्थ. ।। ६९ ।।

अत्र समवृत्तस्यैकपादज्ञानेनैव चतुर्णामपि पादानामूर्द्ध्ववर्णिका विधाय लिखनेन गुरुलघुज्ञान भवतीत्यनुसन्धेय सुधीभि । यथा–

समवृत्ते एकादशाक्षरप्रस्तारे षोडशमात्रात्मके रथोद्धतावृत्तपादे 'रात्परैर्नर-लगै रथोद्धता' इत्यत्र ऽ।ऽ, ।।।, ऽ।ऽ, ।ऽ वर्णा ११, मात्रा १६ षोडशकलासु पिण्डरूपासु संख्यातासु वृत्तस्यैकादशवर्णसंख्याया लुप्ताया सत्यामवशिष्ट-पञ्चगुरव षड्लघव परिशेषाद् विज्ञेया । इति समवृत्तस्थगुरुलघुज्ञानप्रकार । एव पादचतुष्टयेऽपि पादसाम्यात् विंशतिर्गुरव चतुर्विंशतिर्लघवश्च भवन्तीति ज्ञेयम् । एव प्रस्तारान्तरेऽपि समवृत्तेषु गुरुलघुज्ञानमूह्य सुधीभिरित्युपदिश्यते ।

एवञ्च षड्त्रिंशदक्षरायाम्—

गोकुलनारी मानसहारी वृन्दावनान्तसञ्चारी ।
यमुनाकुञ्जविहारी गिरिवरधारी हरि पायाद् ।।

इत्यस्या देहीसमाख्याया गाथाजातौ सप्तपञ्चाशत् संख्यातासु पिण्डरूपासु कलासु षड्त्रिंशदक्षरलोपे कृते सति एकविंशतिगुरवोऽवशिष्यन्ते । पारिशेष्यात् पञ्चदश लघवोऽपीति च ज्ञेयम् । इति गाथाजातिषु गुरुलघुज्ञानप्रकार ।

उट्टवणिका यथा—

ऽ।। ऽऽऽ ।।ऽ ऽऽऽ ।ऽ। ऽऽऽ
।।ऽ ऽ।। ऽऽ। ।।। ऽऽ। ऽऽऽ

पूर्वार्द्धे ३० मात्रा, उत्तरार्द्धे २७ मात्रा । मात्रा ५७, अक्षर ३६ ।

एवमेवापरास्वपि जातिषु गुरुलघुज्ञानप्रकार ऊहनीय इत्युपदेशः ।

एवमेव अर्द्धसमवृत्तेऽपि प्रथम-तृतीयविषमपादे द्वितीयचतुर्थसमपादे च—

सहचरि कथयामि ते रहस्य
न लघु कदाचन सद्गृहं प्रमेयाः ।
इह विष-विषमागिरः सखीनां
सकपटचाटुतराः पुरस्सरन्ति ॥

इति पुष्पिताग्राभिधाने छन्दस्य[ष्ट]षष्टिकलात्मके ६८ पिण्डे छन्दोक्षर संख्यां पञ्चाशदात्मिकां ५० मुञ्चेत् । एवं लोपे सति अष्टादश १८ गुरवोऽत्र शिष्यन्ते परिशेषात् द्वात्रिंशल्लघवोऽपि ३२ तत्र वर्तन्ते इत्यर्द्धसमवृत्तस्य गुरुलघुज्ञानप्रकारः ।

उट्टवणिका यथा—

।।। ।।। ऽ।ऽ ।ऽऽ [१२]
।।। ।ऽ। ।ऽ। ऽ।ऽ ऽ [१३]
।।। ।।। ऽ।ऽ ।ऽऽ [१२]
।।। ।ऽ। ।ऽ। ऽ।ऽ ऽ [१३]

१८ गुरु ३२ लघु, अक्षर ५० ।

एवमन्येष्वप्यर्द्धसमवृत्तस्थगुरुलघुज्ञानप्रकारः । एवमन्येष्वप्यर्द्धसमवृत्तेषूदाहरणमूह्य इत्युपदिश्यते ।

तथा च भिन्नचिह्नचतुष्पादे विषमवृत्तेऽपि

विलसति गोपरमणीषु
तरणितनयातटे हरिः ।
संयमधरवसे कलयन्
वनिताजनेन निभृतं निरीक्षितः ।

इत्युद्गताभिधाने छन्दसि सप्तपञ्चाशत् ५७ कलात्मके पिण्डे छन्दोऽक्षर संख्यां त्रयश्चत्वारिंशदात्मिकां ४३ मुञ्चेत् । एवमक्षरसंख्यायां मुक्तायां तस्यां चतुर्दशगुरवोऽत्रावशिष्यन्ते । परिशेषात् एकोनत्रिंशल्लघवोऽपि २९ विज्ञेया । इति विषमवृत्तस्थगुरुलघुज्ञानप्रकारः ।

उद्दवणिका यथा—

IIS	ISI	IIS	I		[१०]
III	IIS	ISI	S		[१०]
SII	III	SII	S		[१०]
IIS	ISI	IIS	ISI	S	[१३]

मात्रा ५७ अक्षर ४३।

एवमन्येष्वपि विषमवृत्तेषु गुरुलघुज्ञानप्रकार ऊहनीय. सुबुद्धिभिर्ग्रन्थविस्तरभयान्नेहास्माभि प्रपञ्च्यत इति सर्वं चतुरस्रम्।

वृत्तस्थगुरुलघूना युगपज्ज्ञान न जायते येषाम्।
तेषा तदवगमार्थे सुकरोपायो मया रचित ॥ १ ॥

इति श्रीमन्नन्दनन्दनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिकचक्रचूडामणि-साहित्यार्णवकर्णधार-छन्द शास्त्रपरमाचार्य-श्रीलक्ष्मीनाथभट्टारकविरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारे वृत्तजातिसमार्द्धसमविषमसमस्तप्रस्तारेषु तत्तद्वृत्तस्थगुरुलघुसख्याज्ञानप्रकारसमुद्धारो नाम नवमो विश्राम. ॥ ९ ॥

दशमो विश्रामः

अथ पञ्चमप्रत्ययस्वरूपा वर्णमर्कटीमाह—'मर्कटी लिख्यते' इत्यादिना श्लोकषट्केन—

मर्कटी लिख्यते वर्णप्रस्तारस्यातिदुर्गमा।
कोष्ठमक्षरसख्यात पङ्क्ती रचय षट् तथा ॥ ७० ॥
प्रथमायामाद्यादीन् दद्यादङ्कांश्च सर्वकोष्ठेषु।
अपरायां तु द्विगुणानक्षरसख्येषु तेष्वेव ॥ ७१ ॥
आदिपक्तिस्थितैरङ्कैर्विभाव्य परपक्तिगान्।
अङ्कांश्चतुर्थपक्तिस्थकोष्ठकानपि पूरयेत् ॥ ७२ ॥
पूरयेत् षष्ठपञ्चम्यावर्द्धैस्तुर्याङ्कसम्भवैः।
एकीकृत्य चतुर्थस्य-पञ्चमस्थाङ्ककान् सुधीः ॥ ७३ ॥

उद्दवणिका यथा—

SII SSS IIS SSS ISI SSS

IIS SII SSI III SSI SSS

पूर्वार्द्धे ३० मात्रा उत्तरार्द्धे २७ मात्रा । मात्रा ५७ अक्षर ३६ ।

एवमेवापरास्वपि जातिषु गुरुलघुज्ञानप्रकार ऊहनीय इत्युपदेशः ।

एवमेव अर्द्धसमवृत्तेऽपि प्रथम-तृतीयविषमपादे द्वितीयचतुर्थसमपादे च—

सहचरि कथयामि ते रहस्य,
न खलु कदाचन तद्गृहं व्रजेथा ।
इह विष-विषमागिरः सखीनां
सकपटचाटुधरा पुरस्सरन्ति ॥

इति पुष्पिताग्राभिधाने छन्दस्य[ष्ट]षष्टिकलात्मके ६८ पिण्डे छन्दोक्षर संख्यां पञ्चाशदात्मिकां ५० भुञ्ज्येत् । एवं लोपे सति अष्टादश १८ गुरवोऽत्र शिष्यन्ते परिशेषात् द्वात्रिंशल्लघवोऽपि ३२ तत्र वर्तन्ते इत्यर्द्धसमवृत्तस्य गुरुलघुज्ञानप्रकारः ।

उद्दवणिका यथा—

III III SIS ISS [१२]
III ISI ISI SIS S [१३]
III III SIS ISS [१२]
III ISI ISI SIS S [१३]

१८ गुरु ३२ लघु, अक्षर ५० ।

एवमन्येष्वप्यर्द्धसमवृत्तस्य गुरुलघुज्ञानप्रकारः । एवमन्येष्वप्यर्द्धसमवृत्तेषूदाहरणमूह्य इत्युपदिश्यते ।

तथा च भिन्नभिन्नचतुष्पादे विषमवृत्तेऽपि

विलसाढ सोपरमणीषु
तरणितनयातटे हरिः ।
पंचमपरवसे कलयन्
वनिताजनेन निभृतं निरीक्षितः ।

इत्युद्गताभिधाने छन्दसि सप्तपञ्चाशत् ५७ कलात्मके पिण्डे छन्दोऽक्षर संख्यां त्रिचत्वारिंशदात्मिकां ४३ भुञ्ज्येत् । एवमक्षरसंख्यायां भुक्तायां सत्यां चतुर्दशगुरवोऽवशिष्यन्ते । परिशेषात् ऊनत्रिंशल्लघवोऽपि २९ विज्ञेया । इति विषमवृत्तस्य गुरुलघुज्ञानप्रकारः ।

उद्ववणिका यथा—

IIS	ISI	IIS	I		[१०]
III	IIS	ISI	S		[१०]
SII	III	SII	S		[१०]
IIS	ISI	IIS	ISI	S	[१३]

मात्रा ५७ अक्षर ४३।

एवमन्येष्वपि विषमवृत्तेषु गुरुलघुज्ञानप्रकार ऊहनीय सुबुद्धिभिर्ग्रन्थविस्तरभयान्नेहास्माभि. प्रपञ्च्यत इति सर्वं चतुरस्रम्।

वृत्तस्थगुरुलघूना युगपज्ज्ञान न जायते येषाम्।
तेषा तदवगमार्थे सुकरोपायो मया रचित ॥ १ ॥

इति श्रीमन्नन्दनन्दनचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकालङ्कारिकचक्र-चूडामणि-साहित्यार्णवकर्णधार-छन्द शास्त्रपरमाचार्य-श्रीलक्ष्मीनाथभट्टारक-विरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारे वृत्तजातिसमार्द्ध-समविषमसमस्तप्रस्तारेषु तत्तद्वृत्तस्थगुरुलघुसख्याज्ञान-प्रकारसमुद्धारो नाम नवमो विश्रामः ॥ ९ ॥

दशमो विश्रामः

अथ पञ्चमप्रत्ययस्वरूपा वर्णमर्कटीमाह—'मर्कटी लिख्यते' इत्यादिना श्लोकषट्केन—

मर्कटी लिख्यते वर्णप्रस्तारस्यातिदुर्गमा।
कोष्ठमक्षरसख्यात पङ्क्ती रचय षट् तथा ॥ ७० ॥
प्रथमायामाद्यादीन् दद्यादङ्कांश्च सर्वकोष्ठेषु।
अपरायां तु द्विगुणानक्षरसख्येषु तेष्वेव ॥ ७१ ॥
आदिपक्तिस्थितैरङ्कैर्विभाव्य परपक्तिगान्।
अङ्कांश्चतुर्थपक्तिस्थकोष्ठकानपि पूरयेत् ॥ ७२ ॥
पूरयेत् षष्ठपञ्चम्यावर्द्धैस्तुर्याङ्कसम्भवैः।
एकीकृत्य चतुर्थस्थ-पञ्चमस्थाङ्ककान् सुधीः ॥ ७३ ॥

कुर्यात् तृतीयपंक्तिस्थकोष्ठकानपि पूरितान् ।
वर्णानां मर्कटी सेयं पिङ्गलेन प्रकाशिता ॥ ७४ ॥
वृत्तं भेदो मात्रा वर्णा गुरवस्तथा च लघवोऽपि ।
प्रस्तारस्य षडेते ज्ञायन्ते पंक्तितः क्रमशः ॥ ७५ ॥

अत्र एकाक्षरादिषड्विंशत्यक्षरावधिवर्णवृत्तप्रस्तारेषु तत्तद्वृत्तप्रस्तारे कति कति प्रभेदाः कियन्त्यः कियन्त्यो मात्राः कियन्तः कियन्तो वर्णाः, कति कति गुरवः कति कति च लघवः ? इति महाप्रश्ने कृते वर्णमर्कटिकया वक्ष्यमाणस्वरूपया प्रत्युत्तरं देयमिति ।

वर्णमर्कटीविरचनप्रकारो लिख्यते—

मर्कटीति । भो शिष्य ! वर्णप्रस्तारस्य एकाक्षरादिषड्विंशत्यक्षरावधि कृतस्येति शेषः । अतिदुर्गमा-अतिदुष्करा मर्कटीव मर्कटी-तन्तुजालैरिव विरचिता षट्पंक्तिस्तावल्लिख्यते-विरच्यते इति प्रतिज्ञा । तत्र वा स्वेच्छया अक्षर संख्यातं-कोष्ठं रचय तथा षट्संख्याविशिष्टाः पङ्क्तीश्च रचय-कुरु इत्यर्थः ॥७०॥

अथ प्रथमां वृत्तपंक्तिं साधयति—

प्रथमायामिति । तत्र प्रथमायां-प्रथमपंक्तौ वृत्तपंक्तावित्ति यावत् सर्वकोष्ठेषु पूर्वविरचितेषु आद्यादीन्-प्रथमादीन् एकद्वित्र्यादीन् अङ्कान् १ २ ३ यावद्विरतं दद्यात्-विन्यसेत् । एवं कृते प्रथमवृत्तपंक्तिः सिध्यति ।

अथ द्वितीयां प्रभेदपंक्तिं साधयति—

अपरायामिति । चकारः-आनन्तर्यार्थः । तत्र अपरायां तु द्वितीयायां प्रभेदपङ्क्तावित्यर्थः । अक्षरसंख्येषु-तत्प्रस्ताराक्षरसंख्येषु तेष्वेव विन्यस्तेषु कोष्ठेषु द्विगुणान्-द्विचतुरष्टादिक्रमेण द्विगुणानङ्कान् २ ४ ८ यावद्विरतमित्यस्य सर्वत्रानुवृत्तिः दद्यात् इति पूर्वेणैव अन्वयः ॥ ७१ ॥ एवं कृते द्वितीयाप्रभेदपङ्क्तिः सिध्यति ।

अथ क्रमप्राप्तामपि तृतीयां मात्रापङ्क्तिमुल्लंघ्य तन्मूलभूतां चतुर्थीं वर्णपंक्तिं साधयति —

आदिपङ्क्तिस्थितैरिति । आदिपङ्क्तिस्थितैः-प्रथमपङ्क्तिस्थितैः वृत्तपंक्तिस्थितैः एकद्वित्र्यादिभिरङ्कैः परपङ्क्तिगान्-द्वितीयपङ्क्तिस्थितान् द्विचतुरष्टादिक्रमेण स्थितानङ्कान् विताड्य-गुणयित्वा ततस्तद्गुणितैः-द्व्यष्टचतुर्विंशत्यादिभिरङ्कैः २ ८ २४ चतुर्थपङ्क्तिस्थकोष्ठकान् पूरयेदित्यन्वयः । अपि एवार्थे । अपि चारितं पूरयेदेवेत्यर्थः ॥ ७२ ॥ एवं कृते चतुर्थी वर्णपंक्तिः सिध्यति ।

अथ षष्ठ-पञ्चमपक्त्यो पूरणोपायमुपदिशति—

पूरयेदिति। षष्ठपञ्चम्यौ पङ्क्ती कर्मीभूते तुर्याङ्कसम्भवैः-चतुर्थ्यां पक्तिस्थिताङ्कोत्पन्नैरर्द्धैरेकचतुर्द्वादशादिभिरङ्कैः १ ४ १२ पूरयेत्। एव कृते षष्ठपञ्चम्यौ गुरुलघुपक्ती सिद्धयतः। अत्र पक्त्योर्व्यत्यय छन्दोऽनुरोधेन कृत, फलतस्तु न कश्चिद् विशेषोऽङ्कसाम्यादिति पक्तिद्वय सिद्धम्।

अथोर्वरिता तृतीया मात्रापक्ति साधयति—

एकीकृत्येति उत्तरार्द्धपूर्वार्द्धाभ्याम्। तत्र सुधी.—अङ्कमेलनकुशलो गणक चतुर्थपक्तिस्थितान् द्वयष्टचतुर्विंशत्यादिकान् अङ्कान् पञ्चमपक्तिस्थितान् एकचतुर्द्वादशादिकानङ्काश्च, अत्र चकारोऽध्याहार्य, एकीकृत्य—मेलयित्वा त्रि-द्वादश-षट्त्रिंशदादिरूपतामापद्येति यावत् उर्वरितान्—तृतीयपक्तिस्थितकोष्ठकानपि त्रि-द्वादश-षट्त्रिंशदादिरूपैर्मेलितैरङ्कैः ३ १२ ३६ पूरितान् कुर्यादित्यन्वय। अत्राप्यपि एवार्थः। अविचारित पूरितान् कुर्यादेवेत्यर्थ। एव कृते तृतीयामात्रापक्ति सिद्धयति।

फलितार्थमाह— परमार्द्धेन 'वर्णाना' इति।

सोऽय पूर्वोक्तप्रकारेण घटिता वर्णाना मर्कटीव मर्कटी—अङ्कजालरूपिणी पिङ्गलेन—श्रीनागराजेन प्रकाशिता—प्रकटीकृता ॥ ७४ ॥

एव विरचनप्रकारेण पक्तिषट्क साधयित्वा वर्णमर्कटीफलमाह—

वृत्तमिति। वृत्त वृत्तानि—एकाक्षरादीनि 'एकवचन तु जात्यभिप्रायेण' भेदः—प्रभेद वृत्ताना प्रभेदा इत्यर्थ। पूर्ववदत्राप्येकवचननिर्देश। मात्रा—तत्तद्वृत्तमात्रा, वर्णा—तत्तद्वृत्तवर्णा, गुरव—तत्तद्वृत्तगुरवः, तथा च लघवोऽपि—तत्तद्वृत्तलघव इत्यर्थ.। प्रस्तारस्येति सम्बन्धे षष्ठी। एते वृत्तादय षट्—षट्सख्याविशिष्टाः पक्तित—षट्पक्तित क्रमत—क्रमाद् ज्ञायते—हृदयङ्गमता आपद्यन्त इत्यर्थ ॥ ७५ ॥

श्रीलक्ष्मीनाथकृतो मर्कटिकाया प्रकाशोऽयम्।
तिष्ठतु बुधजनकण्ठे वरमुक्ताहारभूषणप्रख्य ॥

अस्याः स्वरूपमुदाहरणमत्र द्रष्टव्यम्। इत्यल पल्लवेनेति।

वर्णमर्कटी यथा—

वर्ण	१	२	३	४	५	६	७	८	९	१०	११	१२	१३
प्रभेद	२	४	८	१६	३२	६४	१२८	२५६	५१२	१०२४	२०४८	४०९६	८१९२
मात्राः	३	१२	३६	९६	२४०	५७६	१३४४	३०७२	६९१२	१५३६०	३३७९२	७३७२८	१५९७४४
वर्णाः	२	८	२४	६४	१६०	३८४	८९६	२०४८	४६०८	१०२४०	२२५२८	४९१५२	१०६४९६
गुरव	१	४	१२	३२	८०	१९२	४४८	१०२४	२३०४	५१२०	११२६४	२४५७६	५३२४८
लघव	१	४	१२	३२	८०	१९२	४४८	१०२४	२३०४	५१२०	११२६४	२४५७६	५३२४८

इति त्रयोदशवर्णा मर्कटी । एवमन्यापि वर्णमर्कटी समुन्नेया । पञ्चमः प्रत्ययो वर्णमर्कटिकाख्यः ।

इति श्रीमदमरनन्दनवरचरणारविन्दमकरन्दास्वादमोदमानमानसचञ्चरीकायमानस्फुरितकल्पद्रुम-
मणि-प्रमत्तप्राक्तनपरमाचार्य-साहित्याम्बुनिधिकर्णधार-श्रीलक्ष्मीनाथभट्टात्मज-
विरचिते श्रीवृत्तमौक्तिक-वार्तिक-दुष्करोद्धारे एकाक्षरादि-
षड्विंशत्यक्षरावधिवर्णप्रस्तारेषु वर्णमर्कटीप्रस्तारोद्धारो
नाम दशमो विश्रामः ॥ १० ॥

एकादशो विश्रामः

श्रीनागराजमानम्य सम्प्रदायानुमानत ।
श्रीचन्द्रशेखरकृते वार्त्तिके वृत्तमौक्तिके ।। १ ।।
वर्णमर्कटिकामुक्त्वा मात्रामर्कटिकामपि ।
दुष्करा दुष्करोद्धारे सुकरा रचयाम्यहम् ।। २ ।।

अथ पचमप्रत्ययस्वरूपामेव मात्रामर्कटीमाह—'कोष्ठान्' इत्यादिना 'नष्टोद्दिष्ट' इत्यन्ते एकादशश्लोकेन—

कोष्ठान् मात्रासम्मितान् पक्तिषट्क,
कुर्यान्मात्रामर्कटीसिद्धिहेतोः ।
तेषु द्व्यादीनादिपक्तावथाङ्का-
स्त्यक्त्वाऽऽद्याङ्क सर्वकोष्ठेषु दद्यात् ।। ७६ ।।

दद्यादङ्कान् पूर्वयुग्माङ्कतुल्यान्,
त्यक्त्वाऽऽद्याङ्कं पक्षपङ्क्तावथाऽपि ।
पूर्वस्थाङ्कैर्भावयित्वा ततस्तान्,
कुर्यात् पूर्णान्नेत्रपक्तिस्थकोष्ठान् ।। ७७ ।।

प्रथमे द्वितीयमङ्क द्वितीयकोष्ठे च पञ्चमाङ्कमपि ।
दत्त्वा बाणद्विगुण तद्द्विगुण नेत्रतुर्ययोर्दद्यात् ।। ७८ ।।

एकीकृत्य तथाऽङ्कान् पञ्चमपक्तिस्थितान् पूर्वान् ।
दत्त्वा तथैकमङ्क कुर्यात्तेनैव पञ्चम पूर्णम् ।। ७९ ।।

दत्त्वा पञ्चममङ्क पूर्वाङ्कानेकभावमापाद्य ।
दत्त्वा तथैकमङ्क षष्ठ कोष्ठ प्रपूरयेद् विद्वान् ।। ८० ।।

कृत्वैक्य चाङ्कानां पञ्चमपक्तिस्थिताना च ।
त्यक्त्वा पञ्चदशाङ्क हित्वैक पूरयेन् मुने कोष्ठम् ।। ८१ ।।

एव निरवधिमात्राप्रस्तारेष्वङ्कबाहुल्यम् ।
प्रकृतानुपयोगवशान् न कृतोऽङ्काना च विस्तार ।। ८२ ।।

एव पञ्चमपक्ति कृत्वा पूर्णां प्रथममेकाङ्कम् ।
दत्त्वा पञ्चमपक्तिस्थितैरथाङ्कैः प्रपूरयेत् षष्ठीम् ।। ८३ ।।

एकोकस्य तथाङ्क कान पञ्चमषष्ठस्थिताम् विद्वाम् ।
कुर्याच्चतुर्थपंक्ति पूर्णां मागाक्षया तूणम् ॥ ८४ ॥
वृत्तं प्रभेदो मात्राश्च वर्णा लघुगुरू तथा ।
एते षटपंक्तितः पूर्णप्रस्तारस्य विभान्ति वै ॥ ८५ ॥
मध्योद्दिष्ट यद्वत् मेरुद्वितय तथा पताका च ।
मर्कटिकापि च तद्वत् कौतुकहेतोर्निबध्यते तज्ज्ञैः ॥ ८६ ॥

तत्र च एकमात्रादिभिरवधिकमात्राप्रस्तारेषु च तत्तज्जातिप्रस्तारे कति कति प्रभेदाः कियन्त्यः कियन्त्यो मात्राः कियन्तः कियन्तो वर्णाः कति कति लघवः कति कति गुरवः ? इति महाप्रश्ने कृते मात्रामर्कटिकया वक्ष्यमाणस्वरूपया प्रत्युत्तरं दातव्यमिति मात्रामर्कटीविरचनप्रकारो लिख्यते—

कोष्ठानिति । तत्र-तावन्मात्रामर्कटीसिद्धिहेतोः-मात्रामर्कटीसिद्ध्यर्थं पंक्ति-षट्कं यथा स्यात्तथा मात्रासम्मितान्-मात्राभिः परिमितान् मात्राणां संख्यया संयुक्तानिति यावत् कोष्ठान् कुर्यात्-विरचयेदित्यर्थः । तेषु-कोष्ठेषु भाविपङ्क्तौ-प्रथमपङ्क्तौ वृत्तपङ्क्तौ इति यावत् द्व्याद्यान्-द्वितीयादीन् द्वितीय-तृतीय चतुर्थ-पञ्चम षष्ठादीनङ्कान् २ ३ ४ ५ ६ इत्यादीन् क्रमेण यावदिष्ट प्रथम वधात्-विन्यसेत् । किं कृत्वा? अथ चेत्यर्थः । सर्वकोष्ठेषु-पद्स्वपि कोष्ठेषु आद्याङ्कं-प्रथमाङ्कं त्यक्त्वा-परित्यज्य । अत्र सर्वकोष्ठेषु प्रथमाङ्कत्यागो न सर्वथा सर्वकोष्ठत्यागपरः किन्तु षष्ठगुरुप्रथमपंक्तिकोष्ठत्यागपरः इति प्रतिभाति । तत्र गुरोरभावादेवेति ब्रूमः । अतस्च सम्प्रदायात् पञ्चसु कोष्ठेषु प्रथमाङ्कविन्यासः कर्त्तव्यः । अन्यथा वक्ष्यमाणाङ्कविन्यासमङ्गापत्तेरिति भावः ॥ ७६ ॥

एवं अङ्कविन्यासे कृते सति प्रथमा वृत्तपंक्तिः सिद्ध्यति ॥ १ ॥

अथ द्वितीयां प्रभेदपंक्तिं साधयति—

दद्यादिति । अथेति-प्रथमपंक्तिसिद्ध्यनन्तरं पश्चात्पङ्क्तावपि-द्वितीय-पंक्तावपि आद्याङ्क-प्रथमाङ्कं त्यक्त्वा-परित्यज्य प्रथमाङ्कस्य पूर्वाङ्कामावात द्वितीयकोष्ठादारम्य प्रथमाङ्कशिरःस्थं प्रथमाङ्कं गृहीत्वा पूर्वयुग्माङ्कतुल्याम् उद्देशक्रमानुसारेण एक-द्वि-त्रि-पञ्चाष्ट त्रयोदशादीन् अङ्कान् १ २ ३ ५, ८ १३ इत्यादीन् अस्यामेव क्रमतो यावदिष्टं दद्यात्-विन्यसेदित्यर्थः ।

एवं अङ्कविन्यासे कृते सति द्वितीयाप्रभेदपंक्तिः सिद्ध्यति ।२।

अथ तृतीयां मात्रापंक्तिं साधयति—

पूर्वस्थाङ्कैरिति । पूर्वस्थाङ्कैः-प्रथमपंक्तिस्थिताङ्कैः ततो द्वितीयपंक्ति पूरणानन्तरं तां द्वितीयां प्रत्येकं-प्रतिकोष्ठं भावयित्वा-गुणयित्वा इत्यर्थः । मेत्र

पक्तिस्थकोष्ठान्-तृतीयपक्तिस्थितकोष्ठान् पूर्णान् कुर्यात्। अतश्चात्रैकचतुर्नव-विंशति-चत्वारिंशदष्टसप्तत्यादिभिरङ्कैः १, ४, ६, २०, ४०, ७८ तृतीय पक्तिस्थितकोष्ठान् पूरितान् कुर्यादित्यर्थः । अत्र नेत्रमख्या रौद्रीति विज्ञातव्या। पाठान्तरे—अग्निपर्यायत्वात् स एवाऽर्थः। एवमन्यत्रापि। शालिनीछन्दसि ।।७७।।

एवमङ्कविन्यासे कृते सति तृतीया मात्रापक्तिः सिद्ध्यति ।।३।।

अथ क्रमप्राप्ता चतुर्थी वर्णपक्तिमुल्लघ्य चतुर्थ-षष्ठपक्तयो युगपदेव साधनार्थं तन्मूलभूता प्रथम तावत् पञ्चमपक्ति साधयति–

प्रथमे इति। तत्र षट्स्वपि प्रथमपक्तिषु प्रथमकोष्ठस्य त्यक्तत्वात्, द्वितीय-कोष्ठकमेवात्र प्रथम कोष्ठकम्। अतः तस्मिन् प्रथमे कोष्ठके द्वितीयमङ्क, तद-पेक्षायाः द्वितीयकोष्ठके च पञ्चमाङ्क च दत्त्वा, ततो बाणद्विगुण-पञ्चद्विगुण दश १०, तद्द्विगुण-दशद्विगुण विंशतिश्च २०, तौ–द्वावङ्कौ नेत्रतुर्ययो तदपेक्षयैव तृतीयचतुर्थयो कोष्ठकयो दद्यात्–विन्यसेदित्यर्थः ।।७८।।

तथा चात्र पञ्चमपक्तौ प्रथमकोष्ठ विहाय द्वि-पञ्च-दश-विंशतिभिरङ्कैः २, ५, १०, २० कोष्ठचतुष्टय पूरयित्वा अग्रिमैतत्पञ्चमकोष्ठपूरणार्थं उपाया-न्तरमाह–

एकीकृत्येति। तथा च–इति आनन्तर्यार्थे। तत पञ्चमपक्तिस्थितान् पूर्वान् पूर्वाङ्कान्–द्व्यादीन् चतुष्कोष्ठस्थान् एकीकृत्य–मेलयित्वा, तथा ततोऽपीत्यर्थः। तस्मिन्नेकीकृताङ्के एकमधिक दत्त्वा निष्पन्ने एतेनाङ्केन अष्टत्रिंशता ३८ अङ्केनैव पञ्चम पूर्वापेक्षाया पञ्चम कोष्ठक पूर्णं कुर्यात् ।।७९।।

अत्रत्य षष्ठकोष्ठपूरणोपायमाह—

त्यक्त्वेति। विद्वान्-अङ्कमेलनकुशलो गणक पूर्वाङ्कान्-द्वितीयादीन् एक-भावमापाद्य–एकीकृत्य सयोज्येति यावत्। ततः पिण्डीकृतेषु एतेषु अङ्केषु पञ्चमाङ्क प्रथमाङ्कवत् त्यक्त्वा। तथा पुनरित्यर्थः। एकमङ्कमधिक दत्त्वा पूर्ववज्जातेन तेन एकसप्तत्या ७१ षष्ठ कोष्ठ प्रपूरयेदिति ।।८०।।

अथ तथैवात्रस्थसप्तमकोष्ठपूरणोपायमाह—

कृत्वेति। पञ्चमपक्तिस्थिताना द्व्यादीना एकसप्तत्यन्ताना षण्णामङ्का-नामैक्य-पिण्डीभाव कृत्वा तेषु पूर्ववत् पञ्चदशाङ्क त्यक्त्वा। ततस्तेष्वपि चैक हित्वा मुने कोष्ठ-सप्तम कोष्ठ त्रिंशदधिकेन शताङ्केन १३० पूरयेत्। इति सप्तमकोष्ठकपूरणप्रकार ।। ८१ ।।

एवमङ्कसप्तकेन द्वि-पञ्च-दश-विंशत्यष्टविंशत्येकसप्तति त्रिंशदधिकैकशतक-क्रमेण २, ५ १० २० २८ ७१ १३० पञ्चमपङ्क्तौ कोष्ठसप्तकं पूरयेदिति । एवं चात्रत्ये पूरणीये तत्तत्कोष्ठे अत्रत्यानां द्व्यादीनामङ्कानां एकीभावं कृत्वा यथासम्भवं तत्तदङ्कं त्यक्त्वा तेष्वपि यथासम्भवं एकादिकं हित्वा तत्तत्कोष्ठकं पूरयेदिति संक्षेपः ।

एवं अङ्कविन्यासे कृते सति चतुर्थपञ्चमपंक्तिसंगमो पञ्चमी लघुपंक्तिः सिद्धयति । ननु अस्यां पङ्क्तावग्रिमकोष्ठाऽङ्कसञ्चारः क्रियतां इत्याकांक्षायां प्रकृतानुपयोगादङ्कबाहुल्याद् ग्रन्थविस्तरशङ्कया न क्रियत इत्याह—

एवमिति । सुगमम् ॥ ८२ ॥

अथ पञ्चमपंक्तिपूरणमुपसंहरन् षष्ठ्गुरुपंक्तिपूरणप्रकारमुपदिशति—

एवमिति । एवं पूर्वोक्तप्रकारेण पञ्चमपंक्तिं पूर्णां कृत्वा तत्र गुरुस्थानीये प्रथमं कोष्ठं विहाय अग्रिमकोष्ठे–प्रथमं प्रथमतः एकाङ्कं दत्वा पूरणीयम् । अथ–अनन्तरं पञ्चमपंक्तिस्थितैः द्वितीयादिभिरङ्कैः पूर्वस्थापितैरेव प्रतिकोष्ठं षष्ठीं प्रपूरयेदिति । तथा च षष्ठपङ्क्तौ ० १ २ ५ १० २० २८ ७१ १३० शून्यैक-द्वि-पञ्च-दश-विंशति-अष्टविंशत्येकसप्तति-त्रिंशदधिकैकशताङ्कविन्यस्ता पूरणीया इति ॥ ८३ ॥

एवमङ्कविन्यासे कृते सति षष्ठी गुरुपंक्तिः सिद्धयति ॥ ६ ॥

अथोर्वरितचतुर्थवर्णपंक्तिपूरणप्रकारमुपदिशति–

एकीकृत्येति । विद्वान्–अङ्कमेलनकुशलो गणकः तथा पूर्वोक्तप्रकारेण पञ्चम षष्ठपंक्तिस्थितान् द्व्येकादीन् अङ्कान् प्रतिकोष्ठं एकीकृत्य–संयोज्य नारायण-श्रीपिङ्गलनागोक्तमार्गेण चतुर्थपंक्तिवर्त्तिसमस्तकोष्ठकपंक्तिं तूर्णं–अविचारितमेव पूर्णं कुर्यादिति । अत्रत्यप्रथमकोष्ठे असंयुक्तः पञ्चमकोष्ठस्थप्रथमांकः स्वप्रदाम लभ्यो देय इति रहस्यम् ॥ ८४ ॥

तथा चतुर्थपङ्क्तौ १ ३ ७ १५ ३० ५८ १०१, २०१ एक-त्रि-सप्त पञ्चदश त्रिंशद्-अष्टपञ्चाशत्-नवाधिकशतैकोत्तरद्विशताङ्का विन्यस्ता पूरणीया इति ।

एवं अङ्कविन्यासे कृते सति चतुर्थी वर्णपंक्तिः सिद्धयतीति ॥ ४ ॥

एवं निरूपणप्रकारेण पंक्तिषट्कं साधयित्वा मात्रामर्कटीफलमाह—

वृत्तमिति । वृत्त–वृत्तानि एकमात्रादिभिरवधिकमात्राजातयः । एकवचनं जात्यभिप्रायेण । प्रभेदजातीनां प्रभेदा इत्यर्थः । पूर्ववदत्राप्येकवचननिर्देशः ।

मात्रा –तत्तज्जातिमात्रा, वर्णाः–तत्तज्जातिवर्णा तथा–तत इत्यर्थ.। लघुगुरू–तत्तज्जातिलघवस्तत्तज्जातिगुरवश्चेत्यर्थ । एते वृत्तादय षट्प्रकारा· पूर्णप्रस्तारस्य समुदिता षट्पक्तितो निश्चित विभान्ति–प्रकाशन्त इत्यर्थ ।। ८५ ।।

ननु एतत्करण आवश्यकमनावश्यक वा ? इति परामर्शे छान्दसिकपरीक्षारूपत्वात् केवल कौतुकमात्राधायकत्वाच्च अस्य करण अनावश्यकमेवेत्याह–

नष्टोद्दिष्टमिति । यथा नष्टोद्दिष्टादिकं कौतुकावह तथैव तद्विरचनमपीत्यर्थ इति सर्वमवदातम् ।। ८६ ।।

मात्रामर्कटी यथा–

वृत्तम्	१	२	३	४	५	६	७	८	९	१०	११
प्रभेदाः	१	२	३	५	८	१३	२१	३४	५५	८९	१४४
मात्रा·	१	४	९	२०	४०	७८	१४७	२७२	४९५	८९०	१५८४
वर्णा	१	३	७	१५	३०	५८	१०९	२०१	३६५		
लघव	१	२	५	१०	२०	३८	७१	१३०	२३५		
गुरव	०	१	२	५	१०	२०	३८	७१	१३०		

इति एकादशमात्रामर्कटी । एव अन्येऽपि मात्रामर्कटी समुन्नेया । तथैव मात्रामर्कटिकाख्य पचम प्रत्यय ।

[वृत्तिकृत्प्रशस्ति]

श्रीमत्पिङ्गलनागेन प्रोक्तो यो मर्कटीक्रमः ।
विविच्य स मया प्रोक्तः शिष्यानुग्रहहेतवे ॥ १ ॥
मुनीभभूपतिमिते १६८७ वैक्रमेऽब्दे प्रमाथिनि ।
कार्त्तिकेऽसितपञ्चम्यां लक्ष्मीनाथो व्यरीरचत् ॥ २ ॥
वार्त्तिके दुष्करोद्धारमुदारं साम्यसम्प्रियम् ।
पद्य-सारं स्फुटार्थं च कवीनां कौतुकावहम् ॥ ३ ॥

इति श्रीमत्सकलसमरवारविस्तारकरमहाराजमौलिमानमानसकमलराजहंससूरिकुल-
भूषणमणि-साहित्यार्णवकर्णधार-छन्दःशास्त्रपरमाचार्य-श्रीलक्ष्मीनाथभट्टारक-
विरचिते श्रीवृत्तमौक्तिकवार्त्तिकदुष्करोद्धारे एकमात्रादिविरचित-
मात्राप्रस्तारेषु सप्तमात्रिकमात्राप्रस्तारोद्धारो
नामैकादशो विश्रामः ॥ ११ ॥

समाप्तश्चायं वृत्तमौक्तिकवार्त्तिके दुष्करोद्धारः ।

शुभमस्तु । श्रीमत्परमात्मने नमः ।

संवत् १६६८ समये भाद्रपदसुदि ३ भौमे शुभदिने धर्मपुरस्थाने लिखितं लालमणि-मिश्रेण । शुभं भूयात् । श्रीविश्वेशाय नमः ।

महोपाध्यायश्रीमेघविजयगणिसन्दृब्ध

वृत्तमौक्तिकदुर्गमबोधः

[उद्दिष्टादिप्रकरणव्याख्या]

[मङ्गलाचरणम्]

प्रणम्य फणिना नम्य सम्यक् श्रीपार्श्वमीश्वरम् ।
उद्दिष्टादिषु सूत्रार्थं कुर्वे श्रीवृत्तमौक्तिके ॥ १ ॥

अथ वृत्तमौक्तिके उद्दिष्ट नष्ट वर्णतो मात्रातो वा विव्रियते—

दत्त्वा पूर्वयुगाङ्कान् लघोरुपरि गस्य तूभयतः ।
अन्त्याङ्के गुरुशीर्षस्थितान् विलुम्पेदथाङ्कांश्च ॥ ५१ ॥
उद्धरितैश्च तथाङ्कैर्मात्रोद्दिष्ट विजानीयात् ।

षड्भिः पदै सूत्र तद्व्याख्या—

केनापि नरेण लिखित्वा दत्त । ऽ । ऽ । इद कतमत् रूपम् ? इति प्रश्ने उद्दिष्ट ज्ञेयम् । तत्र पुर्वयुगलाङ्का प्रत्येक धार्या । पुर्वयुगलाङ्का इति सज्ञा अङ्कानाम् । तत्कथम् ? इति चेत्, मात्रोद्दिष्टे १।२।३।५।८।१३।२१।३४।५५।८९ इति । अत्र १ मध्ये २ योजने ३ । पुन ३ मध्ये पूर्वाङ्क २ मेलने ५ । पुन ५ मध्ये स्वपूर्वाङ्क ३ मेलने ८ । तत्रापि स्वपूर्वाङ्क ५ मेलने १३ । तत्रापि स्वपूर्वाङ्क ८ क्षेपणे २१ । तस्मिन्नपि स्वपूर्वाङ्क १३ एकीकरणे ३४ । तन्मध्ये स्वपूर्वाङ्क २१ क्षेपे ५५ । अत्रापि स्वपूर्वाङ्क ३४ योगे ८९ इत्येव योजनारीति । पूर्वं पूर्वमेलनाज्जातत्वात् पूर्वयुगाङ्का इति सज्ञाभाज । तद्धरणरीति —

१ २ ५ ८ २१
। ऽ । ऽ ।
३ १३

एव लघोरुपरि एक अङ्कन्यास गस्य-गुरोस्तु उभयत –उपरि अधश्च पार्श्वद्वयेऽपि अङ्कधरणम् । एतत् कृत्वा अन्त्याङ्के २१ रूपे गुरोरुपरिस्था अङ्का २।८ मेलने १०, एते २१ मध्यात् विलुम्पयेत्-पराकुर्यात्, उद्धरितोऽङ्क ११ एव निश्चित ज्ञात सप्तमात्रे मात्राच्छन्दसि एकादश रूपमिदम् । ईदृश ।ऽ।ऽ। अन्यत्रापि ।

त्रिकले छन्दसि ।ऽ इदं कतमं रूपम् ? इति पृच्छायां पूर्वयुगाङ्कभरण १ २
। ऽ
३
तत्रान्त्याङ्क ३ तन्मध्यात् गुरुशीर्षस्याङ्क २ विलोपने शेषं १ इति प्रथम रूपम् । ऽ ईदृशम् । परत्रापि ऽ। इद कतमत् ? इति प्रश्ने १ ३ मन्त्याङ्के ३
। ऽ
२
गुरुशीर्षस्य १ विलोपे शेषं २ इति द्वितीयं रूपं त्रिकले ऽ। ईदृशम् ।

चतुष्कले छन्दसि ऽ ऽ इद कतमत् ? इति पृच्छायां १ ३ अङ्केषु पूर्वषु
ऽ ऽ
२ ५
अन्त्याङ्कः ५ तन्मध्याद् गुरुशीर्षस्य अङ्कद्वयं १।३ एतयोर्मेलने ४ तदविलोपने शेष १ प्रथम रूपम् ऽऽ, द्वितीयेऽपि १ २ ३ अङ्केषु न्यस्तेषु अन्त्याङ्क ५
। । ऽ
५
तन्मध्यात् २ गुरुशिरस्याङ्क ३ तल्लोपे शेषं २ इति द्वितीय रूपम् । तृतीये । ऽ। ईदृशेऽङ्का १ २ ५ अन्त्याङ्क ५ तत गुरुशिरस्य २ लोपे शेष ३ तृतीयं
। ऽ ।
३
रूपम् । तुर्ये ऽ । । ईदृशेऽङ्का १ ३ ५ अन्त्याङ्क ५ तत गुरुशिरस्य १
ऽ । ।
२
लोपे शेष तुर्यं रूपं ऽ।। पञ्चमं सर्वलघुकम् ।

पञ्चकले । ऽ ईदृशेऽङ्का १ २ ५ अत्रान्त्याङ्क ८ तत गुरुशिरस्य
। ऽ ऽ
३ ८
२।५ एवं ७ लोपे प्रथमं रूपम् । ऽ ईदृशेऽङ्का १ ३ ५ अन्त्य
। ऽ
२ ८
८ तन्मध्यात् १।५ एवं ६ तल्लोपे शेषं २ द्वितीयं रूपम् । तृतीयं । । । ऽ ईदृशेऽङ्का १ २ ३ ५ अत्र प्राग्वत् ८ मध्यात् गुरुशीर्षस्य ५ लोपे शेषं
। । । ऽ
८

३ तृतीयम् । तुर्येपि १ ३ ८ प्राग्वत् ८ मध्यात् १ । ३ गुरुशीर्षस्थ ४
S S ।
२ ५

लोपे शेष ४ तुर्य रूपम् । पञ्चमेऽपि १ २ ३ ८ इत्यत्र गुरुश
। । S ।
५

३ लोपे अन्त्याङ्क ८ मध्ये शेषं ५ इति [पञ्चम रूपम्] । षष्ठे १ २
। S
३

अन्त्याङ्क ८ मध्यत गुरुशिरःस्थ २ लोपे शेष ६ [इति षष्ठं रूपम्] । स
१ ३ ५ ८ तत्र अन्त्याक ८ मध्यात् गुरुशीर्षस्थ १ लोपे शेष ७
S । । ।
२

सप्तम रूपम् ।

एव षट्कले मात्राच्छन्दसि १ ३ ८ अत्रान्त्याङ्क १३ तत
S S S
२ ५

स्थिताङ्क १।३।८ एषा लोपे शेष १ प्रथम

प्राग्वत् ३।८ एव ११ तेषा १३ मध्याल्लोपे शेषं २
१ २ ५ ८ अन्त्याङ्क १३ तत २।८ एव १० ...२
। S । S
३ १३

१ २ ५ १३ २१ ५५ अत्र गुरुशीर्षस्थाङ्क सर्वमेलने ८९
। S S । S S
३ ८ ३४ ८९

८९ मध्ये शेष ६ रूपमिद दशकले छन्दसि ।

पुव्व जुयल सरि अका दिज्जसु, गुरु सिर अक सेस मेटिज्जसु ।
उवरिल अक लेखि कहुआण, ते परि धुअ उद्दिट्ठा जाण ॥
[प्राकृतपैङ्गलम्, परि १, पद्य ३९]

दत्त्वा पूर्वयुगाङ्कं गुरुशीर्षाङ्कं विलुप्य शेषाङ्के ।
मत्र्कैरितोऽवशिष्टैः शिष्टैरुद्दिष्टमुद्दिष्टम् ॥

[वाणीभूषणम् परि १ पद्य ११]

मत्त मत्त युग अंक, लघु सिर गुरुतर हू धरो ।
ओर अंक सरवक, सब्बहि भाट उद्दिट्ठ कहु ॥

लघोः शीर्षे एकाङ्कः धार्यः गुरोः शीर्षे तथा 'तर' इति भाषाविशेषात् तले अधोऽपि अङ्कः धार्यः । यथा—पञ्चकले प्रस्तारे १ २ ५ प्रथमस्याङ्के ८

। ऽ ऽ

३ ८

ततः गुरुशीर्षस्थाङ्का २ ५ = ७ सप्तमं रूपम् ।

१ २ ५ ८ २१ गुरु सिर अंक्यामने १० ते २१ मध्ये ऊन शेषं ११

। ऽ । ऽ ।

३ १३

संख्या प्राप्ता इति एकादशमिदं रूपमिति छन्दोरत्नावलीग्रन्थे ।

१ २ ३ ५ ८ १३ २१ अथ प्रश्न—सप्तकलप्रस्तारे एकादशं

। । । । । । । ११

। ऽ । ऽ ।

रूपं कीदृशम् ? इति तदा प्राप्तं ।ऽ।ऽ। इदम् ।

इति मात्रोद्दिष्टप्रकरणं पूर्णम् ।

मात्रानष्ट-प्रकरणम्

अथ मात्रानष्ट यथा—

यत्कलकः प्रस्तारो लघवः कार्याश्च तावन्त ।
दत्त्वा पूर्वयुगाङ्कान् पृष्टाङ्क लोपयेदन्त्ये ।। [।। ५३ ।।]
उद्वरितोद्वरितानामङ्कानां यत्र लभ्यते भागः।
परमात्राञ्च गृहीत्वा स एव गुरुतामुपागच्छेत् ।। [।। ५४ ।।]

अस्यार्थ —यावत्य कलाः प्रस्तारे एककलस्य एक एव लघु । ईदृश द्वि-कलस्य द्वे रूपे, आदौ एक एव गुरुः ऽ ईदृश., द्वितीयरूपे लघुद्वयम् ।। ईदृशम् । अत्र पृच्छानवकाशात् न इष्टरूपलाभ , असम्भवात् । त्रिकले मात्राच्छन्दसि त्रीणि रूपाणि । चतु कले पञ्चरूपाणि १।२।३।५ इति पूर्वयुगाङ्कात् । पञ्चकले अष्ट-रूपाणि १।२।३।५।८ इति पूर्वयुग्माङ्कात् । षट्कले १३ रूपाणि तावत् एव पूर्व-युग्माङ्कात् । सप्तकले २१ रूपाणि तथैव ।

एव कलाप्रमाणा लघवो लेख्या , यथा—सप्तकले मात्राच्छन्दसि इष्ट एकादश रूप कीदृश ? इति, मुखेन केनचित् पृष्टम्, तदा सप्तैव लघव ।।।।।।। अनया रीत्या लेख्या । तेषामुपरि १।२।३।५।८।१३।२१ एते धार्या । अत्र पृष्टे इष्टाङ्क ११, तस्य २१ मध्याल्लोपे शेष १।२।३।५।८।१३।१० इति। तदा दश-मध्ये त्रयोदश न पतन्तीति भागाभाव , तदा ८ अङ्क १३ मध्ये पात्य , एव अष्टाध कलामाकृष्य त्रयोदशाधो गुरु स्थाप्य, दशाध एका कलाऽवशिष्टा, अष्टकस्य लोप परमात्राग्रहेण गुरुभावात् । अथ त्रिकस्य कला पञ्चके न गृह्यते, मुख्यैककस्य द्विकेन गृह्यते तदा ऽऽऽ। ईदृश नवमरूपतापत्ते । यद्वा त्रिकस्य कला पञ्चके न गृह्यते १।२ अनयो कलाद्वय लघुरूपमेव ध्रियते तदा दशम रूप ईदृश स्यात् ।।ऽऽ, तेन पञ्चकाऽध कला एका भिन्नैव रक्ष्या, अग्रे द्वितीयाङ्कस्य त्रिके कलाग्रहेण त्रिकाधो गुरु , मुख्यैककलाशेषात्, एव ।ऽ।ऽ। ईदृश एकादश रूप व्यवस्थितम् । द्विकाष्टकयोर्लोप 'उवरिल अकलोपके लेख' इति वचनात् । यदुक्त छन्दोरत्नावल्याम्—

सव लघु सिर ध्रुव अक, प्रश्नहीन शेषाङ्क धरि ।
पर लघु ले लिख वङ्क उवरि भाग जह जह परइ ।।

यद्वा, दशाना भागस्त्रयोदशे प्राप्यते 'दश एके दश' शेषं ३ विषमत्वात् परस्य-अन्यस्य त्रयोदशात् पूर्वस्य अष्टकस्य कलाग्रहेण त्रयोदशस्थानजातत्रिकाधो

ग अष्टकलोपः, तथाधो ल पञ्चके त्रिकस्य भागे शेषं २ इति समत्वात् पञ्चाधो ल ऽ। द्विकस्य त्रिके भागाप्तौ शेष १ इति विषमाङ्कत्वाद् गुरु द्विकस्य कलाग्रहाद् द्विकलोपः, मुख्यैकाधो यथास्थितो लघुरेव, एवं । ऽ । ऽ । इत्येकादश व्यवस्थित सप्तकले ।

अथ बालबोधाय इयमेव व्याख्या विस्तरत —

प्रथम त्रिकले मात्राच्छन्दसि त्रिलघुकरण तस्य न्यासः १ २ ३ तदुपरि
| | |

पूर्वयुगाङ्कदानम् । तत्र पृष्टं प्रथमरूपं त्रिकले कीदृग् ? इति, एवं इष्ट एकस्य तत् त्रिकात् अन्त्याङ्कात् पराङ्कं-मुष्टमिति यावत् शेष १ । २ । २ 'उद्धरितो-द्धरितानां अङ्कानां यत्र लभ्यते भाग' इति वचनात् द्विकस्य द्विकेन भागे पर द्विकाधो ग पूर्वस्य द्विकस्य कलाग्रहात् तस्य लोप शेषं । ऽ इति प्रथम रूपम् । पृष्टे द्वितीये, अन्त्यत्रिकात् २ लोपे शेषं १ । २ । १ अत्र अन्त्यैककस्य भाग लाभो द्विके तदधो ग मुख्यैककलाग्रहात् तस्य लोपः, अन्त्यैकाधो ल ऽ। इति द्वितीय रूपम् । तृतीय सर्वलघुरूपमेव ।

अथ चतुःकले १ २ ३ ५ अत्र पृष्टे १ लोपे शेष १ । २ । ३ । ४
| | | |

त्रिकस्य भाग चतुष्के प्राप्य तदधो ग त्रिकस्य कलाग्रहाद् त्रिकलोप, द्विकेपि मुख्यैकस्य भाग तेन द्विकाधो गः, एककस्य लोप जातं ऽऽ प्रथमम् । पृष्टे २ लोपे शेषं १ । २ । ३ । ३ त्रिके—त्रिकस्य भागे परत्रिकाधो ग पूर्वत्रिकलोप कलाग्रहात् शेषे द्विके एकस्य भागाप्तौ कलाङ्कसाम्यादपि पूर्वस्याप्राप्तिः, तेन मैकस्यापि लोप लघुद्वयं । । ऽ द्वितीयम् । पृष्टे ३ लोपे शेष १ । २ । ३ । २ एवं द्विकस्य अन्त्यस्य भागस्त्रिके तदधो ग पूर्वद्विकस्य कलाग्रहात्लोप एवं । ऽ । तृतीयम् । पृष्टे ४ लोपे सर्व १ । २ । ३ । १ एकस्य भागोऽत्र त्रिके एवमन्त्यैकाधो ल त्रिकेऽपि शेषाभावादधो लः, 'त्रिम एक् ३ लघु १ तस्य भागः द्विके तदधो ग एकलोप अत्र मुख्यैकस्य भागो द्विके तदधो ग कलापूर्ते त्रिके चान्त्यैकके च प्रत्येकं कला मुख्यैककलोपः, ऽ । । तुर्यम् । पञ्चमं लघुसकलरूपम् ।

पञ्चकले १ २ ३ ५ ८ अत्र पृष्टे १ लोप शेष १ २ ३ ५, ७
| | | | |

अत्र सप्तके पञ्चकस्य भागः, तेन सप्ताधो ग पञ्चकस्य लोपः, द्विकस्य त्रिके भाग तदधो ग द्विकलोप मुख्यैकाधः कला स्थितैव । ऽऽ प्रथमम् । पृष्टे २ लोपे शेषं १ २, ३ ५ ६ षट्के पञ्चकस्य भागे

षडघो ग, पञ्चकलोप, त्रिके-त्रिकलस्य द्वितीयरूपस्य गुर्वधिकत्वे तादृूप्यात् द्विकस्य भाग पूर्वरूपे कृत तेनात्र द्विके एकस्य भागे द्विकाधो ग, मुख्यैकलोप, त्रिकाध कला, द्वितीय ऽ। ऽ रूपम्। पृष्टे ३ लोपे शेष १, २, ३, ५, ५, पञ्चकेन पञ्चकस्य भागे परपञ्चकाघो ग., पूर्वपञ्चकलोप, शेप कलात्रयमङ्कत्रय चेति साम्यात् ५, ५ इति समभागाच्च प्रत्येक लघवस्त्रय, एव।।। ऽ तृतीयम्। पृष्टे ४ लोपे शेप १, २, ३, ५, ४, अत्र चतुष्के पञ्चकभागो न प्राप्य, पञ्चके चतु कस्य भागात् पञ्चकाघो ग, त्रिकस्य कलाग्रहाल्लोप, चतु काध. कला, एव कलात्रये सिद्धे शेषमङ्कद्वय कलाद्वय चेति साम्याल्लघुद्वय कार्यमिति न विचार्यं द्वाभ्या कलाभ्या गुरुसिद्धेर्गुरु स्थाप्य। पञ्चकलेऽष्टरूपात्मके तुर्यरूपे लघ्वन्ते गुरुद्वयेनापि कलापूर्त्ते इति एकस्य द्विके भागात् द्विकाघो ग', मुख्यैकलोपः, एव ऽ ऽ। तुर्यम्। पृष्टे ५ लोपे शेप १, २, ३, ५, ३, अत्र त्रिकस्यान्त्यस्य पञ्चके भागात् पञ्चकाधो ग, अन्त्यत्रिकाघो ल, पूर्वत्रिकलोप, अत्रापि समकलाङ्कत्वे गुरुरिति न कार्य पूर्वरूपापत्ते, अर्द्धोपरि लघूनामेव वृद्धे। तेन लघुद्वय।।ऽ। पञ्चमम्। पृष्टे ६ लोपे शेष १, २, ३, ५, २, अत्र पञ्चकस्य त्रिके भागो नेति द्विकस्य त्रिके भागात् त्रिकाघो ग, द्विकलोप, पञ्चाघो ल, अन्त्यद्विकाघो ल, मुख्यैकाधोऽपि ल, तेन। ऽ।। षष्ठम्। पृष्टे ७ लोपे शेष १, २, ३, ५, १, अत्र पूर्वरूपे द्विकस्य त्रिके भागलाभात् त्रिकाघो ग, उक्त. सप्तमे पुना रूपे द्विके एकस्य भागात् द्विकाघो ग, मुख्यैकलोपः त्रि-पञ्च अन्त्यैकानामध प्रत्येक लघुत्रय, ऽ।।। सप्तमम्। पर सर्वलमष्टमम्।

षट्कले १, २, ३, ५, ८, १३, इह पृष्टे १ लोपे शेष १, २, ३, ५, ८, १२,
। । । । । ।

अत्र १२ मध्ये ८ भागे द्वादशाघो ग, अष्टकलोप, एव पञ्चके त्रिकस्य भागात् पञ्चकाधो ग, त्रिकलोप., द्विके मुख्यैकस्य भागात् द्विकाघो ग, मुख्यैकलोप सर्वत्रकलाग्रहात् ऽऽऽ प्रथमम्। पृष्टे २ लोपे शेष १, २, ३, ५, ८, ११, अत्रापि ११ मध्येऽष्टभागात् तत्कलाग्रहे ११ अधो ग, ८ लोप', पञ्चके त्रिकस्य भागात् पञ्चाघो ग, त्रिकलोप', शेषाङ्ककलासाम्यात्।।ऽऽ द्वितीयम्। पुन. पृष्टे ३ लोपेऽन्त्यदशाघो ग, अष्टाना भागे तत्कलाग्रहात् त्रिकाघो ग, द्विकस्य कलाग्रहात् पञ्चाघो ल, मुख्यैकाधो ल, एव।ऽ।ऽ तृतीयम्। पुन पृष्टे ४ लोपे शेष ९, अन्ते तत्राप्यष्टकलाग्रहादधो ग, द्विके एकस्य भागात् कलाग्रहे द्विकाघो ग, त्रिकाघो ल,, परस्य अष्टकस्य लोपात् पञ्चाघो ल, भागासम्भवात्, एव ऽ।।ऽ चतुर्थम्। पृष्टे ५ तस्य १३ मध्यात् लोपे शेष १, २, ३, ५, ८, ८, पूर्वाष्टककलाग्रहात् पराष्टकाघो ग, पूर्वाष्टकलोप, शेषे कलाङ्कसाम्यात्

चतस्र कला एव । यद्यत्र पञ्चके त्रिकभागात् द्विके एकस्य भागात् कलाग्रहणादि क्रियते तदा पूर्वरूपापत्तिः सा तु सर्वत्रापि निषिद्धा 'उपरिस्थ अंक लोपिकें लेख' इति वचनात् ।।।।ऽ पञ्चमम् । षष्ठे पृष्टे १२ मध्यात् ६ लोपे अन्ते ७ तदष्टानां भागो नाप्य किन्तु सप्तानां भागोऽष्टके तेनाष्टाधो ग., सप्ताधो ल पञ्चकस्य लापोऽष्टकेन कलाग्रहात् द्विकस्य त्रिके भागात् त्रिकाधो ल द्विकलोप मुख्यैकाधो ल., एव ।ऽऽ। षष्ठम् । पृष्टे ७ तल्लोपेऽन्ते ६ तदधो ल., अष्टके षट्कस्य भागात् अष्टाधो ग पञ्चके लोपात् द्विके एकस्य भागात् द्विकाधो ग, एकस्य कलाग्रहात् एकस्य लोप, त्रिकाधो ल एव ऽ।ऽ। सप्तमम् । पृष्टे ८ तल्लोपेऽन्ते ५ तदधो ल पञ्चकस्य अष्टके कलाग्रहात् अष्टाधो ग., पञ्चकस्य अन्त्यस्य भागसामाभ्य शेषे कलाङ्कसाम्यात् अथ प्रत्येक लघव ।।।ऽ। अष्टमम् । पृष्टे ९ लोपे शेषं १, २ ३ ५, ८ ४ चतुष्कस्य अष्टसु भागात् चतुष्काधो ल अष्टाधोऽपि ल पञ्चके त्रिकभागात् तत्कलाग्रहेण पञ्चाधो ग त्रिकलोप द्विके एकस्य भागात् तत्कलाग्रहे द्विकाधो ग एकस्य लोप एव ऽऽ।। नवमम् । *अत्र पञ्चकस्य कला नाष्टके क्षेप्या पूर्वरूपापत्तेः गुरूणां स्यादग्रभागसम्भारात्तु पश्चिमभागे लघूनामाधिक्याच्च ।* पृष्टे १० लोपे शेष १ २ ३ ५, ८ ३ तदा त्रिकस्यान्त्यस्य अधो ल अष्टाधोऽपि ल त्रिकस्य पञ्चके भागात् पञ्चाधो ग त्रिकलोप शेषं १ । २ कलाङ्कसाम्याल्लघुद्वय ।।ऽ।। दशमम् । पृष्टे ११ लोपे प्राप्त २ तदधो ल द्विकस्य त्रिके भागात् कलाग्रहे त्रिकाधो ग., द्विकलोप शेषं १ ५ ८ एषु प्रत्येक ल: एव ।ऽ।।। एकादशम । पृष्टे द्वादशे १२ लोपे, शेष १ २ ३ ५, ८ १ अत्र द्विकेन मुख्यैकाध कलाग्रहात् द्विकाधो ग मुख्यैक-लोप शेष ३ ५ ८ १ एषामधो लघव., एवं ऽ।।।। द्वादशम् । परं सर्वलघुकम् ।

सप्तकले १ २ ३ ५ ८ १३ २१ अत्र पृष्टे १ लोपे शेषं १ २ ३ ५,
                । । । । । । ।

८ १३ २० अत्र विंशतौ १३ भागप्राप्ति तेन विंशाधो ग., १३ लोप., अष्टाधो ग पञ्चलोप त्रिकाधो ग द्विकलोप मुख्यैककला स्थितैव एवं ।ऽऽऽ प्रथमम् । पृष्ट २ लोपे शेषं १९ तदधो ल १३ लोपात् अष्टाधो ग पञ्चलोपात् त्रिके द्विककलाग्रह प्रथमरूपे अत्र द्विके मुख्यैककलाग्रहात् द्विकाधो ग एकलोप., त्रिके कला एव ।ऽऽ द्वितीयम् । पृष्टे ३ लोपे अन्ते १८ तदधो ल., १३ भागात् १३ लोप अष्टाधो ग पञ्चककलाग्रहात् तल्लोप शेषं समकलाङ्कत्वात् ३ लघव ।।। ऽ तृतीयम् । पृष्टे ४ लोपे शेषं १७ तदधो ल. १३ लोप पञ्चाधो ग त्रिकद्विककलाग्रहात् अष्टाधो ल द्विकाधो ग मुख्यस्य कला स्थिता ऽऽ।ऽ तुर्यम् ।

पृष्टे पञ्चलोपे शेषमन्ते १६, तदधो ग., १३ कलाग्रहात् लोप, अष्टाधो ल., पञ्चकेऽधो ग, त्रिके कलाग्रहाल्लोप, शेषे समकलाङ्कत्वाल्लघुद्वय।।ऽ।ऽ पञ्चमम्। पृष्टे ६ तल्लोपे शेषमन्ते १५, तदघो ग., अष्टाधो ल, पञ्चाधो लः, त्रिकाधो ग., द्विकस्य कलाग्रहात् मुख्याध कला एव, एव।ऽ।।ऽ षष्ठम्। पृष्टे ७ तल्लोपेऽन्ते १४, तदघो ग, १३ न्यूनत्वात् लोप· ८।५।३ अधो ल, द्विकाधो गः, मुख्यकलाग्रहात लोप ऽ।।।ऽ सप्तमम्। पृष्टे ८ लोपे शेषमन्ते १३, पूर्व १३ अधो गः, समभागबलात् पूर्व १३ लोप', एव कलाद्वय, शेषपञ्चाङ्काः पञ्चकला चेति साम्यात् पञ्च लघव एव।।।।।ऽ अष्टमम्। पृष्टे ९ लोपे शेषमन्ते १२, तेन भागः पूर्व १३ मध्ये, यदुक्त **वाणीभूषणे**—

> नष्टे कृत्वा कला सर्वा पूर्वयुग्माङ्कयोजिता।
> पृष्ठाङ्कहीनशेषाङ्क येन येनैव लुप्यते॥
> परा कलामुपादाय तत्र तत्र गुरुर्भवेत्।
> मात्राया नष्टमेतत्तु फणिराजेन भाषितम्॥
>
> (वाणीभूषणम्, परि १, पद्य ३२-३३)

तेन १३ अधो ग., १२ अधो ल, अष्टकस्य लोपः कलाग्रहात् एव पञ्चाधो गः, त्रिकभागेन कलाग्रहात् द्विकाधो ग, मुख्यलोपात्, एव ऽऽऽ। नवमम्। पृष्टे सप्त-कले छन्दसि दशम रूप कीदृग्? इति, तदा १ २ ३ ५ ८ १३ २१ एव

| | | | | | |

कला कृत्वा पूर्वयुग्माङ्कयोजिता पृष्टाङ्क १०, ते २१ मध्यात् अपकृष्टा. शेष ११, तेषा १३ मध्ये भागात् तदधो ग, ११ अधो लः, अष्टकलोप, पञ्चाधो ग, त्रिककलाग्रहात्, शेष कलाङ्कयोः साम्याल्लघुद्वय।।ऽऽ। दशम रूपम्। पृष्टे ११ तस्य लोपे १०, तत १३ मध्ये भागात् १३ अधो ग, अष्टलोप, त्रिके द्विकभागात् त्रिकाधो ग द्विकलोप, एव रूप।ऽ।ऽ। एकादशम्। पृष्टे १२ तल्लोपे शेष ९ तस्य १३ मध्ये भागात् १३ अधो ग, ९ अधो ल, अष्टलोप, द्विके मुख्यैकस्य भागात् द्विकाधो ग, मुख्यलोप त्रिकपञ्चकयो अधो ल प्रत्येक, एव ऽ।।ऽ। द्वादशम्। पृष्टे १३ तल्लोपे शेष ८ तस्य १३ मध्ये भागात् १३ अधो ग, ८ अधो ल, पूर्वाष्टकलोप, शेष समाङ्ककलाभावात् १, २, ३, ५ एषामधो लघव प्रत्येक,।।।।ऽ। त्रयोदशम्। पृष्टे १४ तस्य २१ मध्याल्लोपे शेष ७, तस्य १३ मध्ये भागे शेष ६ इति परात्-सप्तमात् न्यूनता इति हेतो १३ अधो ल, सप्ता-धोऽपि ल, अष्टके पञ्चकभागात् अष्टाधो ग, पञ्चकलोप, त्रिके द्विकभागात् त्रिकाधो ग, द्विकलोप, मुख्यैकाध कला,।ऽऽ।। चतुर्दशम्। पृष्टे १५ लोपे

शेषं ६ तदधो म', १३ मध्योऽपि प्रागुक्तत्वात् म एव अष्टके पञ्चकभागादष्टाधो ग' पञ्चकलोप' द्विके एकस्य भागात् द्विकाधो ग' त्रिकाधो ल', एवं ऽ।ऽ।। पञ्चदशम् । पृष्टे १६ तल्लोपे शेष ५ तस्य १३ मध्ये भागे शेष ८ तदधो म', पञ्चाधो म:, अष्टके पञ्चकभागात् अष्टाधो ग' पूर्वपञ्चलोप' शेषे समकलाङ्कत्वात् अधोऽपि लघव:, ।।।ऽ।। षोडशम् । पृष्टे १७ तल्लोपे शेष ४ तदधो म' तस्य १३ मध्ये भागे शेषं ६ अथ परोक्तु पूर्वस्थाष्टकादधिक इति हेतो तस्याप्यधो म' पञ्चके त्रिकस्य भागात् पञ्चाधो ग', त्रिकलोप' द्विके मुख्यैकभागाद् द्विकाधो ग' मुख्यकलोप ऽऽ।।। सप्तदशम् । पृष्टे १८ तल्लोपे शेषं ३ तदधो म' तस्य १३ मध्ये भागे शेष १० तदधो म:, अष्टकादधिका १० इति अष्टकाधो म:, पञ्चके त्रिकभागात् पञ्चाधो ग', त्रिकलोप' शये समकलाङ्कत्वात् लघुद्वय ।।ऽ।।। अष्टादशम् । पृष्टे १९ तल्लोपे शेषं २ तस्य १३ मध्ये भागे शेषं ११ तस्य अष्टमध्ये भागाभावात् अष्टकस्य पञ्चके भागाभावात् सर्वत्र ५ ८ ११ २ एषु लघव' द्विकस्य त्रिकेऽभावात् त्रिकाधो ग' द्विकलोप' मुख्याधो ल: एवं।ऽ।।।। एकोनविंशम् । अथ पृष्टे २० तस्य २१ मध्यात्लोपे शेष १ तत्र १३ मध्यात् भागे शेषं १२ तस्य माप्टसु भाग' अष्टानां न पञ्चके भाग, पञ्चकस्य न त्रिके इति सर्वत्र लघव' पञ्चस्वङ्केषु द्विके मुख्यैकभागात् द्विकाधो ग' एकस्य लोप' एवं ऽ।।।।। विंशतितमं रूपम् । परत सर्वलघुकम् इति भाव्यम् । एवं सर्वत्र मात्राच्छन्दसि इष्टज्ञानम् ।

एककले—

।	१

द्विकले द्व —

ऽ	१
। ।	२

त्रिकले त्रीणि—

। ऽ	१
ऽ ।	२
। । ।	३

चतुष्कले पञ्च—

ऽ ऽ	१
। । ऽ	२
। ऽ ।	३
ऽ । ।	४
। । । ।	५

पञ्चकले अष्ट—

। ऽ ऽ	१
ऽ । ऽ	२
। । । ऽ	३
ऽ ऽ ।	४
। । ऽ ।	५
। ऽ । ।	६
ऽ । । ।	७
। । । । ।	८

षट्कले अष्ट—

S S S	१
I I S S	२
I S I S	३
S I I S	४
I I I I S	५
I S S I	६
S I S	७
I I S I	८
S S I I	९
I I S I I	१०
I S I I I	११
S I I I I	१२
I I I I I I	१३

षट्कल पूर्णम् ।

सप्तकले एकविंशति—

I S S S	१
S I S S	२
I I I S S	३
S S I S	४
I I S I S	
I S I I S	
S I I I S	
I I I I I S	
S S S I	
I I S S I	
I S I S I	
S I I S I	
I I I I S I	
I S S I I	
S I S I I	
S I I	
I S I I I I	१९
S I I I I I	२०
I I I I I I I	२१

सप्तकल पूर्णम् ।

अष्टकले चतुस्त्रिंशत्—

S S S S	१
I I S S S	२
I S I S S	३
S I I S S	४
I I I I S S	५
I S S I S	६
S I S I S	७
I I I S I S	८
S S I I S	९
I I S I I S	१०
I S I I I S	११
S I I I I S	१२
I I I I I I S	१३
I S S [illegible]	१४
S	१५
	१६
	१७
	१८
	१९
	२
	२१
	२

SS I I I I	१
I I S I I I I	११
I S I I I I I	१२
S I I I I I I	१३
I I I I I I I I	१४

अष्टकलं पूर्णम् ।

नवकले पञ्चपञ्चाशत्—

I S S S S	१
S I S S S	२
I I I S S S	३
S S I S S	४
I I S I S S	५
I S I I S S	६
S I I I S S	७
I I I I I S S	८
S S S I S	९
I I S S I S	१
I S I S I S	११
S I I S I S	१२
I I I I S I S	१३
I S S I I S	१४
S I S I I S	१५
I I I S I I S	१६
S S I I I S	१७
I I S I I I S	१८
I S I I I I S	१९
S I I I I I S	२
I I I I I I I S	२१
S S S S I	२२
I I S S S I	२३
I S I S S I	२४
S I I S S I	२५
I I I I S S I	२६
I S S I S I	२७
S I S I S I	२८
I I I S I S I	२९
S S I I S I	३
I I S I I S I	३१
I S I I I S I	३२
S I I I I S I	३३
I I I I I I S I	३४
I S S S I I	३५
S I S S I I	३६
I I I S S I I	३७
S S I S I I	३८
I I S I S I I	३९
I S I I S I I	४
S I I I S I I	४१
I I I I I S I I	४२
S S S I I I	४३
I I S S I I I	४४
I S I S I I I	४५
S I I S I I I	४६
I I I I S I I I	४७
I S S I I I I	४८
S I S I I I I	४९
I I I S I I I I	५
S S I I I I I	५१
I I S I I I I I	५२
I S I I I I I I	५३
S I I I I I I I	५४
I I I I I I I I I	५५

नवकलं पूर्णम् ।

दशकले नवाशीति—

S S S S S	१
I I S S S S	२
I S I S S S	३
S I I S S S	४

II I I ऽ ऽ ऽ ५
Iऽ ऽ I ऽ ऽ ६
ऽI ऽ I ऽ ऽ ७
II I ऽ I ऽ ऽ ८
ऽऽ I I ऽ ऽ ९
II ऽ I I ऽ ऽ १०
Iऽ I I I ऽ ऽ ११
ऽI I I I ऽ ऽ १२
II I I I I ऽ ऽ १३
Iऽ ऽ ऽ I ऽ १४
ऽI ऽ ऽ I ऽ १५
II I ऽ ऽ I ऽ १६
ऽऽ I ऽ I ऽ १७
II ऽ I ऽ I ऽ १८
Iऽ I I ऽ I ऽ १९
ऽI I I ऽ I ऽ २०
II I I I ऽ I ऽ २१
ऽऽ ऽ I I ऽ २२
II ऽ ऽ I I ऽ २३
Iऽ I ऽ I I ऽ २४
ऽI I ऽ I I ऽ २५
II I I ऽ I I ऽ २६
Iऽ ऽ I I I ऽ २७
ऽI ऽ I I I ऽ २८
II I ऽ I I I ऽ २९
ऽऽ I I I I ऽ ३०
II ऽ I I I I ऽ ३१
Iऽ I I I I I ऽ ३२
ऽI I I I I I ऽ ३३
II I I I I I I I ऽ ३४
Iऽ ऽ ऽ ऽ I ३५
ऽI ऽ ऽ ऽ I ३६
II I ऽ ऽ ऽ I ३७
ऽऽ I ऽ ऽ I ३८
II ऽ I ऽ ऽ I ३९
Iऽ I I ऽ ऽ I ४०
ऽI I I ऽ ऽ I ४१
II I I I ऽ ऽ I ४२
ऽऽ ऽ I ऽ I ४३
II ऽ ऽ I ऽ I ४४
Iऽ I ऽ I ऽ I ४५
ऽI I ऽ I ऽ I ४६
II I I ऽ I ऽ I ४७
Iऽ ऽ I I ऽ I ४८
ऽI ऽ I I ऽ I ४९
II I ऽ I I ऽ I ५०
ऽऽ I I I ऽ I ५१
II ऽ I I I ऽ I ५२
Iऽ I I I I ऽ I ५३
ऽI I I I I ऽ I ५४
II I I I I I ऽ I ५५
ऽऽ ऽ ऽ I I ५६
I I ऽ ऽ ऽ I I ५७
Iऽ I ऽ ऽ I I ५८
ऽI I ऽ ऽ I I ५९
II I I ऽ ऽ I I ६०
Iऽ ऽ I ऽ I I ६१
ऽI ऽ I ऽ I I ६२
II I ऽ I ऽ I I ६३
ऽऽ I I ऽ I I ६४
II ऽ I I ऽ I I ६५
Iऽ I I I ऽ I I ६६
ऽI I I I ऽ I I ६७
I I I I I I ऽ I I ६८
Iऽ ऽ ऽ I I I ६९
ऽI ऽ ऽ I I I ७०
II I ऽ ऽ I I I ७१
ऽऽ I ऽ I I I ७२
II ऽ I ऽ I I I ७३
Iऽ I I ऽ I I I ७४
ऽI I I ऽ I I I ७५
II I I I ऽ I I I ७६

S S S I I I I ७७
I I S S I I I I ७८
I S I S I I I I ७९
S I I S I I I I ८०
I I I I S I I I I ८१
I S S I I I I I ८२
S I S I I I I I ८३

I I I S I I I I I ८४
S S I I I I I I ८५
I I S I I I I I I ८६
I S I I I I I I I ८७
S I I I I I I I I ८८
I I I I I I I I I I ८९

दशकलं सम्पूर्णम् ।

इष्टाङ्कदेन विलोप्य पृष्टरूपमिहोच्यते ।
प्राप्तां भाषां नष्टमिहममाकल्प्य न बोधितम् ॥ १ ॥

उपान्त्यतोऽन्त्येऽभ्यधिके ह्ययो न
साम्येऽपि गो सन्तु ततोऽन्त्यहानौ ।
पश्चाद्गुरोर्लोपमनङ्ककस्य
क्रमाङ्कसाम्ये भवतो निमेषा ॥ २ ॥

शेषाङ्कपूर्वापरयोरधो गः
स्थाप्योऽत्र वृद्धस्य न एकलोपे ।
न पूर्वरूपं पुनरेव कार्यं
नो यत्र लुप्येदिति तद्विचार्यम् ॥ ३ ॥

पृष्टे पञ्चकले पञ्चमं १ २ ३ ५ ८ तदा पृष्टं पञ्चमं तस्य अन्त्येऽष्टके
| | | | |
लोपे शेषमन्त्ये ३ तस्याधो गः, उपान्त्यात् हीनत्वात् शेषाङ्का १ २ ३ ५, अत्र त्रिकस्य पञ्चके भाग वृद्धत्वात् तदधो गः, पश्चात् त्रिकस्य लोपः, शेष १।२ क्रमाणां अङ्कानां च साम्यात् प्रत्येकं लघवः, इति ।।ऽ। पञ्चमं रूपम् । यद्यत्र एकात् द्विकस्य वृद्धत्वाच्च गुरुर्लभ्यते तदा तु पञ्चकले तुर्यस्यापत्तिः । अत्र हि प्रथमरूपद्वये त्रिकलवत् न्यस्ते प्राप्तगुरुत्वम् । पञ्चकलत्वाच्छन्दस त्रिकले पूर्वं पूर्णत्वात् अग्रे तदतिक्रमे चतुष्कलं स्यात् पूर्वस्य द्वितीयरूपप्राप्तिस्तद्भङ्गश्च दोषश्च । अथ यो नष्टः पूर्वरूपं न जानाति तस्य का गतिः ? इति चेत् तेन पुनः विचार्यं यत् पञ्चकले सर्वरूपाण्यष्ट तर्हि त्रिरूपाण्यतिक्रान्ते गुर्वेकत्वा न युक्ता । अस्य यावत् क्रमच्छन्दसः स्वपूर्वच्छन्दस ३।१ परस्य यावद् रूपाणिमयं तावति रूपे अर्द्धं प्राप्तगुरुता च । यथा— अत्र पञ्चकले स्वपूर्वचतुष्कलात् पञ्चरूपात्मकात् रूपत्रयमधिकमिति त्रिरूपी यावदर्द्धेऽन्त्यगुरुता च ।

पूर्व-पूर्वत्रिकलरूपतापि । तत्र गुर्वाधिक्य परार्द्धे लघूनामाधिक्य प्रान्तलघुता च । यथा, त्रिकलत चतु कले रूपद्वयाधिक्य तेन प्रथमरूपद्वये न गुरुत्व, शेषद्वये चान्तलघुत्व, पञ्चम तु चतुर्लम् । पञ्चकलेपि प्रथमत्रिरूपीत्रिकलस्य पश्चात् पञ्चरूपी चतु कलस्य तत्रापि प्रान्तलघुता । पञ्चसु रूपेष्वपि द्विकलाद् रूपद्वयं प्रान्तगुरुक तस्याप्यग्रे एक लघु । ततोऽपि रूपद्वय त्रिकलवत् प्रान्तलघुद्वय चतु-कलापेक्षया पञ्चम, पञ्चकलापेक्षयाऽष्टम सर्वलघुकम् ।

पञ्चकलात् षट्कले पञ्चरूपाधिक्य, पञ्चापि रूपाणि चतु कलवत् प्रान्ते एकगुरोरधिकस्य दानात् कलापूर्ति, पञ्चमे रूपे एको गुरुरन्ते शेष लघुचतुष्टयम् ।

परतोऽष्टरूपाणि पञ्चकलवत् प्रान्ते एकलघुनाऽधिकानि । तत्राप्यष्टमे प्रान्ते एकगुरु शेष लघुपञ्चक, अष्टाष्वपि रूपत्रय त्रिकलवत् प्रान्ते गुरुलघुभ्यामधिक षट्सप्तमाष्टरूप, पर रूपपञ्चक चतु कलवत् प्रान्ते लघुद्वयाधिक इत्यादौ विचार एव बलवान् ।

एव पृष्टे पञ्चकले षष्ठरूपे तदा प्रान्त्याष्टमध्ये ६ लोपे शेष १, २, ३, ५, २, अन्त्यद्विकाधो ल, तस्य पञ्चके भागात् उपान्त्यादूनत्वाच्च पञ्चकेपि द्विकस्य भागे लब्ध २ शेष १ तेन पञ्चकाधोपि ल, त्रिकाधो ग, द्विकलोप, तुर्ये पञ्चमे च रूपे पञ्चकाधो ग, त्रिकलोप. । पञ्चकले हि त्रिकलवत् त्रिरूपी गुरुणान्तेऽधिका इद पृष्ट षष्ठ रूप इति विचारात् लब्धस्य द्विकस्य त्रिके भागाच्च, मुख्यैकाध कला ।ऽ।। इति षष्ठ रूपम् । यथा उपान्त्ये–अन्त्यस्य भागे उपान्त्याधो ग, अन्त्याधो ल, उपान्त्यपूर्वस्य लोप, तथा द्विकस्य पञ्चके शेष १ तस्य त्रिके भागेपि सभवति त्रिकाधो ग, पञ्चकस्थानीयद्विकाधो ल, पूर्वद्विकलोप, मुख्याधो ल । इति रूपनिर्णय ।

पञ्चकले सप्तमेपि अन्त्याष्टके सप्तलोपे शेष १ तदधो ल शेषैकस्यापि पञ्चके भागे शेष पूर्णम् । अग्रे त्रिकस्य द्विके भागाभाव वृद्धत्वात्, मुख्यैकस्य द्विके भागात् द्विकाधो ग, मुख्यैकलोप; त्रिकाधो ल, इति ऽ।।। सप्तमम् ।

> यो यस्मात् पूर्वपूर्वोऽङ्कस्तावद्रूपेषु चान्त्यगः ।
> तत्पर प्रान्त-लान्येव स्वत पूर्वाङ्कसख्यया ।। ४ ।।

एव सप्तकले पृष्टे एकादशे रूपे अन्त्याङ्के २१ मध्ये ११ पाते शेष १० तस्य उपान्त्याङ्के १३ मध्ये भाग प्राप्त, तत्र अष्टकस्य कलाग्रहात् १३ स्थानीयत्रिकाधो ग, अष्टकलोपः, दशाधो ल, द्विकस्य त्रिके भाग, तेन त्रिकाधो ग., द्विकलोपः, मुख्यैकाधो ल, पञ्चकाधो ल, एव ।ऽ।ऽ। इत्येकादशरूपसिद्धि ।

ननु अत्र पञ्चके त्रयोदशस्थानीयत्रिकस्य भागात् पञ्चकाद्यो ग पूर्वत्रिकलोपः, अग्रे १,२ अनयोरेव कलाद्वयमिति कथ न क्रियते ? इति चेत् न दशमस्थापत्तेः। परस्य १० अङ्कस्य पूर्वस्मिन् १३ अङ्क भागाधिकारात् पूर्वत्रिके भागश्चेत् सम्भवति तदाऽयं विधियुक्तः। यद्यपि त्रयोदशस्थानीयत्रिकस्य परस्य पूर्वस्मिन् पञ्चके भागसम्भवः परं मध्येऽष्टकलोपेन व्यवधानाभावं विधिर्मृग्यते।

यद्यपि सप्तकले दशमे रूपे प्रथमेव सिद्धिर्दृश्यते तथापि सप्तकले पूर्वपूर्वं पञ्चकस्य तस्याष्टरूपाणि प्रथमतोऽतिक्रान्तानि शेष ९।१०।११ इति षट्कलस्य तृतीय रूपे प्रश्ने प्राप्तं, तच्च ।ऽ।ऽ ईदृशमिति तन्नूनं प्राप्तत्वेऽानीयमध्याप्रस्तारः।

